ऐसा कहे जाने पर अजन्मा भगवान् शंकर ने भस्म करने की कामना से अपने भयङ्कर नेत्र द्वारा (ब्रह्मा के उस) मुख का निरन्तर अवलोकन किया। (३३)

तदनन्तर श्री शकर के श्वेत, रक्त, स्वर्णिम नील एव पिंगल वर्ण के सुन्दर पाँच मुख समुद्भूत हुए। (३४)

सूर्य सदृश सद्य (समुद्भूत) मुखों को देखकर पितामह के मुख ने कहा "समाहत जल में बुद्बुद् तो उत्पन्न होते हैं किन्तु क्या उनमे पराक्रम भी होता है ?" (३५)

यह सुनकर क्रोधयुक्त महात्मा शंकर ने नख के अग्र भाग से ब्रह्मा के परुषभाषी शिर को काट दिया। (३६)

वह कटा हुआ शिर शकर के ही वाम हथेली पर गिरा एव वह कपाल श्री शंकर के उस हथेली से किसी प्रकार भी नहीं गिरा। (३७)

तदनन्तर अद्भुतकर्मा क्रोधावृत ब्रह्मा ने भी कवच कुण्डल एवं शर धारण करने वाले, धनुर्धर, महाबाहु, बाणशक्तिधर, अव्यय, चतुर्भुज, महातूणीर युक्त, आदित्य के समान दिखलाई पड़ने वाले एक बुद्धिमान् पुरुष की सृष्टि की। (३८-३९)

उन्होंने कहा—"हे दुर्बुद्धि शूलधारी शकर, तुम चले

भवान् पापममायुक्तः पापिष्ठं को जिघांसति ॥ ४०
इत्युक्तः शंकरस्तेन पुरुषेण महात्मना ।
अपायुक्तो जगामाथ रुद्रो बदरिकाश्रमम् ॥ ४१
नरनारायणस्थानं पर्वते हि हिमाश्रये ।
सरस्वती यत्र पुण्या स्यन्दते सरितां वरा ॥ ४२
तत्र गत्वा च तं दृष्ट्वा नारायणमुवाच ह ।
भिक्षां प्रयच्छ भगवन् महाकापालिकोऽस्मि भोः ॥ ४३
इत्युक्तो धर्मपुत्रस्तु रुद्र वचनमब्रवीत् ।
सव्यं भुजं ताडयस्व त्रिशूलेन महेश्वर ॥ ४४
नारायणवचः श्रुत्वा त्रिशूलेन त्रिलोचनः ।
सव्यं नारायणभुजं ताडयामास वेगवान् ॥ ४५
त्रिशूलाभिहतान्मार्गात् तिस्रो धारा विनिर्ययुः ।
एका गगनमाक्रम्य स्थिता ताराभिमण्डिता ॥ ४६
द्वितीया न्यपतद् भूमौ तां जग्राह तपोधनः ।
अत्रिस्तस्मात् समुद्भूतो दुर्वासाः शंकरांशतः ॥ ४७
तृतीया न्यपतद् धारा कपाले रौद्रदर्शने ।
तस्माच्छिशुः समभवत् संनद्धकवचो युवा ॥ ४८

श्यामावदातः शरचापपाणि
गर्जन्यथा प्रावृषि तोयदोऽसौ ।
इत्थं ब्रुवन् कस्य विशातयामि
स्कन्धाच्छिरस् तालफलं यथैव ॥ ४९
तं शंकरोऽभ्येत्य वचो बभाषे
नरं हि नारायणबाहुजातम् ।
निपातयैनं नर दुष्टवाक्य
ब्रह्मात्मजं सूर्यशतप्रकाशम् ॥ ५०
इत्येवमुक्तः स तु शंकरेण
आद्यं धनुस्त्वाजगवं प्रसिद्धम् ।
जग्राह तूणानि तथाऽक्षयाणि
युद्धाय वीरः स मतिं चकार ॥ ५१
ततः प्रयुद्धौ सुभृशं महाबलौ
ब्रह्मात्मजो बाहुभवश्च शार्व. ।
दिव्यं सहस्र परिवत्सराणां
ततो हरोऽभ्येत्य विरञ्चिमूचे ॥ ५२
जितस्त्वदीयः पुरुषः पितामह

जाओ, मैं तुम्हें नहीं मारूँगा। तुम पापयुक्त हो, पापिष्ठ को कौन मारना चाहता है ? ४०

उस महापुरुष ने शकर से इस प्रकार कहा तब रुद्र लज्जित होकर बदरिकाश्रम को चले गए। (४१)

हिमालय पर्वत पर (वह बदरिकाश्रम) नर नारायण का स्थान है जहाँ नदियों में श्रेष्ठ पवित्र सरस्वती नदी प्रवाहित होती हैं। (४२)

वहाँ जाकर और उन नारायण को देखकर शकर ने कहा—"हे भगवन्! मैं महाकापालिक हूँ। आप मुझे भिक्षा दें। (४३)

ऐसा कहे जाने पर धर्मपुत्र (नारायण) ने रुद्र से कहा—"हे महेश्वर! तुम त्रिशूल के द्वारा मेरी बायीं भुजा को ताडित करो। (४४)

नारायण के वचन को सुन कर वेगवान् त्रिलोचन ने त्रिशूल से उनकी वाम भुजा को ताडित किया। (४५)

त्रिशूलाहत मार्ग से तीन धाराएँ निकलीं। एक धारा आकाश में जाकर ताराओं से अभिमण्डित हुई। दूसरी धारा पृथ्वी पर गिरी जिसे तपोधन अत्रि ने ग्रहण किया। उससे शङ्कर के अंश से दुर्वासा का प्रादुर्भाव हुआ। तृतीय धारा भयानक दिखाई पडने वाले कपाल पर गिरी जिससे एक शिशु उत्पन्न हुआ, वह (तत्काल) कवच बाँधे, श्यामवर्ण का, हाथों में धनुषबाण धारण किए एक युवक हो गया। वर्षा काल में जिस प्रकार मेघ गर्जन करते हैं उसी प्रकार वह (युवा पुरुष) यह कह रहा था "मैं तालफल के सदृश किसके स्कन्ध से शिर को काटूँ।" (४६–४९)

श्री नारायण के बाहु से उत्पन्न पुरुष के समीप जाकर श्रीशकर ने कहा—"हे नर! शत सूर्यसदृश प्रकाशमान कटु भाषी ब्रह्मा से उत्पन्न इस पुरुष को तुम मारो।" (५०)

शकर के ऐसा कहने पर उस वीर पुरुष ने प्रसिद्ध आद्य अजगव (नामक) धनुष एव अक्षय तूणीर ग्रहण कर युद्ध का निश्चय किया। (५१)

तदनन्तर ब्रह्मात्मज एव बाहुजात शकर पुरुष-दोनों महाबलवान् पुरुषों ने सहस्र दिव्य वर्षों तक प्रबल युद्ध किया। तत्पश्चात् श्रीशकर ने ब्रह्मा के पास जाकर कहा— (५२)

"हे पितामह! यह एक अद्भुत बात है कि दिव्य प

नरेण दिव्याद्भुतकर्मणा बली ।
महाप्रपत्कैरभिपत्य ताडित-
स्तदद्भुतं चेह दिशो दशैव ॥ ५३
ब्रह्मा तमीशं वचनं बभाषे
नेहास्य जन्मान्यजितस्य शंभो ।
पराजितश्चेष्यतेऽसौ त्वदीयो
नरो मदीयः पुरुषो महात्मा ॥ ५४
इत्येवमुक्तो वचनं त्रिनेत्रश्-
चिक्षेप सूर्ये पुरुषं विरिञ्चेः ।
नरं नरस्यैव तदा स विग्रहे
चिक्षेप धर्मप्रभवस्य देवः ॥ ५५

इति श्रीवामनपुराणे द्वितीयोऽध्याय ॥२॥

३

पुलस्त्य उवाच ।
ततः करतले रुद्रः कपाले दारुणे स्थिते ।
संतापमगमद् ब्रह्मंश्चिन्तया व्याकुलेन्द्रियः ॥ १
ततः समागता रौद्रा नीलाञ्जनचयप्रभा ।
संरक्तमूर्द्धजा भीमा ब्रह्महत्या हरान्तिकम् ॥ २
तामागतां हरो दृष्ट्वा पप्रच्छ विकरालिनीम् ।
काऽसि त्वमागता रौद्रे केनाप्यर्थेन तद्वद ॥ ३
कपालिनमथोवाच ब्रह्महत्या सुदारुणा ।
ब्रह्मवध्याऽस्मि संप्राप्ता मां प्रतीच्छ त्रिलोचन ॥ ४
इत्येवमुक्त्वा वचनं ब्रह्महत्या विवेश ह ।
त्रिशूलपाणिनं रुद्रं संप्रतापितविग्रहम् ॥ ५
ब्रह्महत्याभिभूतश्च शर्वो बदरिकाश्रमम् ।
आगच्छन्न ददर्शाथ नरनारायणावृषी ॥ ६
अदृष्ट्वा धर्मतनयौ चिन्ताशोकसमन्वितः ।
जगाम यमुनां स्नातुं साऽपि शुष्कजलाऽभवत् ॥ ७
कालिन्दीं शुष्कसलिलां निरीक्ष्य वृषकेतनः ।

अद्भुत कर्म वाले नर ने दसों दिशाओं में व्याप्त महान् बाणों के प्रहार से ताडित कर आपके पुरुष को जीत लिया।" (५३)

ब्रह्मा ने उस ईश से कहा कि—इस अजित का जन्म यहाँ दूसरों से हारने के लिये नहीं हुआ है। यदि किसी को पराजित कहा जाना अभीष्ट है तो यह मेरा ही नर है। मेरा पुरुष तो महाबली है। (५४)

ऐसा कहे जाने पर श्रीशंकर जी ने विरिञ्चि के पुरुष को सूर्यमण्डल मे फेंका तथा उन्हीं शंकर ने उस नर को धर्म पुत्र नर के शरीर म फेंक दिया। (५५)

श्री वामन पुराण में द्वितीय अध्याय समाप्त ॥२॥

३

पुलस्त्य ने कहा—हे ब्रह्मन्! तदनन्तर करतल में दारुण कपाल के सस्थित रहने पर रुद्र चिन्ता के कारण व्याकुलेन्द्रिय होने से सन्तप्त हुए। (१)

तदुपरान्त नीलाञ्जन समूह के समान कान्तिवाली, रक्त केशवाली, रौद्र एवं भयंकर ब्रह्महत्या महादेव के निकट आई। (२)

उस विकराल मूर्ति को आयी देख कर श्री शंकर ने पूछा—"हे रौद्रे, यह बतलाओ कि तुम कौन हो एवं किस लिये आयी हो? (३)

तब उस अत्यन्त दारुण ब्रह्महत्या ने कपाली से कहा—"मैं ब्रह्महत्या यहाँ आयी हूँ। हे त्रिलोचन! आप मुझे स्वीकार करें।" (४)

ऐसा कह कर ब्रह्महत्या सन्तप्त शरीरवाले त्रिशूलपाणि रुद्र में प्रविष्ट हुई। (५)

ब्रह्महत्या से अभिभूत श्री शंकर बदरिकाश्रम मे आए, किन्तु वहाँ नर एव नारायण ऋषियों को नहीं देखा। (६)

धर्मतनय ऋषिद्वय को न देखकर चिन्ता और शोक से युक्त वे यमुना में स्नान करने गए, किन्तु उसका भी जल सूख गया। (७)

कालिन्दी नदी को शुष्कसलिला हुई देख कर वृषकेतन

प्लक्षना स्नातुमगमदन्तर्द्धानं च सा गता ॥ ८
ततोनु पुष्करारण्यं मागधारण्यमेव च ।
सैन्धवारण्यमेवासौ गत्वा स्नातो यथेच्छया ॥ ९
तथैव नैमिषारण्यं धर्मारण्यं तथेश्वरः ।
स्नातो नैव च सा रौद्रा ब्रह्महत्या व्यमुञ्चत ॥ १०
सरित्सु तीर्थेषु तथाश्रमेषु
पुण्येषु देवायतनेषु शर्वः ।
समायुतो योगयुतोऽपि पापा
न्नावाप मोक्षं जलदध्वजोऽसौ ॥ ११
ततो जगाम निर्विण्णः शंकरः कुरुजाङ्गलम् ।
तत्र गत्वा ददर्शाथ चक्रपाणिं खगध्वजम् ॥ १२
तं दृष्ट्वा पुण्डरीकाक्षं शङ्खचक्रगदाधरम् ।
कृताञ्जलिपुटो भूत्वा हरः स्तोत्रमुदीरयत् ॥ १३
हर उवाच ।
नमस्ते देवतानाथ नमस्ते गरुडध्वज ।
शङ्खचक्रगदापाणे वासुदेव नमोऽस्तु ते ॥ १४
नमस्ते निर्गुणानन्त अप्रतर्क्याय वेधसे ।
ज्ञानाज्ञान निरालम्ब सर्वालम्ब नमोऽस्तु ते ॥ १५
रजोयुक्त नमस्तेऽस्तु ब्रह्ममूर्ते सनातन ।
त्वया सर्वमिदं नाथ जगत्सृष्टं चराचरम् ॥ १६
सत्त्वाधिष्ठित लोकेश विष्णुमूर्ते अधोक्षज ।
प्रजापाल महाबाहो जनार्दन नमोऽस्तु ते ॥ १७
तमोमूर्ते अहं ह्येष त्वदंशक्रोधसंभवः ।
गुणाभियुक्त देवेश सर्वव्यापिन् नमोऽस्तु ते ॥ १८
भूरियं त्वं जगन्नाथ जलाम्बरहुताशनः ।
वायुर्बुद्धिर्मनश्चापि शर्वरी त्वं नमोऽस्तु ते ॥ १९
धर्मो यज्ञस्तपः सत्यमहिंसा शौचमार्जवम् ।
क्षमा दानं दया लक्ष्मीर्ब्रह्मचर्यं त्वमीश्वर ॥ २०
त्वं साङ्गाश्चतुरो वेदास्त्वं वेद्यो वेदपारगः ।
उपवेदा भवानीश सर्वोऽसि त्वं नमोऽस्तु ते ॥ २१
नमो नमस्तेऽच्युत चक्रपाणे
नमोऽस्तु ते माधव मीनमूर्ते ।
लोके भवान् कारुणिको मतो मे
त्रायस्व मां केशव पापबन्धात् ॥ २२

(शंकर) प्लक्षजा (सरस्वती) नदी में स्नान करने गए। किंतु वह भी अन्तर्द्धान हो गई। (८)

तदुपरान्त पुष्करारण्य, मगधारण्य और सैन्धवारण्य में जाकर उन्होंने इच्छानुसार स्नान किया। (९)

इसी प्रकार शंकर ने नैमिषारण्य तथा धर्मारण्य में भी जाकर स्नान किया किन्तु उस भयंकर ब्रह्महत्या ने उन्हें नहीं छोड़ा। (१०)

जलदध्वज शंकर ने अनेक नदियों, तीर्थों, आश्रमों एवं पवित्र देवायतनों की यात्रा की तथापि योगी होने पर भी वे पाप से मुक्ति न प्राप्त कर सके। (११)

तदनन्तर खिन्न शंकर जी कुरुजाङ्गल में गये। वहाँ जाकर उन्होंने गरुडध्वज चक्रपाणि (विष्णु) को देखा। (१२)

उन शंख-चक्र-गदाधारी पुण्डरीकाक्ष (श्री नारायण) का दर्शन कर शंकर हाथ जोड़कर स्तुति करने लगे। (१३)

हर ने कहा—"हे देवताओं के नाथ! आपको नमस्कार है, हे गरुडध्वज! आपको प्रणाम है, हे शंखचक्रगदाधारी वासुदेव! आपको नमस्कार है।" (१४)

"हे निर्गुण, अनन्त, अप्रतर्क्य, विधाता! आपको नमस्कार है। हे ज्ञानाज्ञानस्वरूप, निरालम्ब एवं सर्वालम्ब! आपको नमस्कार है।" (१५)

हे रजोयुक्त, हे सनातन, हे ब्रह्ममूर्ति! आपको नमस्कार है। हे नाथ, आप ने इस सम्पूर्ण चराचर जगत् की सृष्टि की है। (१६)

हे सत्त्वगुण के आश्रय, हे लोकेश! हे विष्णुमूर्ति, हे अधोक्षज!, हे प्रजापालक, हे महाबाहु!, हे जनार्दन! आपको नमस्कार है। (१७)

हे तमोमूर्ति! मैं आपके अंशभूत क्रोध से उत्पन्न हूँ। हे गुणाभियुक्त सर्वव्यापी देवेश! आपको नमस्कार है। (१८)

हे जगन्नाथ! आप ही पृथ्वी, जल, आकाश, अग्नि, वायु, बुद्धि, मन एवं रात्रि हैं, आप को नमस्कार है। (१९)

हे ईश्वर! आप ही धर्म, यज्ञ, तपस्या, सत्य, अहिंसा, पवित्रता, सरलता, क्षमा, दान, दया, लक्ष्मी एवं ब्रह्मचर्य हैं। (२०)

हे ईश! आप अङ्गों सहित चतुर्वेदस्वरूप, वेद्य एवं वेदपारगामी हैं। आप ही उपवेद तथा सभी कुछ आप ही हैं। आपको नमस्कार है। (२१)

ममाशुभं नाशय विग्रहस्थं
यद् ब्रह्महत्याऽभिभवं बभूव ।
दग्धोऽस्मि नष्टोऽस्म्यसमीक्ष्यकारी
पुनीहि तीर्थोऽसि नमो नमस्ते ॥२३

पुलस्त्य उवाच ।

इत्थं स्तुतश्चक्रधरः शंकरेण महात्मना ।
प्रोवाच भगवान् वाक्यं ब्रह्महत्याक्षयाय हि ॥ २४

हरिरुवाच ।

महेश्वर शृणुष्वेमां मम वाच कलस्वनाम् ।
ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्धनीम् ॥ २५
योऽसौ प्राङ्मण्डले पुण्ये मदंशप्रभवोऽव्ययः ।
प्रयागे वसते नित्यं योगशायीति विश्रुतः ॥ २६
चरणाद् दक्षिणात्तस्य विनिर्याता सरिद्वरा ।
विश्रुता वरणेत्येव सर्वपापहरा शुभा ॥ २७
सव्यादन्या द्वितीया च असिरित्येव विश्रुता ।
ते उभे तु सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ॥ २८

ताभ्यां मध्ये तु यो देशस्तत्क्षेत्रं योगशायिनः ।
त्रैलोक्यप्रवरं तीर्थं सर्वपापप्रमोचनम् ।
न तादृशोऽस्ति गगने न भूम्यां न रसातले ॥ २९
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा ।
यस्यां हि भोगिनोऽपीश प्रयान्ति भवतो लयम् ॥ ३०

विलासिनीनां रशनास्वनेन
श्रुतिस्वनैर्ब्राह्मणपुंगवानाम् ।
शुचिस्वरत्वं गुरवो निशम्य
हास्यादशासन्त मुहुर्मुहुस्तान् ॥ ३१
व्रजत्सु योषित्सु चतुष्पथेषु
पदान्यलक्तारुणितानि दृष्ट्वा ।
ययौ शशी विस्मयमेव यस्या
किंस्वित् प्रयाता स्थलपद्मिनीयम् ॥ ३२
तुङ्गानि यस्यां सुरमन्दिराणि
रुन्धन्ति चन्द्रं रजनीमुखेषु ।
दिवाऽपि सूर्यं पवनाप्लुताभि-

हे अच्युत ! हे चक्रपाणि ! आपको बारंबार नमस्कार है। हे मीनमूर्तिधारी माधव ! आपको नमस्कार है। मैं आपको लोक में दयालु मानता हूँ। हे केशव ! मुझे आप पाप-बन्धन से मुक्त करें। (२२)

मेरे शरीर में स्थित ब्रह्महत्या जन्य अशुभ को आप नष्ट करें। विना विचार किये कार्य करने वाला मैं दग्ध एवं नष्ट हो गया हूँ। आप तीर्थ हैं। अतः आप मुझे पवित्र करें। आपको बारंबार नमस्कार है। (२३)

पुलस्त्य ने कहा—महात्मा शङ्कर द्वारा इस प्रकार स्तुति की जाने पर चक्रधर (भगवान् विष्णु) ने ब्रह्महत्या के क्षय के हेतु कहा— (२४)

हरि ने कहा—"हे महेश्वर ! आप श्रुतिमधुर, ब्रह्महत्या क्षयकारी, शुभप्रद एवं पुण्य को बढ़ाने वाली मेरी बात सुनें। (२५)

पवित्र प्राङ्मण्डलान्तर्गत प्रयाग मे मेरे अंश से उत्पन्न योगशायी नाम से प्रसिद्ध अव्यय पुरुष नित्य निवास करते हैं। (२६)

उनके दक्षिण चरण से वरणा नाम से विश्रुत श्रेष्ठ नदी निकली है वह सर्वपापहारिणी तथा पवित्र है। (२७)

एवं उनके वाम (पाद) से असि नाम से प्रसिद्ध एक दूसरी नदी निकली है। ये दोनों श्रेष्ठ नदियाँ लोकपूज्य हुई हैं। (२८)

उन दोनों के मध्य का प्रदेश योगशायी का क्षेत्र है वह त्रैलोक्य मे सर्वश्रेष्ठ तथा सभी पापों से मुक्त करनेवाला तीर्थ है। उसके सदृश अन्य कोई तीर्थ आकाश, पृथ्वी एवं रसातल मे नहीं है। (२९)

हे ईश ! वहाँ पवित्र शुभप्रद विख्यात वाराणसी नगरी है जिसमे भोगी लोग भी आप के स्थान को प्राप्त करते हैं। (३०)

श्रेष्ठ ब्राह्मणों की वेदध्वनि विलासिनियों की रशनाध्वनि से मिश्रित होकर कल्याणप्रद स्वर का रूप धारण करती है। इस ध्वनि को सुन कर गुरुजन बारंबार हास्यपूर्वक उनका शासन करते हैं। (३१)

चतुष्पथों पर भ्रमण करने वाली स्त्रियों के अलक्त से अरुणित पदों को देख कर चन्द्रमा को यह विस्मय हो गया कि क्या स्थल कमलिनी इस मार्ग से गई है। (३२)

जिसमें रात्रि का आरंभ होने पर ऊँचे-ऊँचे देवमन्दिर चन्द्रमा का अवरोध करते हैं एवं दिन में पवनान्दोलित दीर्घ पताकाओं से सूर्य को तिरोहित किया करते हैं। (३३)

दीर्घाभिरेवं सुपताकिकाभिः ॥ ३३
भृङ्गाश्च यस्यां शशिकान्तभित्तौ
प्रलोभ्यमानाः प्रतिबिम्बितेषु ।
आलेख्ययोषिद्विमलाननाब्जे-
ष्वीयुर्भ्रमान्नैव च पुष्पकान्तरम् ॥ ३४
परिश्रमश्चापि पराजितेषु
नरेषु संमोहनखेलनेन ।
यस्यां जलक्रीडनसंगतासु
न स्त्रीषु शंभो गृहदीर्घिकासु ॥ ३५
न चैव कश्चित् परमन्दिराणि
रुणद्धि शंभो सहसा ऋतेऽक्षान् ।
न चाबलानां तरसा पराक्रमं
करोति यस्यां सुरतं हि मुक्त्वा ॥ ३६
पाशग्रन्थिर्गजेन्द्राणां दानच्छेदो मदच्युतौ ।
यस्यां मानमदौ पुंसां करिणां यौवनागमे ॥ ३७
प्रियदोषाः सदा यस्यां कौशिका नेतरे जनाः ।
तारागणेऽकुलीनत्वं गद्ये वृत्तच्युतिर्विभो ॥ ३८
भूतिलुब्धा विलासिन्यो भुजंगपरिवारिताः ।
चन्द्रभूषितदेहाश्च यस्यां त्वमिव शंकर ॥ ३९
ईदृशायां सुरेशान वाराणस्यां महाश्रमे ।
वसते भगवाँल्लोलः सर्वपापहरो रविः ॥ ४०
दशाश्वमेधं यत्रोक्तं मदंशो यत्र केशवः ।
तत्र गत्वा सुरश्रेष्ठ पापमोक्षमवाप्स्यसि ॥ ४१
इत्येवमुक्तो गरुडध्वजेन
वृषध्वजस्तं शिरसा प्रणम्य ।
जगाम वेगाद् गरुडो यथाऽसौ
वाराणसीं पापविमोचनाय ॥ ४२
गत्वा सुपुण्यां नगरीं सुतीर्थां
दृष्ट्वा च लोलं सदशाश्वमेधम् ।
स्नात्वा च तीर्थेषु विमुक्तपापः
स केशवं द्रष्टुमुपाजगाम ॥ ४३
केशवं शंकरो दृष्ट्वा प्रणिपत्येदमब्रवीत् ।
त्वत्प्रसादाद् हृषीकेश ब्रह्महत्या क्षयं गता ॥ ४४

जिस (वाराणसी) मे चित्र मे निर्मित स्त्रियों के विमल मुख कमलों को चन्द्रकान्त मणि की भित्तियों पर प्रतिबिम्बित देखकर भ्रमवश उनपर लुब्ध भ्रमर दूसरे पुष्पों की ओर नहीं जाते। (३४)

और हे शम्भो ! जिस (वाराणसी) में समोहन खेलों से पराजित पुरुषों मे तथा गृह की बावलियों में जलक्रीड़ा के लिए एकत्र हुई स्त्रियों में ही परिश्रम होता है, अन्यत्र नहीं। (३५)

जहाँ पासों के अतिरिक्त अन्य कोई भी दूसरे के घरों को सहसा नहीं रोकता तथा सुरत काल के अतिरिक्त कोई स्त्रियों के साथ आवेगयुक्त पराक्रम नहीं करता। (३६)

जहाँ हाथियों के बन्धन में ही पाशग्रन्थि, उनकी मदच्युति में ही दानच्छेद एवं नर हाथियों के यौवनागम मे ही मान और मद होते हैं (अन्यत्र नहीं)। (३७)

हे विभो ! जहाँ उलूकही सदा दोषा (रात्रि) प्रिय होते हैं अन्य लोग दोषोंके प्रेमी नहीं हैं। तारागणों मे ही अकुलीनत्व (पृथ्वी में न छिपना) है लोगों मे अकुलीनता नहीं, गद्य में ही वृत्तच्युति (छन्दोभङ्ग) है अन्यत्र वृत्त (चरित्र) च्युति नहीं है। (३८)

हे शंकर ! जहाँ की विलासिनियाँ आप के सदृश 'भूतिलुब्धा' 'भुजंगपरिवारिता' एवं 'चन्द्रभूषितदेहा' होती हैं। (यहाँ 'भूति' पद 'भस्म' और 'धन' के अर्थ में 'भुजङ्ग' पद 'सर्प' एवं 'जार' के अर्थ में तथा 'चन्द्र' पद 'चन्द्राभूषण' के अर्थ मे प्रयुक्त है।) (३९)

हे सुरेशान ! इस प्रकार की वाराणसी के महान् आश्रम में सर्वपापहारी भगवान् लोल रवि निवास करते हैं। (४०)

हे सुरश्रेष्ठ ! जहाँ दशाश्वमेध कहे जाने वाले स्थान पर, जहाँ मेरे अंशस्वरूप केशव स्थित हैं, जाकर आप पाप से छुटकारा प्राप्त करेंगे। (४१)

गरुडध्वज के ऐसा कहने पर वृषध्वज उन्हें शिर से प्रणाम कर पापविमोचनार्थ गरुड के सदृश वेग से वाराणसी गए। (४२)

उस परमपवित्र तथा तीर्थभूत नगरी में जाकर दशाश्वमेध के साथ भगवान् लोल का दर्शन किया तथा (वहाँ के) तीर्थों मे स्नान कर तथा पापमुक्त हो कर (उसके बाद) वे केशव का दर्शन करने गये। (४३)

शंकर ने केशव को देख कर प्रणाम करने के उपरान्त

नेदं कपालं देवेश मद्धस्तं परिमुञ्चति।
कारणं वेद्मि न च तदेतन्मे वक्तुमर्हसि ॥ ४५

पुलस्त्य उवाच।

महादेववचः श्रुत्वा केशवो वाक्यमब्रवीत्।
निमित्ते कारणं रुद्र तत्सर्वं कथयामि ते ॥ ४६
योऽसौ ममाग्रतो दिव्यो ह्रदः पद्मोत्पलैर्युतः।
एष तीर्थवरः पुण्यो देवगन्धर्वपूजितः ॥ ४७
एतस्मिन्प्रवरे तीर्थे स्नानं शंभो समाचर।
स्नातमात्रस्य चाद्यैव कपालं परिमोक्ष्यति ॥ ४८
ततः कपाली लोके च ख्यातो रुद्र भविष्यसि।
कपालमोचनेत्येवं तीर्थं चेदं भविष्यति ॥ ४९

पुलस्त्य उवाच।

एवमुक्तः सुरेशेन केशवेन महेश्वरः।
कपालमोचने सस्नौ वेदोक्तविधिना मुने ॥ ५०
स्नातस्य तीर्थे त्रिपुरान्तकस्य
परिच्युतं हस्ततलात् कपालम्।
नाम्ना बभूवाथ कपालमोचनं
तत्तीर्थवर्यं भगवत्प्रसादात् ॥ ५१

इति श्रीवामनपुराणे तृतीयोऽध्याय ॥ ३ ॥

४

पुलस्त्य उवाच।

एवं कपाली संजातो देवर्षे भगवान्हरः।
अनेन कारणेनासौ दक्षेण न निमन्त्रितः ॥ १
कपालिजायेति सतीं विज्ञायाथ प्रजापतिः।
यज्ञे चाहूतापि दुहिता दक्षेण न निमन्त्रिता ॥ २
एतस्मिन्नन्तरे देवीं द्रष्टुं गौतमनन्दिनी।
जया जगाम शैलेन्द्रं मन्दरं चारुकन्दरम् ॥ ३
तामागतां सती दृष्ट्वा जयामेकामुवाच ह।

यह कहा—हे हृषीकेश! आपके प्रसाद से ब्रह्महत्या नष्ट हो गयी। (४४)

(किन्तु) हे देवेश, यह कपाल मेरे हाथ को नहीं छोड़ रहा है। उसका कारण मैं नहीं जानता। आप ही मुझे यह बतला सकते हैं। (४५)

पुलस्त्य ने कहा—महादेव का वचन सुन कर केशव ने यह वाक्य कहा—"हे रुद्र! इसके समस्त कारणों को मैं तुम्हें बतलाता हूँ। (४६)

मेरे सामने जो कमलों से युक्त यह दिव्य ह्रद है वह पवित्र तथा तीर्थश्रेष्ठ है एवं देवताओं तथा गन्धर्वों से पूजित है। (४७)

हे शम्भु! तुम इस परम श्रेष्ठ तीर्थ में स्नान करो। स्नान करने मात्र से आज ही यह कपाल (आप के हाथ को) छोड़ देगा। (४८)

इससे हे रुद्र! संसार में तुम 'कपाली' नाम से प्रसिद्ध होगे तथा यह तीर्थ भी कपालमोचन नाम से प्रख्यात होगा। (४९)

पुलस्त्य ने कहा—हे मुने! सुरेश्वर केशव के ऐसा कहने पर महेश्वर ने कपालमोचन तीर्थ में वेदोक्तविधि से स्नान किया। (५०)

तीर्थ में स्नान करते ही त्रिपुरान्तक के करतल से कपाल गिर गया। तदुपरान्त भगवान् की कृपा से उस तीर्थश्रेष्ठ का नाम कपालमोचन पड़ा। (५१)

श्री वामनपुराण म तृतीय अध्याय समाप्त ॥३॥

४

पुलस्त्य ने कहा—हे देवर्षे! इस प्रकार भगवान् हर कपाली हुए थे। इसी कारण वे दक्ष के द्वारा निमन्त्रित नहीं हुए। (१)

प्रजापति दक्ष ने सती को कपाली की भार्या समझ कर योग्य तथा अपनी कन्या होने पर भी यज्ञ में निमन्त्रित नहीं किया। (२)

इसी बीच देवी का दर्शन करने के लिये गौतम नन्दिनी जया सुन्दर कन्दरा वाले पर्वत श्रेष्ठ मन्दर पर गई। (३)

उस जया को अकेली आई देख कर सती ने कहा—

किमर्थं विजया नागाज्जयन्ती चापराजिता ॥ ४
सा देव्या वचनं श्रुत्वा उवाच परमेश्वरीम् ।
गता निमन्त्रिताः सर्वा मखे मातामहस्य वः ॥ ५
समं पित्रा गौतमेन मात्रा चैवाप्यहल्यया ।
अहं समागता द्रष्टुं त्वां तत्र गमनोत्सुका ॥ ६
किं त्वं न व्रजसे तत्र तथा देवो महेश्वरः ।
नामन्त्रिताऽसि तातेन उताहोस्विद् व्रजिष्यसि ॥ ७
गतास्तु ऋषयः सर्वे ऋषिपत्न्यः सुरास्तथा ।
मातृष्वसः शशाङ्कश्च सपत्नीको गतः क्रतुम् ॥ ८
चतुर्दशसु लोकेषु जन्तवो ये चराचराः ।
निमन्त्रिताः क्रतौ सर्वे किं नासि त्वं निमन्त्रिता ॥ ९

पुलस्त्य उवाच ।

जयायास्तद्वचः श्रुत्वा वज्रपातसमं सती ।
मन्युनाऽभिप्लुता ब्रह्मन् पञ्चत्वमगमत् ततः ॥१०
जया मृतां सतीं दृष्ट्वा क्रोधशोकपरिप्लुता ।
मुञ्चती वारि नेत्राभ्यां सस्वरं विललाप ह ॥ ११
आक्रन्दितध्वनिं श्रुत्वा शूलपाणिस्त्रिलोचनः ।
आः किमेतदितीत्युक्त्वा जयाभ्याशमुपागतः ॥ १२
आगतो ददृशे देवीं लतामिव वनस्पतेः ।
कृत्तां परशुना भूमौ श्लथाङ्गीं पतितां सतीम् ॥ १३
देवीं निपतितां दृष्ट्वा जयां पप्रच्छ शंकरः ।
किमियं पतिता भूमौ निकृत्तेव लता सती ॥ १४
सा शंकरवचः श्रुत्वा जया वचनमब्रवीत् ।
श्रुत्वा मखस्थां दक्षस्य भगिन्यः पतिभिः सह ॥ १५
आदित्याद्यास्त्रिलोकेश समं शक्रादिभिः सुरैः ।
मातृष्वसा विपन्नेयमन्तर्दुःखेन दह्यती ॥ १६

पुलस्त्य उवाच ।

एतच्छ्रुत्वा वचो रौद्रं रुद्रः क्रोधाप्लुतो बभौ ।
क्रुद्धस्य सर्वगात्रेभ्यो निश्चेरुः सहसार्चिषः ॥ १७
ततः क्रोधात् त्रिनेत्रस्य गात्ररोमोद्भवा मुने ।
गणाः सिंहमुखा जाता वीरभद्रपुरोगमाः ॥ १८
गणैः परिवृतस्तस्मान्मन्दराद्धिमसाह्वयम् ।

"विजया, जयन्ती और अपराजिता क्यों नहीं आयी ?" (४)

देवी के वचन को सुन कर उन्होंने परमेश्वरी से कहा—पिता गौतम और माता अहल्या के साथ वे सब मातामह के यज्ञ मे निमन्त्रित होकर गयी हैं। वहाँ जाने के लिये उत्सुक मैं आप को देखने आयी हूँ। (५ ६)

क्या आप तथा महेश्वर वहाँ नहीं जा रहे हैं ? क्या पिता ने आपको निमन्त्रित नहीं किया है ? अथवा आप वहाँ जायेंगी ? (७)

सभी ऋषि, ऋषिपत्नियाँ तथा देवगण वहाँ गये हैं। हे मातृष्वसे (मौसी)! सपत्नीक शशाङ्क भी उस यज्ञ में गये हैं। (८)

चौदहों लोकों के समस्त चराचर जन्तु उस यज्ञ में निमन्त्रित हुए हैं। क्या आप निमन्त्रित नहीं हैं ? (९)

पुलस्त्य ने कहा—हे ब्रह्मन् ! जया के वज्रपात-सदृश उस वचन को सुन कर क्रोधाभिप्लुत सती पञ्चत्व को प्राप्त हो गईं। (१०)

सती को मृत देखकर क्रोध और शोक से परिप्लुत जया नेत्रों से आँसू बहाते हुए सस्वर विलाप करने लगी। (११)

रोने की ध्वनि सुनकर शूलपाणि त्रिलोचन "अरे यह क्या है" ऐसा कह कर जया के पास गए। (१२)

वहाँ पहुँचकर उन्होंने परशु से काटी हुई वृक्ष की लता के सदृश शिथिलाङ्गी सती को भूमि पर पड़ी हुई देखा। (१३)

भूमि पर पड़ी हुई देवी को देख कर शंकर ने जया से पूछा—"सती छिन्न लता की तरह भूमि पर क्यों पड़ी हुई है।" (१४)

शंकर के वचन को सुन कर उस जया ने कहा "हे त्रिलोकेश ! दक्ष के यज्ञ में अपने पतियों के साथ बहनों का एवं इन्द्रादि देवों के साथ आदित्यादि का उपस्थित होना सुनकर आन्तरिक दुःख से दग्ध होती हुई यह (मेरी) मौसी विपन्न हो गई। (१५ १६)

पुलस्त्य ने कहा—इस भयंकर वचन को सुनकर रुद्र अत्यन्त क्रोधान्वित हो गए। क्रुद्ध (शंकर) के शरीर से सहसा ज्वालायें निकलने लगीं। (१७)

तदनन्तर हे मुने ! क्रोध के कारण त्रिनेत्र के शरीर के रोमों से सिंह के सदृश मुखवाले गण उत्पन्न हुए जिनमें वीरभद्र प्रमुख थे। तब अपने गणों से परिवेष्टित होकर वे

गतः कनखलं तस्माद् यत्र दक्षोऽयजत् क्रतुम् ॥ १९
ततो गणानामधिपो वीरभद्रो महानलः।
दिशि प्रतीच्युत्तरायां तस्थौ शूलधरो मुने ॥ २०
जया क्रोधाद् गदां गृह्य पूर्वदक्षिणतः स्थिता।
मध्ये त्रिशूलधृक् शर्वस्तस्थौ क्रोधान्महामुने ॥ २१
मृगारिवदनं दृष्ट्वा देवाः शक्रपुरोगमाः।
ऋषयो यक्षगन्धर्वाः किमिदं त्वित्यचिन्तयन् ॥ २२
ततस्तु धनुरादाय शरांश्चाशीविषोपमान्।
द्वारपालस्तदा धर्मो वीरभद्रमुपाद्रवत् ॥ २३
तमापतन्तं सहसा धर्मं दृष्ट्वा गणेश्वरः।
करेणैकेन जग्राह त्रिशूलं वह्निसन्निभम् ॥ २४
कार्मुकं च द्वितीयेन तृतीयेनाथ मार्गणान्।
चतुर्थेन गदां गृह्य धर्ममभ्यद्रवद् गणः ॥ २५
ततश्चतुर्भुजं दृष्ट्वा धर्मराजो गणेश्वरम्।
तस्थावष्टभुजो भूत्वा नानायुधधरोऽव्ययः ॥ २६
खड्गचर्मगदाप्रासपरश्वधवराङ्कुशैः।
चापमार्गणभृत्तस्थौ हन्तुकामो गणेश्वरम् ॥ २७
गणेश्वरोऽपि संक्रुद्धो हन्तुं धर्मं सनातनम्।
ववर्ष मार्गणांस्तीक्ष्णान् यथा प्रावृषि तोयदः ॥ २८
तावन्योन्यं महात्मानौ शरचापधरौ मुने।
रुधिरारुणसिक्ताङ्गौ किंशुकाविव रेजतुः ॥ २९
ततो वरास्त्रैर्गणनायकेन
जितः स धर्मः तरसा प्रसह्य।
पराङ्मुखोऽभूद्विमना मुनीन्द्र
स वीरभद्रः प्रविवेश यज्ञम् ॥ ३०
यज्ञवाटं प्रविष्टं त वीरभद्रं गणेश्वरम्।
दृष्ट्वा तु सहसा देवा उत्तस्थुः सायुधा मुने ॥ ३१
वसवोऽष्टौ महाभागा ग्रहा नव सुदारुणाः।
इन्द्राद्या द्वादशादित्या रुद्रास्त्वेकादशैव हि ॥ ३२
विश्वेदेवाश्च साध्याश्च सिद्धगन्धर्वपन्नगाः।
यक्षाः किंपुरुषाश्चैव खगाश्चक्रधरास्तथा ॥ ३३
राजा वैवस्वताद्वंशाद् धर्मकीर्तिस्तु विश्रुतः।

मन्दर पर्वत से हिमालय पर गये और वहाँ से कनखल गए जहाँ दक्ष यज्ञ कर रहे थे। (१८-१९)

हे मुने! तदनन्तर गणाधिप महाबली वीरभद्र शूल धारण किये पश्चिमोत्तर दिशा में स्थित हुए। (२०)

हे महामुने! क्रोध से गदा लेकर जया पूर्वदक्षिण दिशा में खड़ी हो गई और मध्य में क्रोधित त्रिशूलधारी शंकर स्थित हुए। (२१)

सिंहवदन (वीरभद्र) को देखकर इन्द्रादि देवता, ऋषि, यक्ष एवं गन्धर्व लोग सोचने लगे कि यह क्या है? (२२)

तदनन्तर द्वारपाल धर्म धनुष एवं सर्प के समान बाणों को लेकर वीरभद्र की ओर दौड़े। (२३)

सहसा धर्म को आता हुआ देखकर गणेश्वर एक हाथ में अग्नि के सदृश त्रिशूल, दूसरे हाथ में धनुष, तीसरे हाथ में बाण और चतुर्थ हाथ में गदा लेकर उनकी ओर दौड़े। (२४-२५)

तदुपरान्त अव्यय धर्मराज ने चतुर्भुज गणेश्वर को देखकर नानाप्रकार के आयुधों से युक्त अष्टभुज होकर उनका सामना किया और गणेश्वर को मारने की इच्छा से (अपने हाथों में) खड्ग, चर्म (ढाल), गदा, प्रास (भाला), परश्वध (फरसा), उत्तम अंकुश, धनुष एवं बाण धारण कर खड़े हो गये। (२६-२७)

गणेश्वर वीरभद्र भी अत्यन्त क्रुद्ध होकर सनातन धर्म को मारने के लिये वर्षाकालिक मेघ के सदृश उनके ऊपर तीक्ष्ण बाणों की वर्षा करने लगे। (२८)

हे मुने! शरचापधारी वे दोनों रुधिर से लाल तथा सिक्त शरीर वाले महात्मा किंशुक पुष्प के सदृश सुशोभित होने लगे। (२९)

हे मुनीन्द्र! तदनन्तर गणनायक द्वारा श्रेष्ठ शस्त्रास्त्रों से बलपूर्वक विजित धर्मराज उदास होकर पीछे हट गये एवं वीरभद्र यज्ञ में प्रविष्ट हुए। (३०)

हे मुने! गणेश्वर वीरभद्र को यज्ञमण्डप में प्रविष्ट हुआ देखकर देवतागण अस्त्र-शस्त्र लेकर सहसा उठ खड़े हुए। (३१)

महाभाग आठों वसु, अति दारुण नवग्रह, इन्द्रादि, द्वादश आदित्य, एकादश रुद्र, विश्वेदेव, साध्यगण, सिद्ध, गन्धर्व, पन्नग, यक्ष, किंपुरुष (किन्नर), भूत, विहंगम, चक्रधर, वैवस्वत-वंशीय प्रसिद्ध राजा धर्मकीर्ति, चन्द्रवंशीय राजा उग्रबलशाली भोजकीर्ति, दैत्य, दानव तथा

सोमवंशोद्भवश्चोग्रो भोजकीर्तिर्महाभुजः ॥ ३४
दितिजा दानवाश्चान्ये येऽन्ये तत्र समागताः ।
ते सर्वेऽभ्यद्रवन् रौद्रं वीरभद्रमुदायुधाः ॥ ३५
तानापतत एवाशु चापबाणधरो गणः ।
अभिदुद्राव वेगेन सर्वानेव शरोत्करैः ॥ ३६
ते शस्त्रवर्षमतुलं गणेशाय समुत्सृजन् ।
गणेशोऽपि वरास्त्रैस्तान् प्रचिच्छेद बिभेद च ॥ ३७
शरैः शस्त्रैश्च सततं वध्यमाना महात्मना ।
वीरभद्रेण देवाद्या अवहारमकुर्वत ॥ ३८
ततो विवेश गणपो यज्ञमध्यं सुविस्तृतम् ।
जुह्वाना ऋषयो यत्र हवींषि प्रवितन्वते ॥ ३९
ततो महर्षयो दृष्ट्वा मृगेन्द्रवदनं गणम् ।
भीता होत्रं परित्यज्य जग्मुः शरणमच्युतम् ॥ ४०
तानार्तांश्चक्रभृद् दृष्ट्वा महर्षींस्त्रस्तमानसान् ।
न भेतव्यमितीत्युक्त्वा समुत्तस्थौ वरायुधः ॥ ४१
समानम्य ततः शार्ङ्गं शरानग्निशिखोपमान् ।
मुमोच वीरभद्राय कायावरणदारणान् ॥ ४२
ते तस्य कायमासाद्य अमोघा वै हरेः शराः ।
निपेतुर्भुवि भग्नाशा नास्तिकादिव याचकाः ॥ ४३
शरांस्त्वमोघान्मोघत्वमापन्नान्वीक्ष्य केशवः ।
दिव्यैरस्त्रैर्वीरभद्रं प्रच्छादयितुमुद्यतः ॥ ४४
तानस्त्रान्वासुदेवेन प्रक्षिप्तान्गणनायकः ।
वारयामास शूलेन गदया मार्गणैस्तथा ॥ ४५
दृष्ट्वा विपन्नान्यस्त्राणि गदां चिक्षेप माधवः ।
त्रिशूलेन समाहत्य पातयामास भूतले ॥ ४६
मुशलं वीरभद्राय प्रचिक्षेप हलायुधः ।
लाङ्गलं च गणेशोऽपि गदया प्रत्यवारयत् ॥ ४७
मुशलं सगदं दृष्ट्वा लाङ्गलं च निवारितम् ।
वीरभद्राय चिक्षेप चक्रं क्रोधात् खगध्वजः ॥ ४८
तमापतन्तं शतसूर्यकल्पं
सुदर्शनं वीक्ष्य गणेश्वरस्तु ।
शूलं परित्यज्य जगार चक्रं

वहाँ आये हुए अन्य सभी आयुध लेकर रौद्र वीरभद्र की ओर दौड़े। (३२-३५)

धनुष बाणधारी गण ने उन सभी के आते ही उन पर वेगपूर्वक बाण प्रहार से प्रत्याक्रमण किया। (३६)

उन सभी ने वीरभद्र के ऊपर अतुलनीय बाणों की वर्षा की। गणपति ने भी उत्तम अस्त्रों से उन्हें छिन्न भिन्न कर डाला। (३७)

महात्मा वीरभद्र द्वारा विविध बाणों और अस्त्रों से आहत होकर देवतादि युद्ध से निवृत्त हो गये। (३८)

तब गणपति वीरभद्र सुविस्तृत यज्ञ के मध्य में प्रविष्ट हुए जहाँ यज्ञरत ऋषि लोग अग्नि मे हवि की आहुति दे रहे थे। (३९)

तदुपरान्त महर्षि लोग सिंहमुख गण को देखकर भय से हवन छोड़कर अच्युत की शरण में गये। (४०)

चक्रधारी अच्युत त्रस्तमानस उन महर्षियों को आर्त देख-कर 'डरो मत' ऐसा कह कर श्रेष्ठ आयुध लेकर खड़े हुए। (४१)

तदनन्तर वे शार्ङ्ग धनुष को झुका कर वीरभद्र के ऊपर शरीरावरण को विदारित करने वाले अग्निशिखा के तुल्य बाणों का वर्षण करने लगे। (४२)

श्री हरि के वे अमोघ बाण उसके (वीरभद्र के) शरीर पर पहुँच कर पृथ्वी पर इस प्रकार गिर पड़े जैसे याचक नास्तिक के पास से निराश होकर लौटता है। (४३)

अमोघ बाणों को व्यर्थ होते देख कर केशव वीरभद्र को दिव्य अस्त्रों से आच्छादित करने के लिये उद्यत हुए। (४४)

वासुदेव के द्वारा प्रक्षिप्त उन बाणों को गणनायक ने शूल, गदा और बाणों से निवारित कर दिया। (४५)

माधव ने अपने अस्त्रों को विनष्ट हुआ देखकर गदा फेंकी। किंतु (वीरभद्र ने) त्रिशूल से आघात कर उसे भूतल पर गिरा दिया। (४६)

हलायुध ने वीरभद्र की ओर मुशल और लाङ्गल फेंका जिसे गणाधिप ने गदा से निवारित कर दिया। (४७)

गदा के सहित मुशल और हल को निवारित हुआ देख कर गरुडध्वज ने क्रोध से वीरभद्र के ऊपर चक्र फेंका। (४८)

किंतु गणेश्वर ने सैकड़ों सूर्य के सदृश सुदर्शन को आते देख शूल छोड कर चक्र को इस प्रकार निगल

यथा मधुं मीनवपु. सुरेन्द्रः ॥ ४९
चक्रे निगीर्णे गणनाथकेन
क्रोधाविरक्तोऽसितचारुनेत्रः ।
मुरारिरभ्येत्य गणाधिपेन्द्र-
मुत्क्षिप्य वेगाद् भुवि निष्पिपेष ॥ ५०
हरिबाहूरुवेगेन विनिष्पिष्टस्य भूतले ।
सहितं रुधिरोद्गारैर्मुखाच्चक्रं विनिर्गतम् ॥ ५१
ततो निःसृतमालोक्य चक्रं कैटभनाशनः ।
समादाय हृषीकेशो वीरभद्रं मुमोच ह ॥ ५२
हृषीकेशेन मुक्तस्तु वीरभद्रो जटाधरम् ।
गत्वा निवेदयामास वासुदेवात्पराजयम् ॥ ५३
ततो जटाधरो दृष्ट्वा गणेशं शोणिताप्लुतम् ।
निश्वसन्तं यथा नागं क्रोधं चक्रे तदाव्ययः ॥ ५४
ततः क्रोधाभिभूतेन वीरभद्रोऽथ शंभुना ।
पूर्वोद्दिष्टे तदा स्थाने सायुधस्तु निवेशितः ॥ ५५
वीरभद्रमथादिश्य भद्रकालीं च शंकरः ।
विवेश क्रोधताम्राक्षो यज्ञवाटं त्रिशूलभृत् ॥ ५६
ततस्तु देवप्रवरे जटाधरे
त्रिशूलपाणौ त्रिपुरान्तकारिणि ।
दक्षस्य यज्ञं विशति क्षयंकरे
जातो ऋषीणां प्रवरो हि साध्वसः ॥५७

इति श्रीवामनपुराणे चतुर्थोऽध्याय ॥ ४ ॥

लिया जैसे मीनशरीरधारी सुरेन्द्र मधु को निगल गए थे। (४९)

गणनायक द्वारा चक्र निगले जाने पर मुरारि के सुन्दर काले नेत्र क्रोध से अत्यन्त लाल हो गये। वे गणाधिप के निकट गए और उन्हें वेग से उठा लिया तथा पृथ्वी पर पटक कर पीसने लगे। (५०)

हरि की भुजाओं और जाघों के प्रबल वेग से भूतल में पटके गए वीरभद्र के मुख से रुधिरोद्गार के साथ चक्र निकल आया। (५१)

तदनन्तर कैटभनाशन हृषीकेश ने चक्र को निकला देख कर उसे ले लिया और वीरभद्र को छोड दिया। (५२)

हृषीकेश द्वारा मुक्त वीरभद्र जटाधर शंकर के निकट जाकर वासुदेव से हुई अपनी पराजय निवेदित किये। (५३)

तदनन्तर गणेश्वर को शोणिताप्लुत तथा नाग के सदृश निःश्वास लेते देख अव्यय जटाधर ने क्रोध किया। (५४)

तदुपरान्त क्रोधाभिभूत शंकर ने सायुध वीरभद्र को पूर्वोद्दिष्ट स्थान पर निविष्ट कर दिया। (५५)

वीरभद्र तथा भद्रकाली को आदेश देकर क्रोध से रक्तनेत्र वाले त्रिशूलधर शंकर यज्ञमण्डप में प्रविष्ट हुए। (५६)

तदनन्तर त्रिपुरान्तकारी, त्रिशूलपाणि, क्षयकारी, देवश्रेष्ठ जटाधर के दक्ष यज्ञ में प्रवेश करने पर ऋषियों में महान् भय उत्पन्न हुआ। (५७)

श्री वामनपुराण म चतुर्थ अध्याय समाप्त ।।४।।

५

पुलस्त्य उवाच ।

जटाधरं हरिर्दृष्ट्वा क्रोधादारक्तलोचनम् ।
तस्मात् स्थानादपाक्रम्य कुब्जाम्रेऽन्तर्हितः स्थितः ॥ १
वसवोऽष्टौ हरं दृष्ट्वा सुस्रुवुर्वेगतो मुने ।
सा तु जाता सरिच्छ्रेष्ठा सीता नाम सरस्वती ॥ २
एकादश तथा रुद्रास्त्रिनेत्रा वृषकेतनाः ।
कान्दिशीका लयं जग्मुः समभ्येत्यैव शंकरम् ॥ ३
विश्वेऽश्विनौ च साध्याश्च मरुतोऽनलभास्कराः ।
समासाद्य पुरोडाशं भक्षयन्तो महामुने ॥ ४
चन्द्रः सममृक्षगणैर्निशां समुपदर्शयन् ।
उत्पत्यारुह्य गगनं स्वमधिष्ठानमाश्रितः ॥ ५
कश्यपाद्याश्च ऋषयो जपन्तः शतरुद्रियम् ।
पुष्पाञ्जलिपुटा भूत्वा प्रणताः संस्थिता मुने ॥ ६
असकृद् दक्षदयिता दृष्ट्वा रुद्रं बलाधिकम् ।
शक्रादीनां सुरेशानां कृपणं विललाप ह ॥ ७
ततः क्रोधाभिभूतेन शंकरेण महात्मना ।
तलप्रहारैरमरा बहवो विनिपातिताः ॥ ८
पादप्रहारैरपरे त्रिशूलेनापरे मुने ।
दृष्ट्यग्निना तथैवान्ये देवाद्याः प्रलयीकृताः ॥ ९
ततः पूषा हरं वीक्ष्य विनिघ्नन्तं सुरासुरान् ।
क्रोधाद् बाहू प्रसार्याथ प्रदुद्राव महेश्वरम् ॥ १०
तमापतन्तं भगवान् संनिरीक्ष्य त्रिलोचनः ।
बाहुभ्यां प्रतिजग्राह करेणैकेन शंकरः ॥ ११
कराभ्यां प्रगृहीतस्य शंभुनांशुमतोऽपि हि ।
कराङ्गुलिभ्यो निश्चेरुरसृग्धाराः समन्ततः ॥ १२
ततो वेगेन महता अंशुमन्तं दिवाकरम् ।
भ्रामयामास सततं सिंहो मृगशिशुं यथा ॥ १३
भ्रामितस्यातिवेगेन नारदांशुमतोऽपि हि ।

५

क्रोध से आरक्त नेत्रवाले जटाधर को देखकर हरि उस स्थान से हट कर कुब्जाम्र में छिप कर बैठ गये। (१)

हे मुने! हर को देखकर आठ वसु वेग से बह (पिघल) गये। इससे सीता नामकी श्रेष्ठ नदी उत्पन्न हुई। (२)

तथा वृषकेतन त्रिनेत्रधारी एकादश रुद्र भय से भागते हुए शंकर के निकट जाकर उनमें लीन हो गये। (३)

हे महामुने! विश्वेदेवगण, अश्विनीकुमार, साध्यवृन्द, वायु, अग्नि एवं सूर्य शंकर को निकट पाकर पुरोडाश खाते हुए भाग गये। (४)

तारागण के साथ चन्द्रमा रात्रि को प्रकट करते हुए आकाश में ऊपर जाकर अपने स्थान पर स्थित हो गये। (५)

हे मुने! कश्यप आदि ऋषि शतरुद्रिय (मन्त्र) का जप करते हुए अञ्जलि में पुष्प लेकर विनम्र भाव से खड़े हो गये। (६)

इन्द्रादिक देवताओं में रुद्र को सर्वाधिक बली देख कर दक्ष की पत्नी अत्यन्त दीनतापूर्वक बार-बार विलाप करने लगी। (७)

तदनन्तर क्रोधाभिभूत महात्मा शंकर ने (हाथ के) तलवे के प्रहार से अनेक देवताओं को मार डाला। (८)

हे मुने! इसी प्रकार कुछ देवादिकों को पद प्रहार से कुछ को त्रिशूल से कुछ को नेत्राग्नि द्वारा नष्ट कर दिया। (९)

तदनन्तर सुरों एवं असुरों का संहार करते हुए शंकर को देखकर पूषा-सूर्य क्रोधपूर्वक दोनों भुजाएँ प्रसारित कर महेश्वर की ओर दौड़े। (१०)

भगवान् त्रिलोचन शंकर ने उन्हें आते देख एक ही हाथ से उनकी दोनों भुजाओं को पकड़ लिया। (११)

शंभु द्वारा सूर्य के प्रगृहीत दोनों हाथों की अङ्गुलियों से चतुर्दिक् रुधिर की धारा प्रवाहित होने लगी। (१२)

तदनन्तर वे अंशुमान् दिवाकर को अत्यन्त वेग से निरन्तर इस प्रकार घुमाने लगे जैसे सिंह मृगशावक को घुमाता है। (१३)

हे नारद! अत्यन्त वेग से घुमाये गए सूर्य की भुजाओं

भुजौ ह्रस्वत्वमापन्नौ त्रुटितस्नायुबन्धनौ ॥ १४
रुधिराप्लुतसर्वाङ्गमंशुमन्तं महेश्वरः ।
संनिरीक्ष्योत्ससर्जैनमन्यतोऽभिजगाम ह ॥ १५
ततस्तु पूषा विहसन् दशनानि विदर्शयन् ।
प्रोवाचैह्येहि कापालिन् पुनः पुनरथेश्वरम् ॥ १६
ततः क्रोधाभिभूतेन पूष्णो वेगेन शंभुना ।
मुष्टिनाहत्य दशनाः पातिता धरणीतले ॥ १७
भग्नदन्तस्तथा पूषा शोणिताभिप्लुताननः ।
पपात भुवि निःसंज्ञो वज्राहत इवाचलः ॥ १८
भगोऽभिवीक्ष्य पूषाणं पतितं रुधिरोक्षितम् ।
नेत्राभ्यां घोररूपाभ्यां वृषध्वजमवैक्षत ॥ १९
त्रिपुरघ्नस्ततः क्रुद्धस्तलेनाहत्य चक्षुषी ।
निपातयामास भुवि क्षोभयन्सर्वदेवताः ॥ २०
ततो दिवाकराः सर्वे पुरस्कृत्य शतक्रतुम् ।
मरुद्भिश्च हुताशैश्च भयाज्जग्मुर्दिशो दश ॥ २१
प्रतियातेषु देवेषु प्रह्लादाद्या दितीश्वराः ।
नमस्कृत्य ततः सर्वे तस्थुः प्राञ्जलयो मुने ॥ २२
ततस्तं यज्ञवाटं तु शंकरो घोरचक्षुषा ।
ददर्श दग्धुं कोपेन सर्वांश्चैव सुरासुरान् ॥ २३
ततो निलिल्यिरे वीराः प्रणेमुर्दुद्रुवुस्तथा ।
भयादन्ये हरं दृष्ट्वा गता वैवस्वतक्षयम् ॥ २४
त्रयोऽग्नयस्त्रिभिर्नेत्रैर्दुःसहं समवैक्षत ।
दृष्टमात्रास्त्रिनेत्रेण भस्मीभूताभवन् क्षणात् ॥ २५
अग्नौ प्रणष्टे यज्ञोऽपि भूत्वा दिव्यवपुर्मृगः ।
दुद्राव विक्लवगतिर्दक्षिणासहितोऽम्बरे ॥ २६
तमेवानुससारेशश्चापमानम्य वेगवान् ।
शरं पाशुपतं कृत्वा कालरूपी महेश्वरः ॥ २७
अर्द्धेन यज्ञवाटान्ते जटाधर इति श्रुतः ।
अर्द्धेन गगने शर्वः कालरूपी च कथ्यते ॥ २८

नारद उवाच ।

कालरूपी त्वयाख्यातः शंभुर्गगनगोचरः ।
लक्षणं च स्वरूपं च सर्वं व्याख्यातुमर्हसि ॥ २९

पुलस्त्य उवाच ।

स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः ।

के स्नायुबन्ध टूट गए एवं वे छोटी हो गईं । (१४)

दिवाकर को सर्वाङ्ग में रुधिराप्लुत हुआ देख उन्हें छोड़ कर महेश्वर अन्यत्र चले गए । (१५)

तदनन्तर हँसते एवं दाँत दिखलाते हुए पूषा बारंबार कहने लगे, "हे कपाली ! आओ आओ ।" (१६)

तदुपरान्त क्रोधाभिभूत शम्भु ने वेगपूर्वक मुक्के से मारकर पूषा के दाँतों को धरती पर गिरा दिया । (१७)

इस प्रकार भग्नदन्त एवं रुधिराप्लुतमुख पूषा वज्र से मारे गये पर्वत के सदृश निःसंज्ञ होकर पृथ्वी पर गिर पड़े । (१८)

गिरे हुए रुधिराप्लुत पूषा को देख कर भग भयङ्कर नेत्रों से वृषध्वज को देखने लगे । (१९)

तदनन्तर क्रुद्ध त्रिपुरहन्ता ने सभी देवताओं को क्षुब्ध करते हुए करतल के प्रहार से (भग) के दोनों नेत्रों को पृथ्वी पर गिरा दिया । (२०)

तत्पश्चात् आदित्यगण, इन्द्र को आगे कर, मरुद्गणों तथा अग्नियों के साथ भय से दशों दिशाओं में भाग गये । (२१)

हे मुने ! देवताओं के चले जाने पर प्रह्लाद आदि दैत्य महेश्वर को प्रणाम कर अञ्जलि बाँध कर खड़े हो गए । (२२)

तदनन्तर शंकर उस यज्ञमडप को तथा सभी देवासुरों को दग्ध करने के लिये क्रोधपूर्ण घोर दृष्टि से देखने लगे । (२३)

तत्पश्चात् महादेव को देखकर कुछ वीर भय से छिप गए, कई प्रणाम करने लगे, कुछ भाग गये और कोई-कोई यमपुरी पहुँच गये । (२४)

तदनन्तर महेश्वर ने तीन नेत्रों से तीनों अग्नियों को देखा, उनके देखते ही तीनों अग्नियाँ क्षणभर में भस्मीभूत हो गयीं । (२५)

अग्नि के नष्ट होने पर यज्ञ भी दिव्य शरीर वाला मृग होकर दक्षिणा के साथ आकाश में व्यग्रगति से भाग गया । (२६)

कालरूपी वेगवान् महेश्वर धनुष को झुका कर उसमें पाशुपत शर संयुक्त कर उसी के पीछे दौड़े । (२७)

यज्ञशाला में अर्द्धांश से स्थित शंकर जी 'जटाधर' नाम से प्रसिद्ध हुए एवं आकाश में अर्द्धांश से स्थित उनको 'कालरूपी' कहा जाता है । (२८)

नारद ने कहा—"आपने आकाशचारी शंकर को

येनाम्बरं मुनिश्रेष्ठ व्याप्तं लोकहितेप्सुना ॥ ३०
यत्राश्विनी च भरणी कृत्तिकायास्तथांशकः ।
मेषो राशिः कुजक्षेत्रं तच्छिरः कालरूपिणः ॥ ३१
आग्नेयांशास्त्रयो ब्रह्मन् प्राजापत्यं कवेर्गृहम् ।
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्तितम् ॥ ३२
मृगार्द्धमार्द्रादित्यांशास्त्रयः सौम्यगृहं त्विदम् ।
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ॥ ३३
आदित्यांशश्च पुष्यं च आश्लेषा शशिनो गृहम् ।
राशिः कर्कटको नाम पार्श्वे मखविनाशिनः ॥ ३४
पित्र्यर्क्षं भगदैवत्यमुत्तरांशश्च केसरी ।
सूर्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिगीयते ॥ ३५
उत्तरांशास्त्रयः पाणिश्चित्रार्धं कन्यका त्वियम् ।
सोमपुत्रस्य सद्मैतद् द्वितीयं जठरं विभोः ॥ ३६
चित्रांशद्वितयं स्वातिर्विशाखायांशकत्रयम् ।
द्वितीयं शुक्रसदनं तुला नाभिरुदाहृता ॥ ३७
विशाखांशमनूराधा ज्येष्ठा भौमगृहं त्विदम् ।
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ॥ ३८
मूलं पूर्वोत्तरांशश्च देवाचार्यगृहं धनुः ।
ऊरुयुगलमीशस्य अमरर्षे प्रगीयते ॥ ३९
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मुने ।
धनिष्ठार्धं शनिक्षेत्रं जानुनी परमेष्ठिनः ॥ ४०
धनिष्ठार्धं शतभिषा प्रौष्ठपद्यांशकत्रयम् ।
सौरेः सद्मापरमिदं कुम्भो जङ्घे च विश्रुते ॥ ४१
प्रौष्ठपद्यांशमेकं तु उत्तरा रेवती तथा ।
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥ ४२

एवं कृत्वा कालरूपं त्रिनेत्रो
यज्ञं क्रोधान्मार्गणैराजघान ।
विद्धश्चासौ वेदनाबुद्धिमुक्तः

कालरूपी कहा है। आप उनके सम्पूर्ण स्वरूप और लक्षण की व्याख्या करें।" (२९)

पुलस्त्य ने कहा—हे मुनिश्रेष्ठ, मैं त्रिपुरनाशक कालरूपी उन शंकर के स्वरूप को बतलाता हूँ जिन्होंने लोकहित की कामना से आकाश को व्याप्त किया। (३०)

पूरी अश्विनी तथा भरणी एवं कृत्तिका के एक पाद से युक्त, मंगल का क्षेत्र मेष राशि कालरूपी महादेव का शिर है। (३१)

हे ब्रह्मन्! कृत्तिका के तीन अंश, पूरी रोहिणी एवं मृगशिरा के दो पूर्व पादों वाला, शुक्र का क्षेत्र वृष राशि उनका मुख है। (३२)

मृगशिरा के शेष दो पाद, पूरी आर्द्रा और पुनर्वसु के तीन पाद वाला बुध का क्षेत्र मिथुन राशि गगनस्थ शूली की दो भुजाएँ हैं। (३३)

पुनर्वसु का एक पाद पूरा पुष्य और अश्लेषा नक्षत्रों वाला चन्द्रमा का क्षेत्र कर्कट राशि यज्ञविनाशक शंकर के दो पार्श्व हैं। (३४)

हे ब्रह्मन्! पूरी मघा, पूरी पूर्वा फाल्गुनी और उत्तरा फाल्गुनी के एक पाद वाला, सूर्य का क्षेत्र सिंहराशि शंकर का हृदय कहा जाता है। (३५)

उत्तराफाल्गुनी के तीन पाद, पूरा हस्त एवं चित्रा के दो पूर्व पादों वाला, बुध का द्वितीय क्षेत्र कन्या राशि शंकर का जठर है। (३६)

चित्रा के शेष दो पाद, पूरी स्वाति एवं विशाखा के तीन पादों वाला, शुक्र का दूसरा क्षेत्र तुला राशि महादेव की नाभि कहलाता है। (३७)

विशाखा के एक पाद, अनुराधा और ज्येष्ठा नक्षत्रों वाला, मंगल का द्वितीय क्षेत्र वृश्चिक राशि कालरूपी महादेव का लिंग है। (३८)

पूरा मूल, पूरा पूर्वाषाढा और उत्तराषाढा के एक पाद वाला बृहस्पति का क्षेत्र धनुराशि महेश्वर का ऊरुयुगल है। (३९)

हे मुने! उत्तराषाढा के शेष तीन पाद, पूरा श्रवण और धनिष्ठा के दो पूर्व पाद वाला, शनि का क्षेत्र मकर राशि परमेष्ठी महेश्वर के दो जानु हैं। (४०)

धनिष्ठा के अपरार्ध पूरी शतभिषा, पूर्व भाद्रपद के तीन पादवाला शनि का द्वितीय गृह कुम्भ राशि उनकी दो जंघाएँ हैं। (४१)

पूर्वभाद्रपद का एक पाद, पूरा उत्तरभाद्रपद और रेवती नक्षत्रों वाला, बृहस्पति का द्वितीय गृह मीन राशि उनके दो चरण हैं। (४२)

इस प्रकार त्रिनेत्र ने कालरूप धारण कर क्रोधपूर्वक यज्ञ को बाणों से मारा। तदनन्तर बाणविद्ध वेदनानुभूतिरहित

खे संतस्थौ तारकाभिश्चिताङ्गः ॥ ४३

नारद उवाच ।

राशयो गदिता ब्रह्मंस्त्वया द्वादश वै मम ।
तेषां विशेषतो ब्रूहि लक्षणानि स्वरूपतः ॥ ४४

पुलस्त्य उवाच ।

स्वरूपं तव वक्ष्यामि राशीनां शृणु नारद ।
यादृशा यत्र संचारा यस्मिन् स्थाने वसन्ति च ॥ ४५
मेषः समानमूर्तिश्च अजाविकधनादिषु ।
संचारस्थानमेवास्य धान्यरत्नाकरादिषु ॥ ४६
नवशाद्वलसंछन्नवसुधायां च सर्वशः ।
नित्यं चरति फुल्लेषु सरसां पुलिनेषु च ॥ ४७
वृषः सदृशरूपो हि चरते गोकुलादिषु ।
तस्याधिवासभूमिस्तु कृषीवलधराश्रयः ॥ ४८
स्त्रीपुंसयोः समं रूपं शय्यासनपरिग्रहः ।
वीणावाद्यधृङ् मिथुनं गीतनर्तकशिल्पिषु ॥ ४९
स्थितः क्रीडारतिर्नित्यं विहारावनिरस्य तु ।
मिथुनं नाम विख्यातं राशिर्द्वैधात्मकः स्थितः ॥ ५०
कर्किः कुलीरेण समः सलिलस्थः प्रकीर्तितः ।
केदारवापीपुलिने विविक्तावनिरेव च ॥ ५१
सिंहस्तु पर्वतारण्यदुर्गकन्दरभूमिषु ।
वसते व्याधपल्लीषु गह्वरेषु गुहासु च ॥ ५२
व्रीहिप्रदीपिककरा नावारूढा च कन्यका ।
चरते स्त्रीरतिस्थाने वसते नड्वलेषु च ॥ ५३
तुलापाणिश्च पुरुषो वीथ्यापणविचारकः ।
नगराध्वानशालासु वसते तत्र नारद ॥ ५४
श्वभ्रवल्मीकसंचारी वृश्चिको वृश्चिकाकृतिः ।
विषगोमयकीटादिपाषाणादिषु संस्थितः ॥ ५५
धनुस्तुरङ्गजघनो दीप्यमानो धनुर्धरः ।
वाजिशूरास्त्रविद्वीरः स्थायी गजरथादिषु ॥ ५६
मृगास्यो मकरो ब्रह्मन् वृषस्कन्धेक्षणाङ्गजः ।

वह तारिकाओं से आवृत शरीर होकर आकाश में स्थित हो गया। (४३)

नारद ने कहा—हे ब्रह्मन्! आपने मुझ से द्वादश राशियों का कथन किया। अब विशेष रूप से उनके स्वरूप के अनुसार लक्षण का वर्णन करें। (४४)

पुलस्त्य ने कहा—हे नारद! आपको मैं राशियों का स्वरूप बतलाता हूँ, सुनिये। वे जैसे हैं तथा जहाँ सचार और निवास करते हैं वह सभी वर्णन करता हूँ। (४५)

मेषराशि मेष के सदृश मूर्तिवाला है। बकरी, भेड़, धन धान्य एव रत्नाकरादि इसके सञ्चार स्थान हैं। (४६)

तथा नवीन दूर्वा से आच्छन्न समग्र पृथ्वी एव पुष्पित वनस्पतियों से युक्त सरोवर के पुलिनों में यह नित्य सञ्चरण करता है। (४७)

वृष के तुल्य रूपयुक्त वृषराशि गोकुलादि मे विचरण करता है तथा कृषकों की भूमि इसका निवास स्थान है। (४८)

मिथुन राशि स्त्री और पुरुष के समान रूप से युक्त है। शय्या और आसन इसके आश्रय हैं। अपने हाथों में इसने वीणा एव वाद्य धारण कर रक्खे हैं। गायकों, नर्तकों एव शिल्पियों मे यह सञ्चरण करता है। (४९)

इस द्वैधात्मक राशि को मिथुन कहते हैं। यह राशि क्रीडा प्रेमी एवं विहारभूमियों में निवास करने वाला है। (५०)

कर्कट राशि केकड़े के सदृश रूपयुक्त एवं जल में रहने वाला कहा जाता है। जल से पूर्ण क्यारी एव पुलिन (नदी-तीर) तथा एकान्त भूमि इसके सञ्चार के स्थान हैं। (५१)

सिंह राशि पर्वत, अरण्य, दुर्गमस्थान, कन्दरा, व्याधों (आखेटकों) के स्थान, गह्वर एवं गुफाओं में निवास करता है। (५२)

कन्या राशि व्रीहि एव दीपक हाथ में लिये हुए है तथा नौमारूढ है, वह स्त्रियों के रतिस्थान और सरपतों मे विचरण करता है। (५३)

हे नारद! तुला राशि हाथ मे तुला लिये हुए पुरुष के रूप में गलियों और बाजारों मे विचरण करता है तथा नगरों, मार्गों एव भवनों में निवास करता है। (५४)

वृश्चिक के आकार की वृश्चिक राशि, गड्ढे एव वल्मीक (दीमकों की बाँबी) मे विचरण करता है। विष, गोबर, कीट एवं पाषाण आदि इसके निवास स्थान हैं। (५५)

धनुष राशि की जघा अश्व के सदृश है। यह प्रकाशमान तथा धनुषधारी है। यह घुड़सवारी, शूरकर्म एव अस्त्र का ज्ञाता तथा वीर है। गज एव रथ आदि में उसका स्थान है। (५६)

हे ब्रह्मन्! मकर राशि का मुख मृग के सदृश, एव

मकरोऽमौ नदीचारी वसते च महोदधौ ॥ ५७
रिक्तकुम्भश्च पुरुषः स्कन्धधारी जलाप्लुतः ।
द्यूतशालाचरः कुम्भः स्थायी शौण्डिकसद्मसु ॥ ५८
मीनद्वयमथासक्तं मीनस्तीर्थाब्धिसंचरः ।
वसते पुण्यदेशेषु देवब्राह्मणसद्मसु ॥ ५९
लक्षणा गदितास्तुभ्यं मेषादीनां महामुने ।
न कस्यचित् त्वयाख्येयं गुह्यमेतत्पुरातनम् ॥ ६०
एतन् मया ते कथितं सुरर्षे
यथा त्रिनेत्रः प्रममाथ यज्ञम् ।
पुण्यं पुराणं परमं पवित्र-
माख्यातवान्पापहरं शिवं च ॥ ६१

इति श्रीवामनपुराणे पञ्चमोऽध्यायः ॥५॥

६

पुलस्त्य उवाच ।
हृद्गो ब्रह्मणो योऽसौ धर्मो दिव्यवपुर्मुने ।
दाक्षायणी तस्य भार्या तस्यामजनयत्सुतान् ॥ १
हरिं कृष्णं च देवर्षे नारायणनरौ तथा ।
योगाभ्यासरतौ नित्यं हरिकृष्णौ बभूवतुः ॥ २
नरनारायणौ चैव जगतो हितकाम्यया ।
तप्येतां च तपः सौम्यौ पुराणावृषिसत्तमौ ॥ ३
प्रालेयाद्रिं समागम्य तीर्थे बदरिकाश्रमे ।
गृणन्तौ तत्परं ब्रह्म गङ्गाया विपुले तटे ॥ ४
नरनारायणाभ्यां च जगदेतच्चराचरम् ।
तापितं तपसा ब्रह्मन् शक्रः क्षोभं तदा ययौ ॥ ५
संक्षुब्धस्तपसा ताभ्यां क्षोभणाय शतक्रतुः ।
रम्भाद्याप्सरसः श्रेष्ठाः प्रेषयत्स महाश्रमम् ॥ ६
कन्दर्पश्च सुदुर्धर्षश्चूताङ्कुरमहायुधः ।
समं सहचरेणैव वसन्तेनाश्रमं गतः ॥ ७
ततो माधवकन्दर्पौ ताश्चैवाप्सरसो वराः ।

स्कन्धधूप के तुल्य तथा नेत्र गज तुल्य हैं। यह राशि नदी में विचरण करती तथा समुद्र में रहती है। (५७)

कुम्भ राशि रिक्त कुम्भ को स्कंध पर धारण करने वाले जलाप्लुत पुरुष के आकार से युक्त है। इसका सचार स्थानद्यूतशाला एवं निवास स्थान मद्यशाला है। (५८)

मीनराशि दो परस्पर सयुक्त मछलियों के आकार से युक्त है। तीर्थस्थान एवं समुद्र इसके सचार-स्थान हैं। यह पवित्र देशों एवं देव मन्दिरों तथा ब्राह्मणों के घरों में निवास करता है। (५९)

हे महामुने! मैंने आपको मेषादि राशियों का लक्षण बतलाया। आप इस पुरातन रहस्य को किसी से न कहिये। (६०)

हे देवर्षे! त्रिलोचन ने जिस प्रकार यज्ञ को प्रमथित किया उसका वर्णन मैंने आपसे कर दिया। इस प्रकार मैंने आपको श्रेयस्कर, पुरातन, परम पवित्र, पापहारी एवं कल्याण प्रद आख्यान सुनाया। (६१)

श्रीवामनपुराण में पञ्चम अध्याय समाप्त ॥५॥

६

पुलस्त्य ने कहा—हे मुने, ब्रह्म के हृदय से उत्पन्न दिव्यदेहधारी जो धर्म था उसने दाक्षायणी नाम की अपनी भार्या से हरि, कृष्ण, नर और नारायण नामक पुत्रों को उत्पन्न किया। हे देवर्षे! हरि और कृष्ण दोनों नित्य योगाभ्यास में निरत हो गए। तथा पुरातन और ऋषियों में श्रेष्ठ शान्तमना नर और नारायण ससार के कल्याण की कामना से हिमालय पर्वत पर जाकर बदरिकाश्रम तीर्थ में गंगा के प्रशस्त तट पर उस परं ब्रह्म का जप करते हुए तपस्या करने लगे। (१-४)

हे ब्रह्मन्, नर-नारायण की तपस्या से यह चराचर जगत् तप्त हो गया। तब इन्द्र व्याकुल हो गए। (५)

उन दोनों की तपस्या से अत्यन्त क्षुब्ध इन्द्र ने उन्हें क्षुब्ध करने के लिये रम्भा आदि श्रेष्ठ अप्सराओं को महान् आश्रम में भेजा। (६)

आम्र के अकुर रूप महान् आयुधवाला अत्यन्त दुर्धर्ष कन्दर्प भी अपने सहचर वसन्त के साथ आश्रम में गया। (७)

तदनन्तर वसन्त, कन्दर्प तथा वे श्रेष्ठ अप्सराएँ बदरिका

बदर्याश्रममागम्य निचिक्रीडुर्यथेच्छया ॥ ८
ततो वसन्ते संप्राप्ते किंशुका ज्वलनप्रभाः ।
निष्पत्राः सततं रेजुः शोभयन्तो धरातलम् ॥ ९
शिशिरं नाम मातङ्गं निदार्य नखरैरिव ।
वसन्तकेसरी प्राप्तः पलाशकुसुमैर्मुने ॥ १०
मया तुषारौघकरी निर्जितः स्वेन तेजसा ।
तमेव हसतेत्युच्चैः वसन्तः कुन्दकुड्मलैः ॥ ११
वनानि कर्णिकाराणां पुष्पितानि विरेजिरे ।
यथा नरेन्द्रपुत्राणि कनकाभरणानि हि ॥ १२
तेषामनु तथा नीपाः किङ्करा इव रेजिरे ।
स्वामिसंलब्धसंमाना भृत्या राजसुतानिव ॥ १३
रक्ताशोकवना भान्ति पुष्पिताः सहसोज्ज्वलाः ।
भृत्या वसन्तनृपतेः संग्रामेऽसृक्प्लुता इव ॥ १४
मृगवृन्दाः पिञ्जरिता राजन्ते गहने वने ।
पुलकाभिवृता यद्वत् सज्जनाः सुहृदागमे ॥ १५
मञ्जरीभिर्विराजन्ते नदीकूलेषु वेतसाः ।
वक्तुकामा इवाङ्गुल्या कोऽस्माकं सदृशो नगः ॥ १६
रक्ताशोककरा तन्वी देवर्षे किंशुकाऽङ्घ्रिका ।
नीलाशोककचा श्यामा विकासिकमलानना ॥ १७
नीलेन्दीवरनेत्रा च ब्रह्मन् बिल्वफलस्तनी ।
प्रफुल्लकुन्ददशना मञ्जरीकरशोभिता ॥ १८
बन्धुजीवाधरा शुभ्रा सिन्दुवारनखाङ्किता ।
पुंस्कोकिलस्वना दिव्या अङ्कोलवसना शुभा ॥ १९
बर्हिवृन्दकलापा च सारसस्वरनूपुरा ।
प्राग्वंशरसना ब्रह्मन् मत्तहंसगतिस्तथा ॥ २०
पुत्रजीवांशुका भृङ्गरोमराजिविराजिता ।
वसन्तलक्ष्मीः संप्राप्ता ब्रह्मन् बदरिकाश्रमे ॥ २१
ततो नारायणो दृष्ट्वा आश्रमस्यानवद्यताम् ।
समीक्ष्य च दिशः सर्वास्ततोऽनङ्गमपश्यत ॥ २२

नारद उवाच ।

कोऽसावनङ्गो ब्रह्मर्षे तस्मिन् बदरिकाश्रमे ।
यं ददर्श जगन्नाथो देवो नारायणोऽव्ययः ॥ २३

श्रम में आकर इच्छानुसार क्रीडा करने लगीं । (८)

तदुपरान्त वसन्त ऋतु के आने पर अग्नि के सदृश कान्तिवाले पत्रहीन पलाशवृक्ष वसुधा की शोभा बढाते हुए निरन्तर सुशोभित हुए । (९)

हे मुने ! वसन्तरूप केसरी पलाश कुसुम रूप नखों से शिशिर रूप मातङ्ग को मानों विदीर्ण कर वहाँ प्रकट हुआ । (१०)

मैंने अपने तेज से तुषार समूह रूपी हस्ती को जीत लिया है इस भाव से वसन्त, कुन्द की कलियों के द्वारा जोर से उसका उपहास करने लगा । (११)

स्वर्णाभरणधारी राजपुत्रों के सदृश पुष्पित कर्णिकारों (अमलतास) के वन सुशोभित होने लगे । (१२)

उनके पीछे कदम्ब वृक्ष इस प्रकार सुशोभित होते थे जैसे राजपुत्रों के पीछे स्वामी से सम्मानित सेवक शोभा पाते हैं । (१३)

रक्त अशोक के वन इस प्रकार सहसा कुसुमित तथा उज्ज्वल हो शोभित हो उठे मानों वसन्त राजा के भृत्य युद्ध में रक्त से परिप्लुत हो रहे हैं । (१४)

गहनवन में पिञ्जरित मृगवृन्द इस प्रकार विराजित होने लगे जैसे सुहृद् के आने से सज्जन पुलकित हो जाते हैं । (१५)

नदी के कूलों पर अपनी मञ्जरियों के द्वारा वेतस इस प्रकार सुशोभित हो रहे थे मानों वे अंगुलियों के द्वारा यह कहना चाहते हैं कि 'हमारे सदृश अन्य कौन वृक्ष है' । (१६)

हे देवर्षे ! हे ब्रह्मन् ! रक्ताशोक रूपी हाथ, पलाश रूपी पद, नीलाशोक रूपी केश-कलाप, विकसित कमलरूपी मुख, नील कमल रूपी नेत्र, बिल्वफल रूपी स्तन, विकसित कुन्द फूल रूपी दन्त, मञ्जरी रूपी कर बन्धुजीव रूपी अधर, सिन्दुवार रूपी नख, नर कोयल की काकली रूपी स्वर, अकोल रूपी वस्त्र, मयूर समूह रूपी आभरण, सारस के स्वर रूपी नूपुर, प्राग्वंशरूपी करधनी, मत्त हंस रूप गति, पुत्रजीव रूपी अंशुक (वस्त्र) और भ्रमर रूपी रोमावली से विराजित दिव्य, शुभ, तन्वी एवं तरुणी वसन्त लक्ष्मी उस बदरिकाश्रम में प्रकट हुई । (१७–२१)

तदनन्तर नारायण ने आश्रम की पवित्रता देख कर तथा सभी दिशाओं की ओर देखकर अनंग (कामदेव) को देखा । (२२)

नारद ने कहा—"हे ब्रह्मर्षे ! वह अनङ्ग कौन है ? जिसे अव्यय जगन्नाथ नारायण ने बदरिकाश्रम में देखा ।" (२३)

पुलस्त्य उवाच ।

कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते ।
स शंकरेण संदग्धो ह्यनङ्गत्वमुपागतः ॥ २४

नारद उवाच ।

किमर्थं कामदेवोऽसौ देवदेवेन शंभुना ।
दग्धस्तु कारणे कस्मिन्नेतद्व्याख्यातुमर्हसि ॥ २५

पुलस्त्य उवाच ।

यदा दक्षसुता ब्रह्मन् सती याता यमक्षयम् ।
विनाश्य दक्षयज्ञं तं विचचार त्रिलोचनः ॥ २६
ततो वृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः ।
अपत्नीकं तदाऽस्त्रेण उन्मादेनाभ्यताडयत् ॥ २७
ततो हरः शरेणाथ उन्मादेनाशु ताडितः ।
विचचार तदोन्मत्तः काननानि सरांसि च ॥ २८
स्मरन् सतीं महादेवस्तथोन्मादेन ताडितः ।
न शर्म लेभे देवर्षे बाणविद्ध इव द्विपः ॥ २९
ततः पपात देवेशः कालिन्दीसरितं मुने ।
निमग्ने शंकरे आपो दग्धाः कृष्णत्वमागताः ॥ ३०
तदाप्रभृति कालिन्द्या भृङ्गाञ्जननिभं जलम् ।
आस्यन्दत् पुण्यतीर्था सा केशपाशमिवावनेः ॥ ३१
ततो नदीषु पुण्यासु सरस्सु च नदेषु च ।
पुलिनेषु च रम्येषु वापीषु नलिनीषु च ॥ ३२
पर्वतेषु च रम्येषु काननेषु च सानुषु ।
विचरन् स्वेच्छया नैव शर्म लेभे महेश्वरः ॥ ३३
क्षणं गायति देवर्षे क्षणं रोदिति शंकरः ।
क्षणं ध्यायति तन्वङ्गीं दक्षकन्यां मनोरमाम् ॥ ३४
ध्यात्वा क्षणं प्रस्वपिति क्षणं स्वप्नायते हरः ।
स्वप्ने तथेदं गदति तां दृष्ट्वा दक्षकन्यकाम् ॥ ३५
निर्घृणे तिष्ठ किं मूढे त्यजसे मामनिन्दिते ।
मुग्धे त्वया विरहितो दग्धोऽस्मि मदनाग्निना ॥ ३६
सति सत्यं प्रकुपिता मा कोपं कुरु सुन्दरि ।
पादप्रणामावनतमभिभाषितुमर्हसि ॥ ३७
श्रूयसे दृश्यसे नित्यं स्पृश्यसे वन्द्यसे प्रिये ।

पुलस्त्य ने कहा—कन्दर्प हर्ष का पुत्र है। उसे ही काम कहा जाता है। शंकर (के नेत्रानल) द्वारा दग्ध होकर वह अनङ्ग हो गया है। (२४)

नारद ने कहा—"आप यह बतलाएँ कि देवाधिदेव शंकर ने कामदेव को क्यों और किस कारण से भस्म किया। (२५)

पुलस्त्य ने कहा—हे ब्रह्मन्! दक्ष दुहिता सती के प्राण त्याग करने पर त्रिलोचन दक्ष-यज्ञ का ध्वंस कर विचरण करने लगे। (२६)

तदनन्तर वृषध्वज को अपत्नीक देखकर कुसुमायुध कन्दर्प ने उन्हें उन्माद नामक अस्त्र के द्वारा आहत किया। (२७)

तदुपरान्त उन्माद शर से ताड़ित शंकर उन्मत्त होकर वनों और सरोवरों में विचरण करने लगे। (२८)

हे देवर्षे! बाणविद्ध गज के सदृश उन्माद शर से इस प्रकार ताड़ित महादेव सती का स्मरण करते हुए शान्ति नहीं प्राप्त कर सके। (२९)

हे मुने! तदनन्तर देवेश शंकर कालिन्दी नदी में गिर पड़े। शंकर के निमग्न होने पर (नदी का) जल दग्ध होकर काला हो गया। (३०)

उस समय से कालिन्दी नदी का जल भृंग और अंजन के सदृश काला हो गया एवं वह पवित्र तीर्थोंवाली नदी पृथ्वी के केशपाश के सदृश प्रवाहित होने लगी। (३१)

तदनन्तर पवित्र नदियों, सरोवरों, नदों, रमणीय नदी-तटों, वापियों, कमलवनों, पर्वतों, मनोहर काननों तथा पर्वत शृङ्गों पर स्वेच्छ पूर्वक विचरण करते हुए महेश्वर कहीं भी शान्ति नहीं प्राप्त कर सके। (३२-३३)

हे देवर्षे! शंकर कभी गाते, कभी रोते और कभी कृशाङ्गी मनोरमा दक्षकन्या का ध्यान करते थे। (३४)

ध्यान करके कभी सोते और कभी स्वप्न देखने लगते थे, स्वप्नकाल में दक्ष की उस कन्या को देखकर वह इस प्रकार कहते थे (३५)

हे निर्दये! रुको, हे मूढे! मुझे क्यों छोड़ रही हो? हे अनिन्दिते! हे मुग्धे! तुम्हारे विरह में मैं कामाग्नि के द्वारा दग्ध हो रहा हूँ। (३६)

हे सति! क्या तुम वस्तुतः क्रुद्ध हो? हे सुन्दरि! क्रोध मत करो। मैं तुम्हारे चरणों में अवनत होकर प्रणाम करता हूँ। मेरे साथ तुम्हें सम्भाषण करना चाहिये। (३७)

"हे प्रिये! मैं सतत तुम्हारी बात सुनता हूँ, तुम्हें देखता हूँ, तुम्हारा स्पर्श करता हूँ, तुम्हारी वन्दना करता हूँ

आलिङ्गयसे च सततं किमर्थं नाभिभाषसे ॥ ३८
विलपन्तं जनं दृष्ट्वा कृपा कस्य न जायते ।
विशेषतः पतिं बाले ननु त्वमतिनिर्घृणा ॥ ३९
त्वयोक्तानि वचांस्येवं पूर्वं मम कृशोदरि ।
विना त्वया न जीवेयं तदसत्यं त्वया कृतम् ॥ ४०
एह्येहि कामसंतप्तं परिष्वज सुलोचने ।
नान्यथा नश्यते तापः सत्येनापि शपे प्रिये ॥ ४१
इत्थं विलप्य स्वप्नान्ते प्रतिबुद्धस्तु तत्क्षणात् ।
उत्कूजति तथाऽरण्ये मुक्तकण्ठं पुनः पुनः ॥ ४२

तं कूजमानं विलपन्तमारात्
समीक्ष्य कामो वृषकेतनं हि ।
विव्याध चापं तरसा विनाम्य
संतापनाम्ना तु शरेण भूयः ॥ ४३
संतापनास्त्रेण तदा स विद्धो
भूयः स संतप्ततरो बभूव ।
संतापयंश्चापि जगत्समग्रं
फूत्कृत्य फूत्कृत्य विवासते स्म ॥ ४४
तं चापि भूयो मदनो जघान
विजृम्भणास्त्रेण ततो विजृम्भे ।
ततो भृशं कामशरैर्वितुन्नो
विजृम्भमाणः परितो भ्रमंश्च ॥ ४५
ददर्श यक्षाधिपतेस्तनूजं
पाञ्चालिकं नाम जगत्प्रधानम् ।
दृष्ट्वा त्रिनेत्रो धनदस्य पुत्रं
पार्श्वं समभ्येत्य वचो बभाषे ।
भ्रातृव्य वक्ष्यामि वचो यदद्य
तत् त्वं कुरुष्वामितविक्रमोऽसि ॥ ४६

पाञ्चालिक उवाच ।

यन्नाथ मां वक्ष्यसि तत्करिष्ये
सुदुष्करं यद्यपि देवसंघैः ।
आज्ञापयस्वातुलवीर्य शंभो
दासोऽस्मि ते भक्तियुतस्तथेश ॥ ४७

ईश्वर उवाच ।

नाशं गतायां वरदाम्बिकायां
कामाग्निना प्लुष्टसुविग्रहोऽस्मि ।

तथा तुम्हें आलिङ्गित करता हूँ। तुम क्यों बात नहीं कर रही हो ?" (३८)

"हे बाले ! विलाप करने वाले व्यक्ति को देखकर किसे दया नहीं उत्पन्न होती ? विशेषत अपने पति को विलाप करता देखकर किसे दया नहीं आती ? निश्चय ही तुम अति निर्दयी हो। (३९)

हे कृशोदरि ! तुमने पहले मुझसे कहा था कि तुम्हारे बिना मैं जीवित नहीं रहूँगी। इसे तुमने असत्य कर दिया। (४०)

"हे सुलोचने ! आओ आओ। कामसन्तप्त मुझ आलिङ्गित करो। हे प्रिये ! मैं सत्य की शपथ खाकर कहता हूँ कि अन्य किसी प्रकार मेरा ताप नहीं शान्त होगा।' (४१)

इस प्रकार विलाप कर वे स्वप्न के अंत में तत्क्षण उठ कर अरण्य में मुक्त कण्ठ से रोने लगे। (४२)

मुक्तकण्ठ से विलाप करते हुए वृषकेतन को दूर से देख काम ने वेगपूर्वक धनुष झुका कर पुनः उन्हें सन्ताप नामक बाण से आविद्ध किया। (४३)

तब सन्तापनास्त्र से विद्ध होकर वे और भी अधिक सन्तप्त हो गये एवं मुख से बारम्बार फूत्कार कर समस्त जगत् को सन्तप्त करते हुये समय व्यतीत करने लगे। (४४)

तदनन्तर मदन ने उन्हें पुनः विजृम्भण नामक अस्त्र से आहत किया जिससे उन्हें जम्हाई आने लगी। तदुपरान्त काम के बाणों से अत्यन्त पीड़ित होकर विजृम्भण करते हुए तथा चतुर्दिक् परिभ्रमण करते हुए उन्होंने यक्षाधिपति के जगत् में प्रधान पाञ्चालिक नामक पुत्र को देखा। धनद के पुत्र को देख उसके पास जाकर त्रिनेत्र ने यह वचन कहा—हे भ्रातृव्य ! तुम अमित विक्रमशाली हो, मैं जो आज बात कहता हूँ उसे तुम करो। (४५-४६)

पाञ्चालिक ने कहा—"हे नाथ ! आप जो कहेंगे देवताओं द्वारा सुदुष्कर होने पर भी उसे मैं करूँगा। हे अतुलशक्तिशाली शंभो ! आदेश दीजिये। हे ईश ! मैं आपका भक्तियुक्त दास हूँ।" (४७)

महेश्वर ने कहा—वरदायिनी अम्बिका के विनष्ट होने पर मेरा सुन्दर शरीर कामाग्नि से अत्यन्त दग्ध हो रहा है।

विजृम्भणोन्मादशरैर्विभिन्नो
धृतिं न विन्दामि रतिं सुखं वा ॥ ४८
विजृम्भणं पुत्र तथैव ताप-
मुन्मादमुग्रं मदनप्रणुन्नम् ।
नान्यः पुमान् धारयितुं हि शक्तो
मुक्त्वा भवन्त हि ततः प्रतीच्छ ॥ ४९
पुलस्त्य उवाच ।
इत्येवमुक्तो वृषभध्वजेन
यक्षः प्रतीच्छत् स विजृम्भणादीन् ।
तोषं जगामाशु ततस्त्रिशूली
तुष्टस्तदैवं वचनं बभाषे ॥ ५०
हर उवाच ।
यस्मात्त्वया पुत्र सुदुर्धराणि
विजृम्भणादीनि प्रतीच्छितानि ।
तस्माद्वरं त्वां प्रतिपूजनाय
दास्यामि लोकस्य च हास्यकारि ॥ ५१
यस्त्वां यदा पश्यति चैत्रमासे
स्पृशेन्नरो वार्चयते च भक्त्या ।
वृद्धोऽथ बालोऽथ युवाथ योषित्
सर्वे तदोन्मादधरा भवन्ति ॥ ५२
गायन्ति नृत्यन्ति रमन्ति यक्ष
वाद्यानि यत्नादपि वादयन्ति ।
तवाग्रतो हास्यवचोऽभिरक्ता
भवन्ति ते योगयुतास्तु ते स्युः ॥ ५३
ममैव नाम्ना भविताऽसि पूज्यः
पाञ्चालिकेशः प्रथितः पृथिव्याम् ।
मम प्रसादाद् वरदो नराणां
भविष्यसे पूज्यतमोऽभिगच्छ ॥ ५४
इत्येवमुक्तो विभुना स यक्षो
जगाम देशान् सहसैव सर्वान् ।
कालञ्जरस्योत्तरतः सुपुण्यो
देशो हिमाद्रेरपि दक्षिणस्थः ॥ ५५
तस्मिन् सुपुण्ये विषये निविष्टो
रुद्रप्रसादादभिपूज्यतेऽसौ ।
तस्मिन् प्रयाते भगवांस्त्रिनेत्रो
देवोऽपि विन्ध्यं गिरिमभ्यगच्छत् ॥ ५६
तत्रापि मदनो गत्वा ददर्श वृषकेतनम् ।
दृष्ट्वा प्रहर्त्तुकामं च ततः प्राद्रवदीश्वरः ॥ ५७

विजृम्भण और उन्माद शरों से विद्ध होने से मुझे धैर्य, रति या सुख नहीं प्राप्त हो रहा है। (४८)

"हे पुत्र! तुम्हारे अतिरिक्त अन्य कोई पुरुष, कामदेव से प्रेरित विजृम्भण, सतापन और उन्माद नामक उग्र अस्त्र धारण करने में समर्थ नहीं है। अतः तुम इन्हें ग्रहण करो।" (४९)

पुलस्त्य ने कहा—वृषभध्वज के ऐसा कहने पर उस यक्ष ने विजृम्भण आदि सभी अस्त्रों को ग्रहण कर लिया। इस से त्रिशूली को तत्काल सतोष प्राप्त हो गया और सन्तुष्ट होकर उन्होंने उससे इस प्रकार वचन कहा— (५०)

महादेव ने कहा—हे पुत्र! क्योंकि तुमने अति भयङ्कर विजृम्भण आदि अस्त्रों को ग्रहण कर लिया अतः प्रतिपूजार्थ मैं तुम्हें सब लोगों के लिये आनन्ददायक वर दूँगा। (५१)

चैत्र मास में जो वृद्ध, बालक, युवक या स्त्री तुम्हारा स्पर्श या भक्ति पूर्वक पूजन करेंगे वे सभी तत्क्षण उन्माद-ग्रस्त हो जायेंगे। (५२)

हे यक्ष! वे गायेंगे, नाचेंगे, आनन्दित होंगे और निपुणता के साथ बाजे बजाएँगे। तुम्हारे सम्मुख हँसी की बात करते हुए भी वे योगयुक्त रहेंगे। (५३)

"मेरे ही नाम से तुम पूज्य होगे। ससार में तुम्हारा पाञ्चालिकेश नाम प्रसिद्ध होगा। मेरे प्रसाद से तुम लोगों के वरदाता और पूज्यतम होगे। जाओ।" (५४)

महेश्वर के ऐसा कहने पर वह यक्ष सहसा सब देशों में गया। कालञ्जर के उत्तर और हिमालय के दक्षिण जो परम पवित्र देश है— (५५)

उस पुण्यभूमि में वह अधिष्ठित हो गया। रुद्र के प्रसाद से वह पूजित हुआ। उसके चले जाने पर भगवान् त्रिनेत्र भी विन्ध्यगिरि पर गए। (५६)

वहाँ भी मदन ने जाकर वृषकेतन को देखा। प्रहार

ततो दारुवनं घोरं मदनाभिसृतो हरः।
विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः॥ ५८
ते चापि ऋषयः सर्वे दृष्ट्वा मूर्ध्ना नताभवन्।
ततस्तान् प्राह भगवान् भिक्षा मे प्रतिदीयताम्॥ ५९
ततस्ते मौनिनस्तस्थुः सर्व एव महर्षयः।
तदाश्रमाणि सर्वाणि परिचक्राम नारद॥ ६०
तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः।
प्रक्षोभमगमन् सर्वा हीनसत्त्वाः समन्ततः॥ ६१
ऋते त्वरुन्धतीमेकामनसूयां च भामिनीम्।
एताभ्यां भर्तृपूजासु तच्चिन्तासु स्थितं मनः। ६२
ततः संक्षुभिताः सर्वा यत्र याति महेश्वरः।
तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः॥ ६३
त्यक्त्वाश्रमाणि शून्यानि स्वानि ता मुनियोषितः।
अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम्॥ ६४
ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने।
क्रोधान्वितास्त्रुवन्सर्वे लिङ्गोऽस्य पततां भुवि॥ ६५
ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयन्।
अन्तर्द्धानं जगामाथ त्रिशूली नीललोहितः॥ ६६
ततः स पतितो लिङ्गो विभिद्य वसुधातलम्।
रसातलं विवेशाशु ब्रह्माण्डं चोर्ध्वतोऽभिनत्॥ ६७
ततश्चचाल पृथिवी गिरयः सरितो नगाः।
पातालभुवनाः सर्वे जङ्गमाजङ्गमैर्वृताः॥ ६८
संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः।
जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम्॥ ६९
तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः।
उवाच देव भुवनाः किमर्थं क्षुभिता विभो॥ ७०
अथोवाच हरिर्ब्रह्मन् शार्वो लिङ्गो महर्षिभिः।
पातितस्तस्य भारार्त्ता संचचाल वसुंधरा॥ ७१
ततस्तदद्भुततमं श्रुत्वा देवः पितामहः।
तत्र गच्छाम देवेश एवमाह पुनः पुनः॥ ७२

की कामनावाले उस (कामदेव) को देख हर भागने लगे। (५७)

तदनन्तर कामदेव के द्वारा पीछा किये जाते हुये महादेव घोर दारुवन में प्रविष्ट हुए जहाँ सपत्नीक ऋषिगण निवास करते थे। (५८)

उन ऋषियों ने भी उन्हें देखकर सिर झुका कर प्रणाम किया। तदनन्तर भगवान् ने उनसे कहा—'मुझे भिक्षा दीजिए।" (५९)

इस पर सभी महर्षि मौन रह गये। हे नारद! तदुपरान्त महादेव समस्त आश्रमों में भ्रमण करने लगे। (६०)

उस समय उन्हें प्रविष्ट हुआ देख अरुन्धती एवं सुन्दरी अनुसूया को छोड़कर, क्योंकि इनका मन पति की पूजा एवं ध्यान में लगा था, भार्गव और आत्रेय की समस्त पत्नियाँ प्रक्षुब्ध एवं सत्त्वहीन हो गईं। (६१ ६२)

तदनन्तर महेश्वर जहाँ जाते वहीं वे संक्षुभित, कामार्त एवं मद से विकल इन्द्रियों वाली सभी स्त्रियाँ भी जाने लगीं। (६३)

अपने आश्रमों को शून्य छोड़ मुनियों की वे स्त्रियाँ इस प्रकार उनका अनुसरण करने लगीं जैसे हथिनियाँ मतवाले कुञ्जर का अनुसरण करती हैं। (६४)

हे मुने! यह देखकर क्रोधान्वित भार्गव एवं आङ्गिरस ऋषियों ने कहा कि इनका लिंग भूमि पर गिर जाय। (६५)

तदनन्तर महादेव का लिंग पृथ्वी को विदीर्ण करता हुआ गिर गया। एवं नीललोहित त्रिशूली वहाँ से अन्तर्धान हो गये। (६६)

तदुपरान्त वह गिरा हुआ लिंग पृथ्वी का भेदन कर शीघ्र रसातल में प्रविष्ट हो गया एवं ऊपर की ओर उसने ब्रह्माण्ड का भेदन कर दिया। (६७)

तत्पश्चात् पृथ्वी, पर्वत, नदियाँ, पादप, तथा चराचर से पूर्ण समस्त पाताल एवं लोक काँप उठे। (६८)

पितामह ब्रह्मा भूर्लोक आदि भुवनों को संक्षुब्ध देख कर माधव को देखने क्षीरसागर पहुँचे। (६९)

वहाँ हृषीकेश को देख भक्तिपूर्वक प्रणाम कर उन्होंने कहा—"हे देव! हे विभो! समस्त भुवन क्यों विक्षुब्ध हो गये हैं?" (७०)

तदनन्तर हरि ने कहा—"हे ब्रह्मन्! महर्षियों ने शम्भु के लिंग को गिरा दिया है उसके भार से आर्त वसुन्धरा विचलित हो रही है।" (७१)

तत्पश्चात् देव पितामह इस अद्भुत बात को सुनकर बारबार कहने लगे—"हे देवेश! वहाँ चलें।" (७२)

ततः पितामहो देवः केशवश्च जगत्पतिः।
आजग्मतुस्तमुद्देशं यत्र लिङ्गं भवस्य तत् ॥ ७३
ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम्।
पातालं प्रविवेशाथ विस्मयान्तरितो विभु. ॥ ७४
ब्रह्मा पद्मविमानेन ऊर्ध्वमाक्रम्य सर्वतः।
नैवान्तमलभद् ब्रह्मन् विस्मितः पुनरागत. ॥ ७५
विष्णुर्गत्वाऽथ पातालान् सप्त लोकपरायणः।
चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने ॥ ७६
विष्णुः पितामहश्चोभो हरलिङ्ग ममेत्य हि।
कृताञ्जलिपुटौ भूत्वा स्तोतुं देवं प्रचक्रतुः ॥ ॥ ७७
हरिब्रह्माणावूचतुः।
नमोऽस्तु ते शूलपाणे नमोऽस्तु वृषभध्वज।
जीमूतवाहन कवे शर्व त्र्यम्बक शंकर ॥ ७८
महेश्वर महेशान सुवर्णाक्ष वृषाकपे।
दक्षयज्ञक्षयकर कालरूप नमोऽस्तु ते ॥ ७९
त्वमादिरस्य जगतस्त्वं मध्य परमेश्वर।
भवानन्तश्च भगवान् सर्वगस्त्व नमोऽस्तु ते ॥ ८०
पुलस्त्य उवाच।
एव संस्तूयमानस्तु तस्मिन् दारुवने हरः।
स्वरूपी ताविदं वाक्यमुवाच वदतां वरः ॥ ८१
हर उवाच।
किमर्थं देवतानाथौ परिभूतक्रमं त्विह।
मां स्तुवाते भृशाम्वस्थं कामतापितविग्रहम् ॥ ८२
देवावूचतुः
भवत. पातितं लिङ्गं यदेतद् भुवि शंकर।
एतत् प्रगृह्यतां भूय अतो देव स्तुवावहे ॥ ८३
हर उवाच
यद्यर्चयन्ति त्रिदशा मम लिङ्गं सुरोत्तमौ।
तदेतत्प्रतिगृह्णीयां नान्यथेति कथंचन ॥ ८४
तत. प्रोवाच भगवानेवमस्त्विति केशवः।
ब्रह्मा स्वयं च जग्राह लिङ्ग कनकपिङ्गलम् ॥ ८५
ततश्चकार भगवांश्चातुर्वर्ण्यं हरार्चने।

तदुपरान्त देव पितामह और जगत्पति केशव वहाँ पहुँचे जहाँ शकर का वह लिंग था। (७३)

तदनन्तर उस अनन्त लिंग को देख कर विस्मयान्वित हरि गरुड पर सवार हो पाताल में प्रविष्ट हुए। (७४)

पद्मविमान के द्वारा ब्रह्मा सम्पूर्ण ऊर्ध्व देश को आक्रान्त करने पर भी उस लिंग का अन्त नहीं पा सके अत हे ब्रह्मन्! आश्चर्यान्वित होकर वे लौट आये। (७५)

लोकरक्षक चक्रपाणि विष्णु सातों पातालों में जाकर (पुन) बाहर निकले। हे महामुने! वे भी (उसका) अन्त नहीं पा सके। (७६)

विष्णु और पितामह दोनों हर के लिंग के पास जाकर हाथ जोड़कर देव की स्तुति करने लगे। (७७)

हरि और ब्रह्मा ने कहा—"हे शूलपाणे! आपको नमस्कार है। हे वृषभध्वज! हे जीमूतवाहन! हे कवि! हे शर्व! हे त्र्यम्बक! हे शकर! आपको नमस्कार है। (७८)

हे महेश्वर! हे महेशान! हे सुवर्णाक्ष! हे वृषाकपे! हे दक्षयज्ञ के विध्वंसक! हे कालरूप! आपको नमस्कार है। (७९)

हे परमेश्वर! आप इस जगत् के आदि मध्य एव अन्त हैं। आप भगवान् (षडैश्वर्यपूर्ण) और सर्वव्यापी हैं। आपको नमस्कार है। (८०)

पुलस्त्य ने कहा—"उस दारुवन में इस प्रकार स्तुति किये जाने पर वक्ताओं में श्रेष्ठ हर ने अपने स्वरूप मे आविर्भूत होकर (अर्थात् मूर्तिमान् होकर) उन दोनों से कहा— (८१)

हर ने कहा—'हे युगलदेवनानाथ! थकी गति वाले, कामानल से दग्ध एव अत्यन्त अस्वस्थ मेरी यहाँ आप क्यों स्तुति कर रहे हैं? (८२)

दोनों देवों ने कहा—"हे शंकर! पृथ्वी पर आपका जो यह लिंग गिराया गया है उस पुन आप ग्रहण करें। इसी लिए हम आपकी स्तुति कर रहे हैं। (८३)

हर ने कहा—"हे युगल सुरोत्तम! यदि देवता मेरे लिंग की अर्चना करें तभी मैं इसे पुन ग्रहण करूँगा अन्य किसी प्रकार नहीं।' (८४)

तब भगवान् केशव ने कहा—"ऐसा ही हो।" ब्रह्मा ने स्वय उस स्वर्ण के सदृश पिंगल लिंग को ग्रहण किया। (८५)

तब भगवान् ने चारों वर्णों को हर लिंग की अर्चना का

शास्त्राणि चैषां मुख्यानि नानोक्तिविदितानि च ॥८६
आद्यं शैवं परिख्यातमन्यत्पाशुपतं मुने ।
तृतीयं कालवदनं चतुर्थं च कपालिनम् ॥ ८७
शैवश्चासीत्स्वयं शक्तिर्वसिष्ठस्य प्रियः सुत. ।
तस्य शिष्यो बभूवाथ गोपायन इति श्रुत ॥ ८८
महापाशुपतश्चासीद्भरद्वाजस्तपोधनः ।
तस्य शिष्योऽप्यभूद्राजा ऋषभः सोमकेश्वरः ॥ ८९
कालास्यो भगवानासीदापस्तम्बस्तपोधनः ।
तस्य शिष्योभवद्वैश्यो नाम्ना क्राथेश्वरो मुने ॥ ९०
महाव्रती च धनदस्तस्य शिष्यश्च वीर्यवान् ।
कर्णोदर इति ख्यातो जात्या शूद्रो महातपाः ॥ ९१
एवं स भगवान्ब्रह्मा पूजनाय शिवस्य तु ।
कृत्वा तु चातुराश्रम्य स्वमेव भवन गत ॥ ९२
गते ब्रह्मणि शर्वोऽपि उपसंहृत्य त तदा ।
लिङ्गं चित्रवने सूक्ष्मं प्रतिष्ठाप्य चचार ह ॥ ९३

अधिकारी बनाया। इनके मुख्य शास्त्र नाना प्रकार के वचनों से प्रख्यात हैं। (८६)

हे मुने! (उन हरभक्तों का) प्रथम सम्प्रदाय) शैव, द्वितीय पाशुपत, तृतीय कालवदन, और चतुर्थ कपाली नाम से विख्यात है। (८७)

वसिष्ठ के प्रियपुत्र शक्ति स्वय शैव थे एव उनका गोपायन नाम से प्रसिद्ध शिष्य था। (८८)

तपोधन भरद्वाज महापाशुपत थे और सोमकेश्वर राजा ऋषभ उनके शिष्य हुए। (८९)

हे मुने! ऐश्वर्ययुक्त तपोधन आपस्तम्ब, कालवदन सम्प्रदाय के आचार्य थे। क्राथेश्वर नाम का उनका एक वैश्य शिष्य था। (९०)

धनद (नाम का) महाव्रती (कपाली) था। शूद्र जाति का महातपस्वी कर्णोदर नामक उनका एक प्रसिद्ध शिष्य था। (९१)

इस प्रकार भगवान् ब्रह्मा शिव की पूजा के लिये चार आश्रमों का विधान कर अपने भवन को चले गए। (९२)

ब्रह्मा के चले जाने पर महादेव ने भी उस लिंग को उपसंहृत कर लिया एव चित्रवन में सूक्ष्म लिंग प्रतिष्ठापित कर विचरण करने लगे। (९३)

विचरन्तं तदा भूयो महेश कुसुमायुधः ।
आरात्स्थित्वाऽग्रतो धन्वी सतापयितुमुद्यतः ॥ ९४
ततस्तमग्रतो दृष्ट्वा क्रोधाध्मातदृशा हरः ।
स्मरमालोकयामास शिखाग्राच्चरणान्तिकम् ॥ ९५
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् पादादारभ्य कक्षवत् ॥ ९६
प्रदह्यमानौ चरणौ दृष्ट्वाऽसौ कुसुमायुधः ।
उत्ससर्ज धनुः श्रेष्ठ तज्जगामाथ पञ्चधा ॥ ९७
यदासीन्मुष्टिबन्धं तु रुक्मपृष्ठं महाप्रभम् ।
स चम्पकतरुर्जात. सुगन्धाढ्यो गुणाकृतिः ॥ ९८
नाहस्थान शुभाकारं यदासीद्वज्रभूषितम् ।
तज्जात केसरारण्य बकुल नामतो मुने ॥ ९९
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजिविभूषिता ॥ १००
नाहोपरि तथा मुष्टौ स्थानं शशिमणिप्रभम् ।

उस समय महेश को विचरण करते देख पुष्पधन्वा कामदेव पुन उनके सम्मुख निकट स्थित होकर उन्हें सन्तापित करने को उद्यत हुआ। (९४)

तदुपरान्त महादेव ने उस कामदेव को सामने देखकर क्रोधपूर्ण दृष्टि से शिखा से चरण तक उसे देखा। (९५)

हे ब्रह्मन्! त्रिनेत्र द्वारा आलोकित होने पर द्युतिमान् होने पर भी कामदेव पैर से लेकर कक्ष पर्यन्त दग्ध हो गया। (९६)

कुसुमायुध मदन ने अपने चरणों को जलते हुए देख श्रेष्ठ धनुष को फेंक दिया जिसके पाँच टुकडे हो गए। (९७)

उस धनुष का परमप्रभायुक्त रुक्मपृष्ठ मुष्टिबन्ध सुगन्ध से भरा सुन्दर चम्पक वृक्ष हो गया। (९८)

हे मुने! उस धनुष का वज्रभूषित सुन्दर आकार वाला नाह-स्थान केसरारण्य वकुल नाम का वृक्ष बना। (९९)

इन्द्रनील से विभूषित उसकी सुन्दर कोटि भृंगों से विभूषित रमणीय पाटला (गुलाब) के रूप में परिणत हो गयी। (१००)

नाह के ऊपर मुष्टि में स्थित चन्द्रकान्तमणि की प्रभा से युक्त स्थान, शशिकिरण के समान उज्ज्वल पञ्चगुल्मा जाती (जूही) बन गया। (१०१)

पञ्चगुल्माऽभवज्जाती शशाङ्ककिरणोज्ज्वला ॥ १०१
ऊर्ध्वं मुष्ट्या अधः कोट्योः स्थानं विद्रुमभूषितम्।
तस्माद्बहुपुटा मल्ली संजाता विविधा मुने ॥ १०२
पुष्पोत्तमानि रम्याणि सुरभीणि च नारद।
जातिपुक्तानि देवेन स्वयमाचरितानि च ॥ १०३
मुमोच मार्गणान् भूम्यां शरीरे दह्यति स्मरः।
फलोपगानि वृक्षाणि संभूतानि सहस्रशः ॥ १०४
चूतादीनि सुगन्धीनि स्वादूनि विविधानि च।
हरप्रसादाज्जातानि भोज्यान्यपि सुरोत्तमैः ॥ १०५
एवं दग्ध्वा स्मरं रुद्रः संयम्य स्वतनुं विभुः।
पुण्यार्थी शिशिराद्रिं स जगाम तपसेऽव्ययः ॥ १०६

एवं पुरा देववरेण शंभुना
कामस्तु दग्धः सशरः सचाप.।
ततस्त्वनङ्गेति महाधनुर्द्धरो
देवैस्तु गीत. सुरपूर्वपूजितः ॥ १०७

इति श्रीवामनपुराणे षष्ठोऽध्याय ॥६॥

हे मुने! मुष्टि के ऊपर और दोनों कोटियों के नीचे वाले विद्रुममणि विभूषित स्थान से अनेक पुटों वाली मल्लिका (मालती) उत्पन्न हुई। (१०२)

हे नारद! देव के द्वारा जाती (जूही) के साथ अन्य सुन्दर तथा सुगन्धित पुष्पों की सृष्टि हुई। शरीर के दग्ध होते समय कामदेव ने अपने बाणों को पृथ्वी पर फेंका जिससे सहस्रों प्रकार के फलयुक्त वृक्ष उत्पन्न हुए। (१०३-१०४)

श्री हर के प्रसाद से श्रेष्ठ देवताओं द्वारा भी भोज्य अनेक प्रकार के सुगन्धित एवं स्वादिष्ट आम्रादि फल उत्पन्न हुए। (१०५)

इस प्रकार मदन को भस्म कर एवं अपने शरीर को सयत कर विभु अव्यय रुद्र पुण्य की कामना से हिमालय पर तपस्या हेतु चले गए। (१०६)

पूर्व समय में इस प्रकार देवताओं में श्रेष्ठ शम्भु ने धनुष बाण सहित काम को दग्ध कर दिया। तत्पश्चात् देवताओं में प्रथम पूजित वह महाधनुर्धर देवों द्वारा "अनङ्ग" कहा गया। (१०७)

॥श्रीवामनपुराण में षष्ठ अध्याय समाप्त ॥६॥

७

पुलस्त्य उवाच ।
ततोऽनङ्गं विभुर्दृष्ट्वा ब्रह्मन् नारायणो मुनिः ।
प्रहस्यैवं वचः प्राह कन्दर्प इह आस्यताम् ॥ १
तदक्षुब्धत्वमीक्ष्यास्य कामो विस्मयमागतः ।
वसन्तोऽपि महाचिन्तां जगामाशु महामुने ॥ २
ततश्चाप्सरसो दृष्ट्वा स्वागतेनाभिपूज्य च ।
वसन्तमाह भगवानेह्येहि स्थीयतामिति ॥ ३
ततो विहस्य भगवान् मञ्जरीं कुसुमावृताम् ।
आदाय प्राक्सुवर्णाङ्गीमूर्वोर्बालां विनिर्ममे ॥ ४
ऊरूद्भवां स कन्दर्पो दृष्ट्वा सर्वाङ्गसुन्दरीम् ।
अमन्यत तदाऽनङ्गः किमियं सा प्रिया रतिः ॥ ५
तदेव वदनं चारु स्वक्षिभ्रूकुटिलालकम् ।
सुनासावंशाधरोष्ठमालोकनपरायणम् ॥ ६
तावेवाहार्यविरलौ पीवरौ मग्नचूचुकौ ।
राजेतेऽस्याः कुचौ पीनौ सज्जनाविव संहतौ ॥ ७
तदेव तनु चार्वङ्ग्या वलित्रयविभूषितम् ।
उदरं राजते श्लक्ष्णं रोमावलिविभूषितम् ॥ ८
रोमावली च जघनाद् यान्ती स्तनतटं त्वियम् ।
राजते भृङ्गमालेव पुलिनात् कमलाकरम् ॥ ९
जघनं त्वतिविस्तीर्णं भात्यस्या रशनावृतम् ।
क्षीरोदमथने नद्धं भुजंगेनेव मन्दरम् ॥ १०
कदलीस्तम्भसदृशैरूर्ध्वमूलैरथोरुभिः ।
विभाति सा सुचार्वङ्गी पद्मकिञ्जल्कसन्निभा ॥ ११
जानुनी गूढगुल्फे च शुभे जङ्घे त्वरोमशे ।
विभातोऽस्यास्तथा पादावलक्तकसमत्विषौ ॥ १२
इति संचिन्तयन् कामस्तामनिन्दितलोचनाम् ।

७

पुलस्त्य ने कहा—हे ब्रह्मन् ! इसके अनन्तर विभु नारायण मुनि ने अनंग को देखकर हँसते हुए इस प्रकार वचन कहा—"हे कन्दर्प ! यहाँ बैठो।" (१)

काम उनकी उस अक्षुब्धता को देख कर विस्मयान्वित हुआ। हे महामुने ! वसन्त को भी तत्काल महती चिन्ता हुई। (२)

तदनन्तर अप्सराओं को देख कर स्वागत द्वारा उनकी पूजा कर भगवान् ने वसन्त से कहा—"आओ आओ बैठो।" (३)

तदुपरान्त भगवान् नारायण मुनि ने हँस कर एक कुसुमावृत मञ्जरी ली और अपने ऊरु पर एक सुवर्णाङ्गी बाला की सृष्टि की। (४)

ऊरु से उत्पन्न उस सर्वांग-सुन्दरी को देखकर कन्दर्प मन में सोचने लगा—'क्या यह मेरी प्रिया रति है ?' (५)

वैसे ही सुन्दर नेत्र, भौंह एवं कुटिल अलकों से युक्त, सुन्दर नासिका का वंश एवं अधरोष्ठ वाला तथा देखने में अत्यन्त आकर्षक यह मुख है। (६)

इसके वे ही मनोहर, अत्यन्त तथा मग्नचूचुक वाले पीन कुच सज्जन पुरुषों के सदृश परस्पर संहत हैं। (७)

इस सुन्दराङ्गी का वही कृश, त्रिवली विभूषित, कोमल तथा रोमावलि युक्त उदर शोभित हो रहा है। (८)

जघा से स्तनतट की ओर जाती हुई इसकी यह रोमावलि पुलिन से कमलाकर की ओर जाती हुई भ्रमरमाला के सदृश सुशोभित हो रही है। (९)

करधनी से आवृत अतिविस्तीर्ण इसका नितम्ब प्रदेश इस प्रकार सुशोभित हो रहा है मानों क्षीरसागर के मन्थन काल में भुजङ्गवेष्टित मन्दर पर्वत हो। (१०)

कमल के केसर के समान गौरवर्ण वाली यह सुन्दरी कदली स्तम्भ के समान ऊर्ध्वमूल ऊरुओं के द्वारा शोभित हो रही है। (११)

इसके दोनों घुटने, गूढगुल्फ, रोमहीन सुन्दर जघायें तथा आलक्तक के समान कान्ति वाले दोनों पाद अत्यन्त सुशोभित हो रहे हैं। (१२)

हे मुने ! उस सुन्दर नेत्रवाली के विषय में इस प्रकार

कापातुरोऽसौ संजातः किमुतान्यो जनो मुने ॥ १३
माधवोऽप्युर्वशीं दृष्ट्वा संचिन्तयत नारद ।
किंस्वित् कामनरेन्द्रस्य राजधानी स्वयं स्थिता ॥ १४
आयाता शशिनो नूनमियं कान्तिर्निशाक्षये ।
रविरश्मिप्रतापार्तिभीता शरणमागता ॥ १५
इत्थं संचिंतयन्नेव अवष्टभ्याप्सरोगणम् ।
तस्थौ मुनिरिव ध्यानमास्थित. स तु माधवः ॥ १६
तत. स त्रिस्मितान् सर्वान् कन्दर्पादीन् महामुने ।
दृष्ट्वा प्रोवाच वचनं स्मितं कृत्वा शुभव्रतः ॥ १७
इयं ममोरुसंभूता कामाप्सरस माधव ।
नीयतां सुरलोकाय दीयतां वासवाय च ॥ १८
इत्युक्ताः कम्पमानास्ते जग्मुर्गृह्योर्वशीं दिवम् ।
सहस्राक्षाय तां प्रादाद् रूपयौवनशालिनीम् ॥ १९
आचक्षुश्चरितं ताभ्यां धर्मजाभ्यां महामुने ।
देवराजाय कामाद्यास्ततोऽभूद् विस्मयः परः ॥ २०

एतादृशं हि चरितं ख्यातिमग्र्यां जगाम ह ।
पातालेषु तथा मर्त्ये दिक्ष्वष्टासु जगाम च ॥ २१
एकदा निहते रौद्रे हिरण्यकशिपौ मुने ।
अभिषिक्तस्तदा राज्ये प्रह्लादो नाम दानवः ॥ २२
तस्मिञ्शासति दैत्येन्द्रे देवब्राह्मणपूजके ।
मखानि भुवि राजानो यजन्ते विधिवत्तदा ॥ २३
ब्राह्मणाश्च तपो धर्मं तीर्थयात्राश्च कुर्वते ।
वैश्याश्च पशुवृत्तिस्थाः शूद्राः शुश्रूषणे रताः ॥ २४
चातुर्वर्ण्यं ततः स्वे स्वे आश्रमे धर्मकर्मणि ।
आवर्त्तत ततो देवा वृत्त्या युक्ताभवन् मुने ॥ २५
ततस्तु च्यवनो नाम भार्गवेन्द्रो महातपाः ।
जगाम नर्मदां स्नातुं तीर्थे चैवाकुलीश्वरम् ॥ २६
तत्र दृष्ट्वा महादेवं नदीं स्नातुमवातरत् ।
अवतीर्णं प्रजग्राह नागः केकरलोहितः ॥ २७
गृहीतस्तेन नागेन सस्मार मनसा हरिम् ।

सोचते हुए जब यह कामदेव ही काममोहित हो गया तो फिर अन्य पुरुषों की क्या बात है। (१३)

हे नारद! वसन्त भी उस उर्वशी को देखकर सोचने लगा—"क्या यह कामनरेश की स्वयं राजधानी अवस्थित है ? (१४)

अथवा रात्रि का अन्त होने पर सूर्य की किरणों के ताप के भय से चन्द्रमा की कान्ति शरणागत हुई है। (१५)

इस प्रकार सोचते हुए अप्सराओं को रोक कर वसन्त, मुनि के सदृश ध्यानस्थ हो गया। (१६)

हे महामुने! तदुपरान्त शुभव्रत नारायण मुनि ने कन्दर्पादि सभी को विस्मयान्वित देख कर हँसते हुए कहा— (१७)

"हे काम, हे अप्सराओं, हे वसन्त, मेरे ऊरु से उत्पन्न इस बाला को सुरलोक मे ले जाओ और इन्द्र को दे दो।" (१८)

ऐसा कहे जाने पर वे सभी काँपते हुए उर्वशी को लेकर स्वर्ग में गए और इन्द्र को वह रूप यौवन शालिनी बाला दे दिया। (१९)

हे महामुने! कामादि ने इन्द्र से उन धर्मजों—(नर और नारायण) का चरित्र कहा जिससे उन्हें अत्यन्त विस्मय हुआ। (२०)

(नर और नारायण का) ऐसा चरित्र सर्वोच्च ख्याति को प्राप्त हुआ तथा वह पाताल, मर्त्यलोक एव आठों दिशाओं में व्याप्त हो गया। (२१)

हे मुने! प्राचीन काल में अति भयकर हिरण्यकशिपु के मारे जाने पर प्रह्लाद नामक दानव राज्याभिषिक्त हुआ। (२२)

देवता और ब्राह्मण के पूजक उस दैत्येन्द्र के शासनकाल में पृथ्वी पर राजा लोग विधिपूर्वक यज्ञानुष्ठान करते थे। (२३)

ब्राह्मण लोग तपस्या, धर्मकार्य और तीर्थयात्रा, वैश्य लोग पशुपालन तथा शूद्र लोग शुश्रूषा करने लगे। (२४)

हे मुने! इस प्रकार चारों वर्ण अपने आश्रम मे अवस्थित रह कर धर्मकार्यों के अनुष्ठान में तत्पर हुए। इससे देवता भी वृत्ति से युक्त हो गये। (२५)

तदनन्तर भार्गवश्रेष्ठ महातपस्वी च्यवन नामक ऋषि नर्मदा के अकुलीश्वर तीर्थ मे स्नान करने गये। (२६)

वहाँ महादेव का दर्शन कर वे नदी में स्नान करने के लिये उतरे। जल में अवतीर्ण ऋषि को केकरलोहित साँप ने पकड लिया। (२७)

संस्मृते पुण्डरीकाक्षे निर्विषोऽभून्महोरगः ॥ २८
नीतस्तेनातिरौद्रेण पन्नगेन रसातलम् ।
निर्विषश्चापि तत्याज च्यवनं भुजगोत्तमः ॥ २९
संत्यक्तमात्रो नागेन च्यवनो भार्गवोत्तमः ।
चचार नागकन्याभिः पूज्यमानः समन्ततः ॥ ३०
विचरन् प्रविवेशाथ दानवानां महत् पुरम् ।
संपूज्यमानो दैत्येन्द्रैः प्रह्लादोऽथ ददर्श तम् ॥ ३१
भृगुपुत्रे महातेजाः पूजां चक्रे यथार्हतः ।
संपूजितोपविष्टश्च पृष्टश्चागमनं प्रति ॥ ३२
स चोवाच महाराज महातीर्थं महाफलम् ।
स्नातुमेवागतोऽस्म्यद्य द्रष्टुञ्चैवाकुलीश्वरम् ॥ ३३
नद्यामेवावतीर्णोऽस्मि गृहीतश्चाहिना बलात् ।
समानीतोऽस्मि पाताले दृष्टश्चात्र भवानपि ॥ ३४
एतच्छ्रुत्वा तु वचनं च्यवनस्य दितीश्वरः ।
प्रोवाच धर्मसंयुक्तं स वाक्यं वाक्यकोविदः ॥ ३५

प्रह्लाद उवाच ।
भगवन् कानि तीर्थानि पृथिव्यां कानि चाम्बरे ।
रसातले च कानि स्युरेतद् वक्तुं ममार्हसि ॥ ३६
च्यवन उवाच ।
पृथिव्यां नैमिषं तीर्थमन्तरिक्षे च पुष्करम् ।
चक्रतीर्थं महाबाहो रसातलतले विदुः ॥ ३७
पुलस्त्य उवाच ।
श्रुत्वा तद्भार्गववचो दैत्यराजो महामुने ।
नैमिषं गन्तुकामस्तु दानवानिदमब्रवीत् ॥ ३८
प्रह्लाद उवाच ।
उत्तिष्ठध्वं गमिष्यामः स्नातुं तीर्थं हि नैमिषम् ।
द्रक्ष्यामः पुण्डरीकाक्षं पीतवाससमच्युतम् ॥ ३९
पुलस्त्य उवाच ।
इत्युक्ता दानवेन्द्रेण सर्वे ते दैत्यदानवाः ।
चक्रुरुद्योगमतुलं निर्जग्मुश्च रसातलात् ॥ ४०

उस साँप द्वारा गृहीत ऋषिने मन में हरि का स्मरण किया। पुण्डरीकाक्ष का स्मरण करने पर वह महान् नाग विषहीन हो गया। (२८)

उस महाभयकर विषहीन महानाग ने च्यवन ऋषि को रसातल में ले जाकर छोड दिया। (२९)

नाग से मुक्त होते ही भार्गवश्रेष्ठ च्यवन वहाँ चारों ओर से नागकन्याओं द्वारा पूजित होते हुए विचरण करने लगे। (३०)

विचरण करते हुए वे दानवों के विशाल नगर में प्रविष्ट हुए। वहाँ श्रेष्ठ दैत्यों द्वारा पूजित प्रह्लाद ने उन्हें देखा। (३१)

महातेजस्वी प्रह्लाद ने भृगुपुत्र की यथायोग्य पूजा की। पूजोपरान्त उनके बैठने पर उनसे आगमन का कारण पूछा। (३२)

उन्होंने कहा—हे महाराज! आज मैं महाफलदायक श्रेष्ठतीर्थ में स्नान करने तथा अकुलीश्वर का दर्शन करने आया था। (३३)

नदी में उतरते ही एक नाग ने मुझे हठात् पकड़ लिया। वह मुझे पाताल में लाया और मैंने यहाँ आप को भी देखा। (३४)

च्यवन की इस बात को सुन कर वाक्य-कोविद दितीश्वर ने यह धर्मसयुक्त वाक्य कहा। (३५)

प्रह्लाद ने कहा—हे भगवन्! कृपया मुझसे यह कहिये कि पृथ्वी, आकाश और पाताल में कौन कौन से तीर्थ हैं? (३६)

च्यवन ने कहा—हे महाबाहो! पृथ्वी में नैमिष, अन्तरिक्ष में पुष्कर और रसातल में चक्रतीर्थ प्रसिद्ध हैं। (३७)

पुलस्त्य ने कहा—हे महामुने! भार्गव की इस बात को सुन कर नैमिष तीर्थ में जाने के लिए इच्छुक दैत्यराज ने दानवों से यह कहा— (३८)

प्रह्लाद ने कहा—"उठो, हम सभी नैमिषतीर्थ में स्नान करने जायेंगे तथा वहाँ पीताम्बरधारी अच्युत पुण्डरीकाक्ष के दर्शन करेंगे।" (३९)

पुलस्त्य ने कहा—दानवेन्द्र के ऐसा कहने पर वे सभी दैत्य और दानव विपुल उद्योग किए एवं रसातल से बाहर निकले। (४०)

ते समभ्येत्य दैतेया दानवाश्च महाबलाः ।
नैमिषारण्यमागत्य स्नानं चक्रुर्मुदान्विताः ॥ ४१
ततो दितीश्वरः श्रीमान् मृगव्यां स चचार ह ।
चरन् सरस्वतीं पुण्यां ददर्श विमलोदकाम् ॥ ४२
तस्यादूरे महाशाखं शालवृक्षं शरैश्चितम् ।
ददर्श बाणानपरान् मुखे लग्नान् परस्परम् ॥ ४३
ततस्तानद्भुताकारान् बाणान् नागोपवीतकान् ।
दृष्ट्वाऽतुलं तदा चक्रे क्रोधं दैत्येश्वरः किल ॥ ४४
स ददर्श ततोऽदूरात्कृष्णाजिनधरौ मुनी ।
समुन्नतजटाभारौ तपस्यासक्तमानसौ ॥ ४५
तयोश्च पार्श्वयोर्दिव्ये धनुषी लक्षणान्विते ।
शार्ङ्गमाजगवं चैव अक्षय्यौ च महेषुधी ॥ ४६
तौ दृष्ट्वाऽमन्यत तदा दाम्भिकाविति दानवः ।
ततः प्रोवाच वचनं तावुभौ पुरुषोत्तमौ ॥ ४७
किं भवद्भ्यां समारब्धं दम्भं धर्मविनाशनम् ।
क्व तपः क्व जटाभारः क्व चेमौ प्रवरायुधौ ॥ ४८
अथोवाच नरो दैत्यं का ते चिन्ता दितीश्वर ।
सामर्थ्ये सति यः कुर्यात् तत्संपद्येत तस्य हि ॥ ४९
अथोवाच दितीशस्तौ का शक्तिर्युवयोरिह ।
मयि तिष्ठति दैत्येन्द्रे धर्मसेतुप्रवर्तके ॥ ५०
नरस्तं प्रत्युवाचाथ आवाभ्यां शक्तिरूर्जिता ।
न कश्चिच्छक्नुयाद् योद्धुं नरनारायणौ युधि ॥ ५१
दैत्येश्वरस्ततः क्रुद्धः प्रतिज्ञामारुरोह च ।
यथा कथंचिज्जेष्यामि नरनारायणौ रणे ॥ ५२
इत्येवमुक्त्वा वचनं महात्मा
दितीश्वरः स्थाप्य बलं वनान्ते ।
वितत्य चापं गुणमाविकृष्य
तलध्वनिं घोरतरं चकार ॥ ५३
ततो नरस्त्वाजगवं हि चाप-
मानम्य बाणान् सुबहूञ्शिताग्रान् ।

उन महाबलवान् दितिनन्दनों एवं दानवों ने नैमिषारण्य में आकर आनन्द से स्नान किया। (४१)

तदनन्तर दितीश्वर श्रीमान् प्रह्लाद मृगया करने के लिये विचरण करने लगे। भ्रमण करते हुए उन्होंने पवित्र एवं निर्मल जलवाली सरस्वती नदी को देखा। (४२)

वहाँ से थोड़ी दूर पर बाणों से विद्ध बड़ी बड़ी शाखाओं वाले एक शाल वृक्ष को देखा। अन्य बाण एक दूसरे के मुख से संलग्न थे। (४३)

तदनन्तर उन अद्भुत आकार वाले नागोपवीत बाणों को देख कर दैत्येश्वर को भयकर क्रोध हुआ। (४४)

तदुपरान्त उन्होंने दूर से ही कृष्णाजिनधारी, समुन्नत जटायुक्त तथा तपस्या मे तल्लीन दो मुनियों को देखा। (४५)

उन दोनों के पार्श्व में शार्ङ्ग और आजगव नामक सुलक्षणयुक्त दिव्य दो धनुष और दो अक्षय तथा बड़े तरकस वर्तमान थे। (४६)

उन्हें देखकर दानव प्रह्लाद ने उनको दाम्भिक समझा। तदनन्तर उन्होंने उन दोनों श्रेष्ठ पुरुषों से कहा— (४७)

"तुम दोनों धर्मविनाशक दम्भ को क्यों कर रहे हो? कहाँ तुम्हारी तपस्या, कहाँ तुम्हारा जटाभार और कहाँ ये दोनों श्रेष्ठ आयुध ?" (४८)

तदनन्तर नर ने दैत्य से कहा—"हे दितीश्वर! तुम क्यों चिन्ता कर रहे हो? सामर्थ्य रहने पर व्यक्ति जो कर्म करता है उसका वह कार्य उसको शोभा देता है। (४९)

तदुपरान्त दितीश्वर प्रह्लाद ने उन दोनों से कहा— धर्मसेतुप्रवर्तक मुझ दैत्येन्द्र के रहते यहाँ तुम दोनों की क्या शक्ति है? (५०)

तदनन्तर नर ने उन्हें प्रत्युत्तर दिया—"हम प्रचण्ड शक्ति से युक्त हैं। हम दोनों नर और नारायण से समर में कोई भी युद्ध नहीं कर सकता। (५१)

तदुपरान्त दैत्येश्वर ने क्रुद्ध होकर प्रतिज्ञा की—"मैं युद्ध में जिस किसी भी प्रकार नर और नारायण को जीतूँगा।" (५२)

ऐसा वचन कह कर महात्मा दितीश्वर ने वन की सीमा पर अपने सैन्य को स्थापित कर धनुष को फैलाया और प्रत्यञ्चा चढ़ा कर घोरतर तलध्वनि की। (५३)

तदनन्तर नर ने आजगव धनुष को झुका कर अनेक सुतीक्ष्ण बाणों को छोड़ा। किन्तु दैत्यपति ने अनेक स्वर्ण-

मुमोच बाणप्रतिमैः पृषत्कै-
श्चिच्छेद दैत्यस्तपनीयपुङ्खैः ॥ ५४

छिन्नान् समीक्ष्याथ नरः पृषत्कान्
दैत्येश्वरेणाप्रतिमेन संख्ये।
क्रुद्धः समानम्य महाधनुस्ततो
मुमोच चान्यान् विविधान् पृषत्कान् ॥ ५५

एकं नरो द्वौ दितिजेश्वरश्च
त्रीन् धर्मसूनुश्चतुरो दितीशः।
नरस्तु बाणान् प्रमुमोच पञ्च
षड् दैत्यनाथो निशितान् पृषत्कान् ॥ ५६

सप्तर्षिमुख्यो द्विचतुश्च दैत्यो
नरस्तु षट् त्रीणि च दैत्यमुख्ये।
षट्त्रीणि चैकं च दितीश्वरेण
मुक्तानि बाणानि नराय विप्र ॥ ५७

एकं च षट् पञ्च नरेण मुक्ता-
स्त्वष्टौ शराः सप्त च दानवेन।
षट् सप्त चाष्टौ नव षण्नरेण
द्विसप्ततिं दैत्यपतिः ससर्ज ॥ ५८

शतं नरस्त्रीणि शतानि दैत्यः
षड् धर्मपुत्रो दश दैत्यराजः।
ततोऽप्यसंख्येयतरान् हि बाणान्
मुमोचतुस्तौ सुभृशं हि कोपात् ॥ ५९

ततो नरो बाणगणैरसंख्यै-
रवास्तरद्भूमिमथो दिशः खम्।
स चापि दैत्यप्रवरः पृषत्कै-
श्चिच्छेद वेगात् तपनीयपुङ्खैः ॥ ६०

ततः पतत्रिभिर्वीरौ सुभृशं नरदानवौ।
युद्धे वरास्त्रैर्युध्येतां घोररूपैः परस्परम् ॥ ६१

ततस्तु दैत्येन वरास्त्रपाणिना
चापे नियुक्तं तु पितामहास्त्रम्।
महेश्वरास्त्रं पुरुषोत्तमेन
समं समाहत्य निपेततुस्तौ ॥ ६२

ब्रह्मास्त्रे तु प्रशमिते प्रह्लादः क्रोधमूर्छितः।
गदां प्रगृह्य तरसा प्रचस्कन्द रथोत्तमात् ॥ ६३

गदापाणिं समायान्तं दैत्यं नारायणस्तदा।
दृष्ट्वाऽथ पृष्ठतश्चक्रे नरं योद्धुमनाः स्वयम् ॥ ६४

पुंख वाले अप्रतिम बाणों से उन बाणों को छिन्न भिन्न कर दिया। (५४)

तदुपरान्त नर ने युद्ध में अप्रतिम दैत्येश्वर के द्वारा बाणों को छिन्न हुआ देख क्रुद्ध होकर अपने महान् धनुष को झुकाते हुए अन्य अनेक बाणों को छोड़ा। (५५)

नर के एक बाण छोड़ने पर दितीश्वर ने दो बाण छोड़ा, धर्मपुत्र के तीन बाणों पर दितीश ने चार बाण छोड़ा। तदनन्तर नर के पाँच बाण छोड़ने पर दैत्यश्रेष्ठ ने छ तीव्र बाणों को छोड़ा। (५६)

हे विप्र! ऋषिमुख्य के सात बाण छोड़ने पर दैत्य ने आठ बाण छोड़ा। नर के द्वारा दैत्य पर नव बाण छोड़े जाने पर दैत्यपति ने नर पर दश बाण छोड़ा। (५७)

नर के बारह बाण छोड़ने पर दानव ने पन्द्रह बाण छोड़ा। नर के छत्तीस बाण छोड़ने पर दैत्यपति ने बहत्तर बाण चलाया। (५८)

नर के सौ बाणों पर दैत्य ने तीन सौ बाण चलाया। धर्मपुत्र के छ सौ बाण पर दैत्यराज ने एक हजार बाण छोड़ा। तदनन्तर उन दोनों ने अत्यन्त क्रोध से असंख्य बाण छोड़े। (५९)

तदनन्तर नर ने असंख्य बाणों से पृथ्वी, आकाश और दिशाओं को आच्छन्न कर दिया। उस दैत्यप्रवर ने भी बड़े वेग से स्वर्णपुंख वाले बाणों द्वारा उनके बाणों को काट दिया। (६०)

तदुपरान्त नर और दानव दोनों वीर बाणों तथा भयंकर श्रेष्ठ अस्त्रों से परस्पर संग्राम करने लगे। (६१)

तदनन्तर दैत्य ने श्रेष्ठ अस्त्र हाथ में लेकर धनुष पर ब्रह्मास्त्र नियोजित किया एवं पुरुषोत्तम नर ने माहेश्वरास्त्र का प्रयोग किया। वे दोनों अस्त्र परस्पर एक दूसरे को समाहत कर गिर गए। (६२)

ब्रह्मास्त्र व्यर्थ होने पर क्रोधमूर्छित प्रह्लाद वेग से गदा लेकर उत्तम रथ से कूद पड़े। (६३)

तवो दितीशः सगदः समाद्रवत्
सशार्ङ्गपाणिं तपसां निधानम्।
ख्यातं पुराणर्षिमुदारविक्रमं
नारायणं नारद लोकपालम्॥ ६५

इति श्रीवामनपुराणे सप्तमोऽध्याय ॥७॥

८

पुलस्त्य उवाच ।

शार्ङ्गपाणिनमायान्तं दृष्ट्वाऽग्रे दानवेश्वरः।
परिभ्राम्य गदां वेगात् मूर्ध्नि साध्यमताडयत्॥ १
ताडितस्याथ गदया धर्मपुत्रस्य नारद।
नेत्राभ्यामपतद् वारि वह्निवर्षनिभं भुवि॥ २
मूर्ध्नि नारायणस्यापि सा गदा दानवार्पिता।
जगाम शतधा ब्रह्मञ्शैलश्रृङ्गे यथाऽशनिः॥ ३
ततो निवृत्य दैत्येन्द्रः समास्थाय रथं द्रुतम्।
आदाय कार्मुकं वीरस्तूणाद् बाणं समाददे॥ ४
आनम्य चापं वेगेन गार्ध्रपत्राञ्शिलीमुखान्।
मुमोच साध्याय तदा क्रोधान्धकारिताननः॥ ५
तानापतत एवाशु बाणांश्चन्द्रार्द्धसन्निभान्।
चिच्छेद बाणैरपरैर्निर्बिभेद च दानवम्॥ ६
ततो नारायणं दैत्यो दैत्यं नारायणः शरैः।
आविध्येतां तदाऽन्योन्यं मर्मभिद्भिरजिह्मगैः॥ ७
ततोऽम्बरे संनिपातो देवानामभवन्मुने।

उस समय नारायण ने गदापाणि दैत्य को आते देख कर स्वयं युद्ध करने की इच्छा से नर को पीछे कर दिया। (६४)

तदनन्तर हे नारद! गदायुक्त दैत्यपति, तपोनिधान शार्ङ्गधनुर्धारी प्रसिद्ध पुरातन ऋषि महापराक्रमशाली लोकपति नारायण की ओर दौड़े। (६५)

श्रीवामनपुराण में सप्तम अध्याय समाप्त ॥७॥

८

पुलस्त्य ने कहा—दानवेश्वर ने शार्ङ्गपाणि साध्य (नारायण) को सामने आते देख गदा को घुमाकर वेग से उनके सिर पर प्रहार किया। (१)

हे नारद! गदा से ताडित धर्मपुत्र के नेत्रों से अग्नि वर्षा के सदृश अश्रुजल भूमि पर गिर पड़ा। (२)

हे ब्रह्मन्! शैलशृङ्ग पर गिर कर जैसे वज्र टूट जाता है उसी प्रकार दानव द्वारा नारायण के सिर पर चलायी गयी गदा सैकड़ों टुकड़े हो गई। (३)

तदनन्तर शीघ्रतापूर्वक लौट कर वीर दैत्येन्द्र ने रथ पर आरूढ हो धनुष लेकर तरकस से बाण निकाला। (४)

तदुपरान्त क्रोधान्ध दैत्येन्द्र ने वेग से धनुष को झुका कर गृध्र के पंख वाले अनेक बाणों को साध्य की ओर चलाया। (५)

नारायण ने शीघ्रतापूर्वक आ रहे उन अर्धचन्द्र तुल्य बाणों को बाणों से काट डाला और अन्य बाणों से दानव का भेदन किया। (६)

तदनन्तर दैत्य ने नारायण को और नारायण ने दैत्य को परस्पर मर्मभेदी एवं सीधे चलने वाले बाणों से विद्ध किया। (७)

हे मुने! उस समय शीघ्रतापूर्वक हो रहे इस लघु, विचित्र

दिदृक्षूणां तदा युद्धं लघु चित्रं च सुष्ठु च ॥ ८
ततः सुराणां दुन्दुभयस् त्ववाद्यन्त महास्वनाः ।
पुष्पवर्षमनौपम्यं मुमुचुः साध्यदैत्ययोः ॥ ९
ततः पश्यत्सु देवेषु गगनस्थेषु तावुभौ ।
अयुध्येतां महेष्वासौ प्रेक्षकप्रीतिवर्द्धनम् ॥ १०
बबन्धतुस्तदाकाशं तावुभौ शरवृष्टिभिः ।
दिशश्च विदिशश्चैव छादयेतां शरोत्करैः ॥ ११
ततो नारायणश्चापं समाकृष्य महामुने ।
बिभेद मार्गणैस्तीक्ष्णैः प्रह्लादं सर्वमर्मसु ॥ १२
तथा दैत्येश्वरः क्रुद्धश्चापमानम्य वेगवान् ।
बिभेद हृदये बाह्वोर्वदने च नरोत्तमम् ॥ १३
ततोऽस्यतो दैत्यपतेः कार्मुकं मुष्टिबन्धनात् ।
चिच्छेदैकेन बाणेन चन्द्रार्धाकारवर्चसा ॥ १४
अपास्यत धनुश्छिन्नं चापमादाय चापरम् ।
अधिज्यं लाघवात् कृत्वा ववर्ष निशिताञ्शरान् ॥ १५
तानप्यस्य शरान् साध्यश्छित्त्वा बाणैरवारयत् ।
कार्मुकं च क्षुरप्रेण चिच्छेद पुरुषोत्तमः ॥ १६
छिन्नं छिन्नं धनुर्दैत्यस्त्वन्यदन्यत्समाददे ।
समादत्तं तदा साध्यो मुने चिच्छेद लाघवात् ॥ १७
संछिन्नेष्वथ चापेषु जग्राह दितिजेश्वरः ।
परिघं दारुणं दीर्घं सर्वलोहमयं दृढम् ॥ १८
परिगृह्याथ परिघं भ्रामयामास दानवः ।
भ्राम्यमाणं स चिच्छेद नाराचेन महामुनिः ॥ १९
छिन्ने तु परिघे श्रीमान् प्रह्लादो दानवेश्वरः ।
मुद्गरं भ्राम्य वेगेन प्रचिक्षेप नराग्रजे ॥ २०
तमापतन्तं बलवान् मार्गणैर्दशभिर्मुने ।
चिच्छेद दशधा साध्यः स छिन्नो न्यपतद् भुवि ॥ २१
मुद्गरे वितथे जाते प्रासमाविध्य वेगवान् ।
प्रचिक्षेप नराग्र्याय तं च चिच्छेद धर्मजः ॥ २२
प्रासे छिन्ने ततो दैत्यः शक्तिमादाय चिक्षिपे ।

एवं सुन्दर युद्ध को देखने की इच्छा वाले देवताओं का समूह आकाश में एकत्रित हो गया। (८)

तदनन्तर महान् शब्दकारी दुन्दुभियों को बजाकर देवताओं ने साध्य और दैत्य पर अनुपम पुष्प-वर्षा की। (९)

तदुपरान्त उन दोनों महाधनुर्धारियों ने आकाशस्थ देवों के सामने प्रेक्षकों की प्रीति बढ़ाने वाला युद्ध किया। (१०)

उस समय उन दोनों ने बाणों की वृष्टि से आकाश को आवृत कर दिया तथा बाणों के समूह से दिशाओं एवं विदिशाओं को आच्छादित कर दिया। (११)

हे महामुने! तदनन्तर नारायण ने धनुष को खींच कर तीक्ष्ण बाणों से प्रह्लाद के सभी मर्मस्थलों में प्रहार किया तथा वेगवान् दैत्येश्वर ने क्रोधपूर्वक धनुष को झुकाकर नरोत्तम के हृदय, दोनों बाहों और मुख में भेदन किया। (१२-१३)

तदनन्तर (नारायण ने) एक चन्द्रार्धाकार तेजस्वी बाण से बाण चला रहे दैत्यपति के धनुष को मुष्टिबन्ध से काट दिया। (१४)

(दैत्यपति ने) कटे धनुष को फेंक कर दूसरा धनुष ले लिया और शीघ्र ही उस पर प्रत्यञ्चा चढ़ा कर तीक्ष्ण बाणों की वर्षा की। (१५)

उसके उन शरों को भी साध्य ने बाणों से छिन्न कर निवारित कर दिया एवं पुरुषोत्तम ने तीक्ष्ण बाण से उसके धनुष को भी काट डाला। (१६)

हे मुने! धनुष के छिन्न होने पर दैत्यराज ने बारम्बार दूसरा धनुष ग्रहण किया किन्तु साध्य ने लिये गये उन धनुषों को भी लाघव से काट दिया। (१७)

तदनन्तर धनुषों के कट जाने पर दितिजेश्वर ने भयङ्कर दृढ एवं दीर्घ लौहमय परिघ को ग्रहण किया। (१८)

दानव ने परिघ को लेकर उसे घुमाया। घुमाए जा रहे परिघ को महामुनि (नारायण) ने बाण से काट डाला। (१९)

परिघ के कट जाने पर श्रीमान् दानवेश्वर प्रह्लाद ने वेग से मुद्गर को घुमा कर नारायण के ऊपर फेंका। (२०)

हे मुने! उस आ रहे मुद्गर को बलवान् साध्य ने दश बाणों से दश भागों में काट दिया और वह कट कर पृथ्वी पर गिर पड़ा। (२१)

मुद्गर के व्यर्थ हो जाने पर वेगवान् दैत्य ने प्रास लेकर नरश्रेष्ठ के ऊपर फेंका। धर्मनन्दन ने उसे भी काट दिया। (२२)

तां च चिच्छेद बलवान् क्षुरप्रेण महातपाः ॥ २३
छिन्नेषु तेषु शस्त्रेषु दानवोऽन्यन्महद्धनुः ।
समादाय ततो बाणैरवतस्तार नारद ॥ २४
ततो नारायणो देवो दैत्यनाथं जगद्गुरुः ।
नाराचेन जघानाथ हृदये सुरतापसः ॥ २५
संभिन्नहृदयो ब्रह्मन् देवेनाद्भुतकर्मणा ।
निपपात रथोपस्थे तमपोवाह सारथिः ॥ २६
स संज्ञां सुचिरेणैव प्रतिलभ्य दितीश्वरः ।
सुदृढं चापमादाय भूयो योद्धुमुपागतः । २७
तमागतं सनिरीक्ष्य प्रत्युवाच नराग्रजः ।
गच्छ दैत्येन्द्र योत्स्यामः प्रातस्त्वाह्निकमाचर ॥ २८
एवमुक्तो दितीशस्तु साध्येनाद्भुतकर्मणा ।
जगाम नैमिषारण्यं क्रियां चक्रे तदाऽऽह्निकीम् ॥२९
एवं युध्यति देवे च प्रह्लादो ह्यसुरो मुने ।
रात्रौ चिन्तयते युद्धे कथं जेष्यामि दाम्भिकम् ॥ ३०
एवं नारायणेनाऽसौ सहायुध्यत नारद ।
दिव्यं वर्षसहस्रं तु दैत्यो देवं न चाजयत् ॥ ३१
ततो वर्षसहस्रान्ते ह्यजिते पुरुषोत्तमे ।
पीतवाससमभ्येत्य दानवो वाक्यमब्रवीत् ॥ ३२
किमर्थं देवदेवेश साध्यं नारायणं हरिम् ।
विजेतुं नाऽद्य शक्नोमि एतन्मे कारणं वद ॥ ३३

पीतवासा उवाच ।

दुर्जयोऽसौ महाबाहुस्त्वया प्रह्लाद धर्मज्ञः ।
साध्यो विप्रवरो धीमान् मृधे देवासुरैरपि ॥ ३४

प्रह्लाद उवाच ।

यद्यसौ दुर्जयो देव मया साध्यो रणाजिरे ।
तत्कथं यत्प्रतिज्ञातं तदसत्यं भविष्यति ॥ ३५
हीनप्रतिज्ञो देवेश कथं जीवेत मादृशः ।
तस्मात्तवाग्रतो विष्णो करिष्ये कायशोधनम् । ३६

पुलस्त्य उवाच ।

इत्येवमुक्त्वा वचनं देवाग्रे दानवेश्वरः ।

प्रास के छिन्न होने पर दैत्य ने शक्ति लेकर फेंकी। बलवान् महातपा नारायण ने क्षुरप्र द्वारा उसे भी काट दिया। (२३)

हे नारद ! उन अस्त्रों के छिन्न होने पर दानव ने अन्य महाधनुष लेकर बाणों की वर्षा की। (२४)

तदनन्तर सुरतापस जगद्गुरु नारायण देव ने दैत्यपति के हृदय में नाराच से प्रहार किया। (२५)

हे ब्रह्मन् ! अद्भुतकर्मा देव द्वारा छिदे हृदय वाला वह दैत्य रथ के मध्य भाग मे गिर पड़ा। उसे सारथी वहाँ से हटा ले गया। (२६)

बहुत देर बाद चेतना प्राप्त कर सुदृढ धनुष लेकर दितीश्वर पुन युद्ध करने के लिए आया। (२७)

उसे आया देख नराग्रज ने कहा—"हे दैत्येन्द्र ! हम प्रात काल युद्ध करेंगे, जाओ इस समय आह्निक कर्म करो। (२८)

अद्भुतकर्मा साध्य के ऐसा कहने पर दितीश नैमिषारण्य मे गया और वहाँ उसने आह्निक कर्म किया। (२९)

हे मुने ! देव के ऐसा युद्ध करने पर असुर प्रह्लाद रात्रि मे यह विचार करता था कि युद्ध में दाम्भिक को कैसे जीतूँगा ? (३०)

हे नारद ! इस प्रकार दैत्य ने नारायण के साथ दिव्य सहस्र वर्षों तक युद्ध किया, परन्तु वह देव को नहीं जीत सका। (३१)

तदनन्तर सहस्र वर्षों के उपरान्त भी पुरुषोत्तम नारायण के अपराजित रहने पर दानव ने पीताम्बरधारी विष्णु के पास जाकर कहा— (३२)

"हे देवदेवेश ! मैं साध्य नारायण हरि को आज तक क्यों नहीं जीत सका ? मुझे इसका कारण बतलाएँ।" (३३)

पीताम्बरधारी ने कहा—"हे प्रह्लाद ! महाबाहु धर्मज्ञ तुम्हारे द्वारा दुर्जेय है। विप्रवर धीमान् साध्य देवासुरों द्वारा भी युद्ध मे अजेय है।" (३४)

प्रह्लाद ने कहा—"हे देव ! यदि वह साध्य देव रणांगण मे मेरे द्वारा दुर्जेय है तो मैंने जो प्रतिज्ञा की है उसका क्या होगा ? वह तो मिथ्या होगी।" (३५)

"हे देवेश ! मेरे जैसा व्यक्ति हीनप्रतिज्ञ होकर कैसे जीवित रहेगा ? इसलिये हे विष्णु ! मैं आप के सामने अपना शरीर शोधन करूँगा।" (३६)

पुलस्त्य ने कहा—विष्णु के सामने ऐसा वचन कह कर

शिरःस्नातस्तदा तस्थौ गृणन् ब्रह्म सनातनम् ॥ ३७
ततो दैत्यपतिं विष्णुः पीतवासाऽब्रवीद्वचः ।
गच्छ जेष्यसि भक्त्या तं न युद्धेन कथंचन ॥ ३८

प्रह्लाद उवाच ।

मया जितं देवदेव त्रैलोक्यमपि सुव्रत ।
जितोऽयं त्वत्प्रसादेन शक्रः किमुत धर्मजः ॥ ३९
असौ यद्यजयो देव त्रैलोक्येनापि सुव्रतः ।
न स्थातुं त्वत्प्रसादेन शक्यं किमु करोम्यज ॥ ४०

पीतवासा उवाच ।

सोऽहं दानवशार्दूल लोकानां हितकाम्यया ।
धर्मं प्रवर्त्तापयितुं तपश्चर्यां समास्थितः ॥ ४१
तस्माद्यदिच्छसि जयं तमाराधय दानव ।
तं पराजेष्यसे भक्त्या तस्माच्छुश्रूष धर्मजम् ॥ ४२

पुलस्त्य उवाच ।

इत्युक्तः पीतवासेन दानवेन्द्रो महात्मना ।
अब्रवीद्वचनं हृष्टः समाहूयाऽन्धकं मुने ॥ ४३

प्रह्लाद उवाच ।

दैत्याश्च दानवाश्चैव परिपाल्यास्त्वयान्धक ।
मयोत्सृष्टमिदं राज्यं प्रतीच्छस्व महाभुज ॥ ४४
इत्येवमुक्तो जग्राह राज्यं हैरण्यलोचनिः ।
प्रह्लादोऽपि तदाऽगच्छत् पुण्यं बदरिकाश्रमम् ॥ ४५
दृष्ट्वा नारायणं देवं नरं च दितिजेश्वरः ।
कृताञ्जलिपुटो भूत्वा ववन्दे चरणौ तयोः ॥ ४६
तमुवाच महातेजा वाक्यं नारायणोऽव्ययः ।
किमर्थं प्रणतोऽसीह मामजित्वा महासुर ॥ ४७

प्रह्लाद उवाच ।

कस्त्वां जेतुं प्रभो शक्तः कस्त्वत्तः पुरुषोऽधिकः ।
त्वं हि नारायणोऽनन्तः पीतवासा जनार्दनः ॥ ४८
त्वं देवः पुण्डरीकाक्षस्त्वं विष्णुः शार्ङ्गचापधृक् ।
त्वमव्ययो महेशानः शाश्वतः पुरुषोत्तमः ॥ ४९
त्वां योगिनश्चिन्तयन्ति चार्चयन्ति मनीषिणः ।
जपन्ति स्नातकास्त्वां च यजन्ति त्वां च याज्ञिकाः ॥ ५०

दानवेश्वर शिरःस्नात होकर सनातन ब्रह्म का जप करते हुए बैठ गए। (३७)

तदनन्तर पीताम्बरधारी विष्णु ने दैत्यपति से यह वचन कहा—"जाओ, उन्हें भक्ति से जीत सकोगे, युद्ध से कथमपि नहीं।" (३८)

प्रह्लाद ने कहा—"हे देवदेव! हे सुव्रत! आपकी कृपा से मैंने त्रैलोक्य तथा इन्द्र को जीता है। इस धर्मनन्दन की क्या बात है?" (३९)

'हे अजन्मा! यदि वह सुव्रत त्रैलोक्य से भी अजेय है तथा आपके प्रसाद से भी मैं उसके सामने नहीं ठहर सकता तो मैं क्या करूँ?' (४०)

पीताम्बरधारी ने कहा—हे दानवश्रेष्ठ! वह मैं ही हूँ जो जगत् की हितकामना से धर्मप्रवर्तनार्थ तपश्चर्या कर रहा हूँ। (४१)

अतः हे दानव! यदि तुम विजय चाहते हो तो उनकी आराधना करो। तुम उन्हें भक्ति द्वारा पराजित कर सकोगे अतः धर्मनन्दन की सेवा करो। (४२)

पुलस्त्य ने कहा—हे मुने! महात्मा पीताम्बरधारी के ऐसा कहने पर प्रसन्न दानवेन्द्र ने अन्धक को बुला कर यह वाक्य कहा— (४३)

प्रह्लाद ने कहा—"हे अन्धक! तुम दैत्यों और दानवों का प्रतिपालन करो। हे महाभुज! मेरे द्वारा त्यक्त यह राज्य तुम ग्रहण करो। (४४)

इस प्रकार कहने पर हिरण्याक्ष के पुत्र ने राज्य ग्रहण किया। तदनन्तर प्रह्लाद भी पवित्र बदरिकाश्रम चले गये। (४५)

दितिजेश्वर ने नारायण देव तथा नर को देख हाथ जोड़ कर उनके चरणों में प्रणाम किया। (४६)

महातेजस्वी अव्यय नारायण ने उससे कहा—"हे महासुर! मुझे विना जीते तुम क्यों यहाँ प्रणत हुए हो?" (४७)

प्रह्लाद ने कहा—हे प्रभो! आपको कौन जीत सकता है? कौन पुरुष आप से बढ़कर हो सकता है? आप ही अनन्त नारायण पीताम्बरधारी जनार्दन हैं। (४८)

आपही देव पुण्डरीकाक्ष तथा शार्ङ्गधनुषधारी विष्णु हैं। आप अव्यय, महेश्वर तथा शाश्वत पुरुषोत्तम हैं।" (४९)

'योगी आपका ध्यान करते हैं, मनीषी आपकी पूजा करते हैं, स्नातक आपके नाम का जप करते हैं तथा याज्ञिक आपका यजन करते हैं।" (५०)

त्वमच्युतो हृषीकेशश्चक्रपाणिर्धराधरः।
महामीनो हयशिरास्त्वमेव वरकच्छपः ॥ ५१
हिरण्याक्षरिपुः श्रीमान् भगवानथ सूकरः।
मत्पितुर्नाशनकरो भवानपि नृकेसरी ॥ ५२
ब्रह्मा त्रिनेत्रोऽमरराड् हुताशः
प्रेताधिपो नीरपतिः समीरः।
सूर्यो मृगाङ्कोऽचलजङ्गमाद्यो
भवान् विभो नाथ खगेन्द्रकेतो ॥ ५३
त्वं पृथ्वी ज्योतिराकाशं जलं भूत्वा सहस्रशः।
त्वया व्याप्तं जगत्सर्वं कस्त्वां जेष्यति माधव ॥ ५४
भक्त्या यदि हृषीकेश तोषमेषि जगद्गुरो।
नान्यथा त्वं प्रशक्योऽसि जेतुं सर्वगताव्यय ॥ ५५
भगवानुवाच।
परितुष्टोऽस्मि ते दैत्य स्तवेनानेन सुव्रत।
भक्त्या त्वनन्यया चाहं त्वया दैत्य पराजितः ॥ ५६
पराजितश्च पुरुषो दैत्य दण्डं प्रयच्छति।
दण्डार्थं ते प्रदास्यामि वरं वृणु यमिच्छसि ॥ ५७

प्रह्लाद उवाच।
नारायण वरं याचे यं त्वं मे दातुमर्हसि।
तन्मे पापं लयं यातु शारीरं मानसं तथा ॥ ५८
वाचिकं च जगन्नाथ यत्त्वया सह युध्यतः।
नरेण यद्यप्यभवद् वरमेतत्प्रयच्छ मे ॥ ५९
नारायण उवाच।
एवं भवतु दैत्येन्द्र पापं ते यातु संक्षयम्।
द्वितीयं प्रार्थय वरं तं ददामि तवासुर ॥ ६०
प्रह्लाद उवाच।
या या जायेत मे बुद्धिः सा सा विष्णो त्वदाश्रिता।
देवार्चने च निरता त्वच्चित्ता त्वत्परायणा ॥ ६१
नारायण उवाच।
एवं भविष्यत्यसुर वरमन्यं यमिच्छसि।
तं वृणीष्व महाबाहो प्रदास्याम्यविचारयन् ॥ ६२
प्रह्लाद उवाच।
सर्वमेव मया लब्धं त्वत्प्रसादादधोक्षज।
त्वत्पादपङ्कजाभ्यां हि ख्यातिरस्तु सदा मम ॥ ६३

"आप अच्युत, हृषीकेश, चक्रपाणि, धराधर, महामत्स्य, हयग्रीव तथा श्रेष्ठ कच्छप (कूर्मावतार) हैं।" (५१)

"आप श्रीमान्, हिरण्याक्ष रिपु, तथा भगवान् सूकर हैं। आप ही मेरे पिता के नाशक भगवान् नृसिंह हैं। (५२)

"आप ब्रह्मा, महादेव, इन्द्र, अग्नि, यमराज, वरुण और वायु हैं। हे विभो! हे नाथ! हे खगेन्द्रकेतु (गरुड़ध्वज)! आप सूर्य, चन्द्र तथा स्थावर और जंगम में आदि हैं।" (५३)

आप पृथ्वी, अग्नि, आकाश, जल हैं। सहस्रों रूपों से आप ने समस्त जगत् को व्याप्त किया है। हे माधव! कौन आप को जीतेगा? (५४)

"हे जगद्गुरो! हे हृषीकेश! आप भक्ति से ही सन्तुष्ट हो सकते हैं। हे सर्वगत! हे अविनाशी! आप दूसरे किसी प्रकार से नहीं जीते जा सकते।" (५५)

भगवान् ने कहा—हे सुव्रत! हे दैत्य! तुम्हारे इस स्तव से मैं सन्तुष्ट हूँ। हे दैत्य! इस अनन्य भक्ति से तुम्हारे द्वारा मैं पराजित हो गया हूँ। (५६)

"हे दैत्य! पराजित पुरुष दण्ड देता है। अस्तु, दण्ड के निमित्त मैं तुम्हें वर दूँगा। इच्छित वर माँगो।" (५७)

प्रह्लाद ने कहा—"हे नारायण! मैं वर माँगता हूँ जिसे आप दे सकते हैं। हे जगन्नाथ! आपके तथा नर के साथ युद्ध करने में मेरे शरीर, मन और वाणी से जो भी पाप हुआ हो वह नष्ट हो जाय। मुझे यही वर दें। (५८-५९)

नारायण ने कहा—"हे दैत्येन्द्र! ऐसा ही हो। तुम्हारा पाप नष्ट हो जाय। हे असुर! दूसरा वर माँगो। उसे भी मैं तुम्हें दूँगा।" (६०)

प्रह्लाद ने कहा—"हे विष्णु! मेरे भीतर जो जो बुद्धि उत्पन्न हो वह आपके ही आश्रित, देवार्चन में निरत और आपके चिन्तन में लगी रहे। (६१)

नारायण ने कहा—"हे असुर! ऐसा ही होगा। हे महाबाहो! अन्य जो वर तुम चाहो माँगो। मैं बिना विचारे तुम्हें दूँगा। (६२)

प्रह्लाद ने कहा—"हे अधोक्षज! आपके अनुग्रह से मुझे सब कुछ मिल गया। आपके चरणकमलों से मेरी प्रसिद्धि सदा बनी रहे।" (६३)

नारायण उवाच ।
एवमस्त्वपरं चास्तु नित्यमेवाक्षयोऽव्ययः ।
अजरश्चामरश्चापि मत्प्रसादाद् भविष्यसि ॥ ६४
गच्छस्व दैत्यशार्दूल स्वमावासं क्रियारत. ।
न कर्मबन्धो भवतो मच्चित्तस्य भविष्यति ॥ ६५
प्रशासयदमून् दैत्यान् राज्यं पालय शाश्वतम् ।
स्वजातिसदृशं दैत्य कुरु धर्ममनुत्तमम् ॥ ६६
पुलस्त्य उवाच ।
इत्युक्तो लोकनाथेन प्रह्लादो देवमब्रवीत् ।
कथं राज्यं समादास्ये परित्यक्तं जगद्गुरो ॥ ६७
तमुवाच जगत्स्वामी गच्छ त्वं निजमाश्रयम् ।
हितोपदेष्टा दैत्यानां दानवाना तथा भव ॥ ६८

नारायणेनैवमुक्तः स तदा दैत्यनायकः ।
प्रणिपत्य विभुं तुष्टो जगाम नगरं निजम् ॥ ६९
दृष्टः सभाजितश्चापि दानवैरन्धकेन च ।
निमन्त्रितश्च राज्याय न प्रत्यैच्छत्स नारद ॥ ७०
राज्यं परित्यज्य महाऽसुरेन्द्रो
नियोजयन् सत्पथि दानवेन्द्रान् ।
ध्यायन् स्मरन् केशवमप्रमेय
तस्थौ तदा योगविशुद्धदेहः ॥ ७१
एवं पुरा नारद दानवेन्द्रो
नारायणेनोत्तमपूरुषेण ।
पराजितश्चापि विमुच्य राज्यं
तस्थौ मनो धातरि सन्निवेश्य ॥ ७२

इति श्रीवामनपुराणे अष्टमोऽध्याय ॥८॥

नारायण ने कहा—"ऐसा ही होगा । इसके अतिरिक्त मेरे प्रसाद से तुम अक्षय, अविनाशी, अजर और अमर होगे । (६४)

"हे दैत्यशार्दूल ! अपने घर जाओ । सदा (धर्म) कार्य में रत रहो । मुझ में चित्त लगाये रखने से तुम्हें कर्म बन्धन नहीं होगा । (६५)

"इन दैत्यों का शासन करते हुए शाश्वत राज्य का पालन करो । हे दैत्य ! अपनी जाति के अनुकूल श्रेष्ठ धर्मों का अनुष्ठान करो ।" (६६)

पुलस्त्य ने कहा—लोकनाथ के ऐसा कहने पर प्रह्लाद ने भगवान् से कहा—"हे जगद्गुरो, परित्यक्त राज्य को कैसे ग्रहण करूँ ?" (६७)

जगत्स्वामी ने उससे कहा—"तुम अपने घर जाओ तथा दैत्यों एव दानवों क हितोपदेशक बनो । (६८)

नारायण के एसा कहने पर वे दैत्यनायक (प्रह्लाद) विभुको प्रणाम कर प्रसन्नतापूर्वक अपने नगर चले गये । (६९)

हे नारद ! अन्धक तथा दानवों ने प्रह्लाद को देखा तथा सम्मान किया और उन्हें राज्य स्वीकार करने के लिए निमन्त्रित किया, किन्तु उन्होंने राज्य नहीं स्वीकार किया । (७०)

महासुरेन्द्र (प्रह्लाद) राज्य को छोड़, दानवेन्द्रों को शुभ मार्ग मे नियोजित कर तथा अप्रमेय केशव का ध्यान और स्मरण करते हुए योग के द्वारा विशुद्ध शरीर होकर अव स्थित हुए । (७१)

हे नारद ! इस प्रकार, प्राचीन समय मे पुरुषोत्तम नारायण द्वारा पराजित दानवेन्द्र प्रह्लाद राज्य छोड़ कर विधाता नारायण में चित्त सलग्न कर अवस्थित हुए । (७२)

श्रीवामनपुराण म अष्टम अध्याय समाप्त ॥८॥

९

नारद उवाच ।
नेत्रहीनः कथं राज्ये प्रह्लादेनान्धको मुने ।
अभिषिक्तो जानताऽपि राजधर्मं सनातनम् ॥ १
पुलस्त्य उवाच ।
लब्धचक्षुरसौ भूयो हिरण्याक्षेऽपि जीवति ।
ततोऽभिषिक्तो दैत्येन प्रह्लादेन निजे पदे ॥ २
नारद उवाच ।
राज्येऽन्धकोऽभिषिक्तस्तु किमाचरत सुव्रत ।
देवादिभिः सह कथं समास्ते तद् वदस्व मे ॥ ३
पुलस्त्य उवाच ।
राज्येऽभिषिक्तो दैत्येन्द्रो हिरण्याक्षसुतोऽन्धकः ।
तपसाराध्य देवेशं शूलपाणिं त्रिलोचनम् ॥ ४
अजेयत्वमवध्यत्वं सुरसिद्धर्षिपन्नगैः ।
अदाह्यत्वं हुताशेन अक्लेद्यत्वं जलेन च ॥ ५
एवं स वरलब्धस्तु दैत्यो राज्यमपालयत् ।
शुक्रं पुरोहितं कृत्वा समध्यास्ते ततोऽन्धकः ॥ ६
ततश्चक्रे समुद्योग देवानामन्धकोऽसुरः ।
आक्रम्य वसुधां सर्वां मनुजेन्द्रान् पराजयत् ॥ ७
पराजित्य महीपालान् सहायार्थे नियोज्य च ।
तैः समं मेरुशिखरं जगामाद्भुतदर्शनम् ॥ ८
शक्रोऽपि सुरसैन्यानि समुद्योज्य महागजम् ।
समारुह्यामरावत्यां गुप्तिं कृत्वा विनिर्ययौ ॥ ९
शक्रस्यानु तथैवान्ये लोकपाला महौजसः ।
आरुह्य वाहनं स्वं स्वं सायुधा निर्ययुर्बहिः ॥ १०
देवसेनाऽपि च समं शक्रेणाद्भुतकर्मणा ।
निर्जगामातिवेगेन गजवाजिरथादिभिः ॥ ११
अग्रतो द्वादशादित्याः पृष्ठतश्च त्रिलोचनाः ।
मध्येऽष्टौ वसवो विश्वे साध्याश्विमरुतां गणाः ।

९

नारद ने कहा—"हे मुने ! सनातन राजधर्म जानते हुए भी प्रह्लाद ने नेत्रहीन अन्धक को क्यों राज्याभिषिक्त किया ? (१)

पुलस्त्य ने कहा—हिरण्याक्ष के जीवित रहने के समय ही पुन उसे दृष्टि प्राप्त हो गई थी। इसी से दैत्य प्रह्लाद ने अपने पद पर इसे अभिषिक्त किया। (२)

नारद ने कहा—"हे सुव्रत ! मुझे यह बतलाइये कि अन्धक ने राज्याभिषिक्त होकर क्या किया तथा देवादिकों के साथ कैसा व्यवहार किया ? (३)

पुलस्त्य ने कहा—हिरण्याक्षतनय दैत्येन्द्र अन्धक ने राज्याभिषिक्त होकर तपस्या द्वारा देवेश शूलपाणि त्रिलोचन की आराधना कर उनसे सुर, सिद्ध, ऋषि एवं पन्नगों द्वारा अजेयत्व तथा अवध्यत्व, अग्नि के द्वारा अदाह्यत्व (जलाया न जाना) और जल से अक्लेद्यत्व (भिगोया न जाना) रूप वरदान प्राप्त कर राज्य का पालन किया और शुक्राचार्य को पुरोहित पद पर नियुक्त कर निवास करने लगा। (४-६)

तदनन्तर अन्धकासुर ने देवताओं को जीतने का उद्योग किया तथा सम्पूर्ण पृथ्वी को आक्रान्त कर श्रेष्ठ राजाओं को पराजित कर दिया। (७)

राजाओं को पराजित कर तथा उन्हें अपनी सहायता मे नियुक्त कर उनके साथ वह मेरु पर्वत के देखने मे अद्भुत शिखर पर पहुँचा। (८)

इन्द्र भी देव सेना को सजा कर महागज ऐरावत पर आरूढ होकर अमरावती मे सुरक्षा की व्यवस्था कर बाहर निकले। (९)

अन्यान्य महातेजस्वी आयुधधारी लोकपालगण अपने-अपने वाहनों पर सवार होकर इन्द्र के पीछे-पीछे बाहर निकल पड़े। (१०)

अद्भुतकर्मा इन्द्र के साथ हाथी घोड़े रथ आदि से युक्त देवसेना भी बडे वेग से निकल पड़ी। (११)

अग्रभाग में द्वादश आदित्य, पृष्ठभाग में त्रिलोचन,

यक्षविद्याधराद्याश्च स्वं स्वं वाहनमास्थिताः ॥ १२

नारद उवाच ।

रुद्रादीनां वदस्वेह वाहनानि च सर्वशः ।
एकैकस्यापि धर्मज्ञ परं कौतूहलं मम ॥ १३

पुलस्त्य उवाच ।

शृणुष्व कथयिष्यामि सर्वेषामपि नारद ।
वाहनानि समासेन एकैकस्यानुपूर्वशः ॥ १४
रुद्रहस्ततलोत्पन्नो महावीर्यो महाजवः ।
श्वेतवर्णो गजपतिर्देवराजस्य वाहनम् ॥ १५
रुद्रोरुसंभवो भीमः कृष्णवर्णो मनोजवः ।
पौण्ड्को नाम महिषो धर्मराजस्य नारद ॥ १६
रुद्रकर्णमलोद्भूतः श्यामो जलधिसंज्ञकः ।
शिशुमारो दिव्यगतिः वाहनं वरुणस्य च ॥ १७
रौद्रः शकटचक्राक्षः शैलाकारो नरोत्तमः ।
अम्बिकापादसम्भूतो वाहनं धनदस्य तु ॥ १८
एकादशानां रुद्राणां वाहनानि महामुने ।
गन्धर्वाश्च महावीर्या भुजगेन्द्राश्च दारुणाः ।
श्वेतानि सौरमेयाणि वृषाण्युग्रजवानि च ॥ १९
रथं चन्द्रमसश्चार्द्धसहस्रं हंसवाहनम् ।
हरयो रथवाहाश्च आदित्या मुनिसत्तम ॥ २०
कुञ्जरस्थाश्च वसवो यक्षाश्च नरवाहनाः ।
किन्नरा भुजगारूढा हयारूढौ तथाश्विनौ ॥ २१
सारङ्गाधिष्ठिता ब्रह्मन् मरुतो घोरदर्शनाः ।
शुकारूढाश्च कवयो गन्धर्वाश्च पदातिनः ॥ २२
आरुह्य वाहनान्येवं स्वानि स्वान्यमरोत्तमाः ।
सन्नह्य निर्ययुर्हृष्टा युद्धाय सुमहौजसः ॥ २३

नारद उवाच ।

गदितानि सुरादीनां वाहनानि त्वया मुने ।
दैत्यानां वाहनान्येव यथावद् वक्तुमर्हसि ॥ २४

पुलस्त्य उवाच ।

शृणुष्व दानवादीनां वाहनानि द्विजोत्तम ।
कथयिष्यामि तत्त्वेन यथावच्छ्रोतुमर्हसि ॥ २५

(रुद्रगण), मध्य में आठोंवसु, विश्वेदेव, साध्य, अश्विनीकुमार, मरुद्गण, यक्ष, विद्याधर आदि अपने-अपने वाहन पर अधिष्ठित होकर चलने लगे । (१२)

नारद ने कहा—"हे धर्मज्ञ ! रुद्र आदि के वाहनों का एक एक कर पूर्णतया वर्णन कीजिये । इस विषय में मुझे बहुत कौतूहल हो रहा है । (१३)

पुलस्त्य ने कहा—हे नारद ! सुनो, मैं एक एक करके क्रमश सभी के वाहनों का सक्षेप में वर्णन करता हूँ । (१४)

रुद्र के करतल से उत्पन्न महावीर्ययुक्त एवं अति वेगवान् शुक्लवर्ण वाला गजपति (ऐरावत) देवराज का वाहन है । (१५)

हे नारद ! रुद्र के ऊरु से उत्पन्न भयकर, कृष्णवर्ण वाला एव मन के सदृश वेगवान् पौण्ड्रक नामक महिष धर्मराज का वाहन है । (१६)

रुद्र के कर्ण-मल से उत्पन्न श्यामवर्ण वाला दिव्यगति शील जलधि नामक शिशुमार वरुण का वाहन है । (१७)

अम्बिका के चरणों से उत्पन्न भयकर, गाड़ी के चक्रवत् चक्षुवाला, पर्वताकार नरोत्तम कुबेर का वाहन है । (१८)

हे महामुने ! एकादश रुद्रों के वाहन महावीर्यशाली गन्धर्वगण, दारुण भुजगेन्द्रगण तथा सुरभि के अश से उत्पन्न तीव्रगति वाले श्वेत वृषभ हैं । (१९)

हे मुनिश्रेष्ठ ! चन्द्रमा के रथ के वाहक अर्ध सहस्र (पाँच सौ) हस हैं । आदित्यों के रथ के वाहक घोडे हैं । (२०)

वसुओं के वाहन कुजर, यक्षों के वाहन नर, किन्नरों के वाहन सर्प एव अश्विनीकुमारों के वाहन अश्व हैं । (२१)

हे ब्रह्मन् ! भयंकर दीखने वाले मरुद्गणों के वाहन सारङ्ग हैं, कवियों (भृगुओं) के वाहन शुक हैं तथा गन्धर्वलोग पदाति हैं । (२२)

इस प्रकार अतितेजस्वी श्रेष्ठ देवगण अपने-अपने वाहनों पर आरूढ एव सन्नद्ध होकर हर्षपूर्वक युद्धार्थ निकले । (२३)

नारद ने कहा—हे मुने ! आपने देवादिकों के वाहनों का वर्णन किया । इसी प्रकार अब दैत्यों के वाहनों का यथा वत् वर्णन करें । (२४)

पुलस्त्य ने कहा—हे द्विजोत्तम ! दानवों के वाहन को सुनो ! मैं तत्त्वत यथावत् वर्णन करता हूँ । (२५)

अन्धकस्य रथो दिव्यो युक्तः परमवाजिभिः ।
कृष्णवर्णैः सहस्रारस् त्रिनल्वपरिमाणवान् ॥ २६

प्रह्लादस्य रथो दिव्यश्चन्द्रवर्णैर्हयोत्तमैः ।
उह्यमानस्तथाऽष्टाभिः श्वेतरुक्ममयः शुभः ॥ २७

विरोचनस्य च गजः कुजम्भस्य तुरंगमः ।
जम्भस्य तु रथो दिव्यो हयैः काञ्चनसन्निभैः ॥ २८

शङ्कुकर्णस्य तुरगो हयग्रीवस्य कुञ्जरः ।
रथो मयस्य विख्यातो दुन्दुभेश्च महोरगः ।
शम्बरस्य विमानोऽभूदयःशङ्कोर्मृगाधिपः ॥ २९

बलवृत्रौ च बलिनौ गदामुसलधारिणौ ।
पद्भ्यां दैवतसैन्यानि अभिद्रवितुमुद्यतौ ॥ ३०

ततो रणोऽभूत् तुमुलः संकुलोऽतिभयंकरः ।
रजसा संवृतो लोको पिङ्गवर्णेन नारद ॥ ३१

नाज्ञासीच पिता पुत्रं न पुत्रः पितरं तथा ।
स्वानेवान्ये निजघ्नुर्वै परानन्ये च सुव्रत ॥ ३२

अभिद्रुतो महावेगो रथोपरि रथस्तदा ।
गजो मत्तगजेन्द्रं च सादी सादिनमभ्यगात् ॥ ३३

पदातिरपि संक्रुद्धः पदातिनमथोल्बणम् ।
परस्परं तु प्रत्यघ्नन्नन्योन्यजयकाङ्क्षिणः ॥ ३४

ततस्तु संकुले तस्मिन् युद्धे दैवासुरे मुने ।
प्रावर्तत नदी घोरा शमयन्ती रणाद्रजः ॥ ३५

शोणितोदा रथावर्त्ता योधसंघट्टवाहिनी ।
गजकुम्भमहाकूर्मा शरमीना दुरत्यया ॥ ३६

तीक्ष्णाग्रप्रासमकरा महासिग्राहवाहिनी ।
अन्त्रशैवालसंकीर्णा पताकाफेनमालिनी ॥ ३७

गृध्रकङ्कमहाहंसा श्येनचक्राह्वमण्डिता ।
वनवायसकादम्बा गोमायुश्वापदाकुला ॥ ३८

पिशाचमुनिसंकीर्णा दुस्तरा प्राकृतैर्जनैः ।
रथप्लवैः संतरन्तः शूरास्तां प्रजगाहिरे ॥ ३९

आगुल्फादवमज्जन्तः सूदयन्तः परस्परम् ।

अन्धक का अलौकिक रथ कृष्णवर्ण के श्रेष्ठ अश्वों से परिचालित है एवं सहस्र अरों (पहिये की नाभि और नेमि के बीच की लकड़ियों) से युक्त और बारह सौ हाथ परिमाण वाला है। (२६)

प्रह्लाद का श्वेतरुक्ममय सुन्दर दिव्य रथ चन्द्रवर्ण-वाले आठ उत्तम अश्वों से वाहित होता है। (२७)

विरोचन का वाहन हाथी एवं कुजम्भ का घोडा है तथा जम्भ का दिव्य रथ काञ्चन तुल्य अश्वों से युक्त है। (२८)

शंकुकर्ण का वाहन अश्व, हयग्रीव का वाहन हाथी, मय दानव का विख्यात रथ एवं दुन्दुभि का वाहन विशाल उरग है। शम्बर का वाहन विमान तथा अय शंकु का वाहन सिंह है। (२९)

गदा और मुसलधारी बलवान बल और वृत्र पैदल ही देवताओं की सेना पर चढाई करने के लिये उद्यत थे। (३०)

तदनन्तर अति भयकर घमासान युद्ध हुआ। हे नारद! समस्त लोक पीली धूल से आवृत हो गया जिससे पिता पुत्र को तथा पुत्र पिता को पहचान नहीं पाते थे। हे सुव्रत! कुछ लोग अपने ही पक्ष के लोगों को तथा कुछ लोग विरोधी पक्ष के लोगों को मारने लगे। (३१-३२)

रथ के ऊपर रथ वेग से आक्रमण करने लगे। हाथी मतवाले हाथी के ऊपर तथा घुड़सवार घुड़सवारों की ओर बढे। पैदल सैनिक ने क्रुद्ध होकर अन्य बलशाली पैदल पर आक्रमण किया एवं इस प्रकार ये एक दूसरे को जीतने की इच्छा से परस्पर प्रहार करने लगे। (३३-३४)

हे बलि! पूर्वकाल में तुमने परमभक्तिपूर्वक मेरी आराधना की थी। अतः मेरे कहने से सुतल नामक पाताल में जाकर मेरे आदेश का यथावत् पालन करते हुये देव-सुख से सम्पन्न सैकड़ों प्रासादों से पूर्ण विकसित कमलों वाले सरोवरों, ह्रदों एवं शुद्ध श्रेष्ठ सरिताओं वाले उस स्थान पर निवास करो। हे दानवेश्वर! सुगन्ध धारण कर, श्रेष्ठ आभरणों से भूषित एवं माला तथा चन्दनादि से अलङ्कृत सुन्दर स्वरूप से तुम नृत्य और गीत से युक्त विविध प्रकार के महान् भोगों का उपभोग करते हुये सैकड़ों स्त्रियों से आवृत होकर इतने काल तक मेरी आज्ञा से वहाँ निवास करो। जब तक देवताओं एवं ब्राह्मणों से तुम विरोध न करोगे तब तक समस्त कामनाओं से युक्त भोगों को भोगोगे। किन्तु जब तुम देवों एवं ब्राह्मणों के साथ विरोध करोगे तो देखने में भयंकर वरुण के पाश तुम्हें बाँधेंगे। (७१-७६)

बलि ने कहा—हे भगवन्! हे देव! आपकी आज्ञा से वहाँ पाताल में निवास करने वाले मेरे भोगों की सामग्री क्या होगी? जिससे तृप्त होकर मैं सदा आपका स्मरण

आप्यायितो येन देव स्मरेयं त्वामहं सदा ॥ ७७

श्रीभगवानुवाच ।

दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च ।
हुतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥ ७८

अदक्षिणास्तथा यज्ञा. क्रियाश्चाविधिना कृताः ।
फलानि तव दास्यन्ति अधीतान्यव्रतानि च ॥ ७९

उदकेन विना पूजा विना दर्भेण या क्रिया ।
आज्येन च विना होमं फलं दास्यन्ति ते बले ॥ ८०

यश्चेदं स्थानमाश्रित्य क्रियाः काश्चित्करिष्यति ।
न तत्र चासुरो भागो भविष्यति कदाचन ॥ ८१

ज्येष्ठाश्रमे महापुण्ये तथा विष्णुपदे ह्रदे ।
ये च श्राद्धानि दास्यन्ति व्रतं नियममेव च ॥ ८२

क्रिया कृता च या काचिद् विधिनाऽविधिनापि वा ।
सर्वं तदक्षयं तस्य भविष्यति न संशयः ॥ ८३

ज्येष्ठे मासि सिते पक्षे एकादश्यामुपोषितः ।
द्वादश्यां वामनं दृष्ट्वा स्नात्वा विष्णुपदे ह्रदे ।

करूँगा । (७७)

श्रीभगवान् ने कहा—अविधिपूर्वक दिये गये दान, श्रोत्रिय ब्राह्मण रहित श्राद्ध तथा बिना श्रद्धा के किये गये जो हवन हैं वे तुम्हें फल देंगे । (७८)

दक्षिणा रहित यज्ञ, अविधिपूर्वक किये गये कर्म और व्रतरहित अध्ययन तुम्हें फल प्रदान करेंगे । (७९)

हे बलि ! जल के बिना की गई पूजा, बिना कुश की की गई क्रिया और बिना घी के किये गये हवन तुमको फल देंगे । (८०)

इस स्थान का आश्रय कर जो मनुष्य किन्हीं भी क्रियाओं को करेगा, उसमें कभी भी असुरों का अधिकार न होगा । (८१)

अत्यन्त पवित्र ज्येष्ठाश्रम तथा विष्णुपद सरोवर में जो श्राद्ध, दान, व्रत, या नियम करेगा एव विधि या अविधि पूर्वक जो कोई क्रिया वहाँ की जायेगी उसके लिये वह सभी निस्सन्देह अक्षय फलदायी होगा । (८२-८३)

ज्येष्ठ मास के शुक्ल पक्ष में एकादशी के दिन उपवास कर द्वादशी के दिन विष्णुपद ह्रद में स्नान करके तथा वामन का दर्शन करने के उपरान्त यथाशक्ति दान देकर

दानं दत्त्वा यथाशक्त्या प्राप्नोति परमं पदम् ॥ ८४

लोमहर्षण उवाच ।

बलेर्वरमिमं दत्त्वा शक्राय च त्रिविष्टपम् ।
व्यापिना तेन रूपेण जगामादर्शनं हरिः ॥ ८५

शशास च यथापूर्वमिन्द्रस्त्रैलोक्यमूर्जितः ।
निःशेषं च तदा कालं बलिः पातालमास्थित. ॥ ८६

इत्येतत् कथितं तस्य विष्णोर्माहात्म्यमुत्तमम् ।
वामनस्य शृण्वन् यस्तु सर्वपापैः प्रमुच्यते ॥ ८७

बलिप्रह्लादसंवादं मन्त्रितं बलिशुक्रयोः ।
बलेर्विष्णोश्च चरित ये स्मरिष्यन्ति मानवाः ॥ ८८

नाधयो व्याधयस्तेषां न च मोहाकुलं मनः ।
भविष्यति द्विजश्रेष्ठा. पुंसस्तस्य कदाचन ॥ ८९

च्युतराज्यो निजं राज्यमिष्टप्राप्तिं वियोगवान् ।

मनुष्य परम पद को प्राप्त करता है । (८४)

लोमहर्षण ने कहा—बलि को यह वर तथा इन्द्र को त्रिविष्टप देकर भगवान् उस सर्वव्यापी रूप से तिरोहित हो गये । (८५)

(तदनन्तर) बलवान् इन्द्र पूर्ववत् त्रैलोक्य का शासन करने लगे एव बलि ने सम्पूर्ण समय पाताल में निवास किया । (८६)

इस प्रकार उन भगवान् (वामन) विष्णु का उत्तम माहात्म्य कहा गया जो इसे (वामन माहात्म्य को) सुनेगा वह सभी पापों से मुक्त हो जायेगा । (८७)

हे द्विजश्रेष्ठो ! बलि एव प्रह्लाद के सम्वाद, बलि एवं शुक्र की मन्त्रणा तथा बलि एव विष्णु के चरित का जो मनुष्य स्मरण करेंगे उन्हें कभी कोई आधि एव व्याधि न होगी तथा उनका मन भी मोहाकुल नहीं होगा । (८८-८९)

हे महाभागो ! इस कथा को सुनकर राज्यच्युत व्यक्ति अपने राज्य को एव वियोगी मनुष्य अपने प्रिय को प्राप्त

समाप्नोति महाभागा नरः श्रुत्वा कथामिमाम् ॥ ९०
ब्राह्मणो वेदमाप्नोति क्षत्रियो जयते महीम् ।
वैश्यो धनसमृद्धिं च शूद्रः सुखमवाप्नुयात् ।
वामनस्य च माहात्म्यं शृण्वन् पापैः प्रमुच्यते ॥ ९१

इति श्रीवामनपुराणे सरोमाहात्म्ये दशमोऽध्याय ॥१०॥

११

ऋषय ऊचुः ।
कथमेषा समुत्पन्ना नदीनामुत्तमा नदी ।
सरस्वती महाभागा कुरुक्षेत्रप्रवाहिनी ॥ १
कथं सरः समासाद्य कृत्वा तीर्थानि पार्श्वतः ।
प्रयाता पश्चिमामाशां दृश्यादृश्यगतिः शुभा ।
एतद् विस्तरतो ब्रूहि तीर्थवंशं सनातनम् ॥ २
लोमहर्षण उवाच ।
प्लक्षवृक्षात् समुद्भूता सरिच्छ्रेष्ठा सनातनी ।
सर्वपापक्षयकरी स्मरणादेव नित्यशः ॥ ३
सैषा शैलसहस्राणि विदार्य च महानदी ।
प्रविष्टा पुण्यतोयौघा वनं द्वैतमिति स्मृतम् ॥ ४
तस्मिन् प्लक्षे स्थितां दृष्ट्वा मार्कण्डेयो महामुनिः ।
प्रणिपत्य तदा मूर्ध्ना तुष्टावाथ सरस्वतीम् ॥ ५
त्वं देवि सर्वलोकानां माता देवारणिः शुभा ।
सदसद् देवि यत्किंचिन्मोक्षदाय्यर्थवत् पदम् ॥ ६
तत् सर्वं त्वयि संयोगि योगिवद् देवि संस्थितम् ।
अक्षरं परमं देवि यत्र सर्वं प्रतिष्ठितम् ।
अक्षरं परमं ब्रह्म विश्वं चैतत् क्षरात्मकम् ॥ ७

करता है। (९०)
(इसको सुनने से) ब्राह्मण को वेद की प्राप्ति होती है, क्षत्रिय पृथ्वी की जय प्राप्त करता है तथा वैश्य को धन समृद्धि एवं शूद्र को सुख की प्राप्ति होती है। वामन का माहात्म्य सुनने से पापों से मुक्ति होती है। (९१)

श्रीवामनपुराण के सरोमाहात्म्य मे दसवाँ अध्याय समाप्त ॥१०॥

११

ऋषियों ने पूछा—कुरुक्षेत्र मे प्रवाहित होने वाली नदियों में श्रेष्ठ महाभागा यह सरस्वती नदी कैसे उत्पन्न हुई ? (१)

सरोवर मे जाकर पार्श्वों मे तीर्थों की सृष्टि करते हुये दृश्यादृश्य गति से यह शुभ नदी किस प्रकार पश्चिम दिशा को गई ? विस्तारपूर्वक इस सनातन तीर्थ वंश (परम्परा-क्रम, विस्तार) का वर्णन करे। (२)

लोमहर्षण ने कहा—स्मरणमात्र से नित्य सर्वपापक्षय करने वाली यह सनातनी श्रेष्ठ नदी प्लक्षवृक्ष से समुद्भूत हुई है। (३)

यह पुण्यसलिला महानदी हजारों पर्वतों को विदारित कर द्वैतनाम से प्रसिद्ध वन मे प्रविष्ट हुई। (४)

महामुनि मार्कण्डेय ने उस प्लक्ष मे सरस्वती को स्थित देखकर शिर से प्रणाम करने के उपरान्त उसकी स्तुति की— (५)

हे देवि ! आप सर्वलोकों की माता एवं देवों की शुभ अरणि (उत्पादक = जननी) हैं। हे देवि ! समस्त सद्, असद्, मोक्षदायी एवं अर्थयुक्त पद योगयुक्त पदार्थ की भाँति आप मे संयुक्त होकर स्थित हैं। हे देवि ! अक्षर परम ब्रह्म, तथा यह विनाशशील विश्व आप में प्रतिष्ठित है। (६-७)

दारुण्यवस्थितो वह्निर्भूमौ गन्धो यथा ध्रुवम् ।
तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः ॥ ८
ॐकाराक्षरसंस्थानं यत् तद् देवि स्थिरास्थिरम् ।
तत्र मात्रात्रयं सर्वमस्ति यद् देवि नास्ति च ॥ ९
त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम् ।
त्रीणि ज्योतींषि वर्गाश्च त्रयो धर्मादयस्तथा ॥ १०
त्रयो गुणास्त्रयो वर्णास्त्रयो देवास्तथा क्रमात् ।
त्रैधातवस्तथाऽवस्थाः पितरश्चैवमादयः ॥ ११
एतन्मात्रात्रयं देवि तव रूपं सरस्वति ।
विभिन्नदर्शनामाद्यां ब्रह्मणो हि सनातनीम् ॥ १२
सोमसंस्था हविःसंस्था पाकसंस्था सनातनी ।
तास्त्वदुच्चारणाद् देवि क्रियन्ते ब्रह्मवादिभिः ॥ १३
अनिर्देश्यपदं त्वेतदर्द्धमात्राश्रितं परम् ।
अविकार्यक्षयं दिव्यं परिणामविवर्जितम् ॥ १४
तवैतत् परमं रूपं यन्न शक्यं मयोदितुम् ।
न चास्येन न वा जिह्वाताल्वोष्ठादिभिरुच्यते ॥ १५
स विष्णुः स वृषो ब्रह्मा चन्द्रार्कज्योतिरेव च ।
विश्वावासं विश्वरूपं विश्वात्मानमनीश्वरम् ॥ १६
साङ्ख्यसिद्धान्तवेदोक्तं बहुशाखास्थिरीकृतम् ।
अनादिमध्यनिधनं सदसच्च सदेव तु ॥ १७
एकं त्वनेकधाप्येकभाववेदसमाश्रितम् ।
अनाख्यं षड्गुणाख्यं च बह्वाख्यं त्रिगुणाश्रयम् ॥ १८
नानाशक्तिविभावज्ञं नानाशक्तिविभावकम् ।
सुखात् सुखं महत्सौख्यं रूपं तत्त्वगुणात्मकम् ॥ १९
एवं देवि त्वया व्याप्तं सकलं निष्कलं च यत् ।
अद्वैतावस्थितं ब्रह्म यच्च द्वैते व्यवस्थितम् ॥ २०
येऽर्था नित्या ये विनश्यन्ति चान्ये
येऽर्थाः स्थूला ये तथा सन्ति सूक्ष्माः ।
ये वा भूमौ येऽन्तरिक्षेऽन्यतो वा
तेषां देवि त्वत्त एवोपलब्धिः ॥ २१

जिस प्रकार काष्ठ मे वह्नि एव भूमि मे गन्ध की शाश्वत स्थिति होती है उसी प्रकार तुम्हारे भीतर ब्रह्म एव यह सम्पूर्ण जगत् स्थित है । (८)

हे देवि! जो कुछ भी स्थिर तथा अस्थिर है वह सब ओंकार अक्षर में स्थित है। जो कुछ भी अस्ति या नास्ति है उन सब मे ओंकार की तीन मात्रायें अनुस्यूत है। (९)

(भू, भुव, स्व) तीनों लोक, (ऋक्, यजु, साम) तीन वेद, (आयुर्वेद, धनुर्वेद, गान्धर्व) तीन विद्यायें, (गार्हपत्य, आवहनीय, दक्षिणाग्नि) तीन अग्नियाँ, (सूर्य, चन्द्र, अग्नि) तीनों ज्योतियाँ, (धर्मादि) तीन वर्ग, (सत्त्वादि) तीनों गुण, (ब्राह्मणादि) तीनों वर्ण, तीनों देव, (वात, पित्त, कफ) तीनों धातुएँ तथा (जाग्रत, स्वप्न, सुषुप्ति), तीन अवस्थायें एव तीन (पिता आदि) पितर आदि ये सभी मात्रा त्रय, हे सरस्वति! आप के रूप हैं। आप को ब्रह्म की विभिन्न रूपों वाली आद्या एव सनातनी (मूर्त्ति कहा जाता है)। (१०-१२)

हे देवि! ब्रह्मवादी लोग आप के नाम का उच्चारण करके सोमसस्था, हविःसस्था एव सनातनी पाकसस्था को करते हैं। (१३)

अर्धमात्रा में आश्रित आप का यह अनिर्देश्य पद अविकारी, अक्षय, दिव्य तथा अपरिणामी है। (१४)

यह आप का अनिर्देश्य पद परम रूप है जिसका वर्णन मैं नहीं कर सकता। न तो मुख से ही इसका वर्णन हो सकता है और न जिह्वा, तालु, ओष्ठादि से ही। (१५)

तुम्हारा यह रूप ही विष्णु, वृष (धर्म) ब्रह्मा, चन्द्रमा, सूर्य एव ज्योति है। उसी को विश्वावास, विश्वरूप, विश्वात्मा एव अनीश्वर (स्वतन्त्र) कहते हैं। (१६)

आप का यह रूप साख्य सिद्धान्त तथा वेद द्वारा वर्णित, बहुत सी शाखाओं द्वारा स्थिर किया हुआ, आदि मध्य अन्त विहीन, सत्-असत् तथा एकमात्र सत् है। (१७)

यह एक तथा अनेक प्रकार का, वेदों द्वारा एकाग्र भक्ति से आश्रित, आख्या विहीन, ऐश्वर्यादि षड्गुणों से युक्त, बहुत सी आख्याओं वाला तथा त्रिगुणाश्रय है। (१८)

आप का यह तत्त्वगुणात्मक रूप नाना शक्तियों के विभाव (उद्भव) को जानने वाला, तथा नाना शक्तियों का विभावक (जनक) है। वह सुखों से बढकर सुख तथा महत्सुख है। (१९)

हे देवि! इस प्रकार से अद्वैत तथा द्वैत मे आश्रित निष्कल तथा सकल ब्रह्म आप के द्वारा व्याप्त है। (२०)

हे देवि! जो पदार्थ नित्य हैं तथा जो विनष्ट हो जाने वाले हैं, जो पदार्थ स्थूल हैं तथा जो सूक्ष्म हैं, जो भूमि पर हैं तथा जो अन्तरिक्ष मे हैं या जो अन्यत्र हैं उन समस्त पदार्थों की उपलब्धि आप से ही होती है। (२१)

यद्वा मूर्तं यदमूर्तं समस्तं
यद्वा भूतेष्वेकमेकं च किंचित्।
यच्च द्वैते व्यस्तभूतं च लक्ष्य
तत्संबद्धं त्वत्स्वरैर्व्यञ्जनैश्च ॥ २२
एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती।
प्रत्युवाच महात्मानं मार्कण्डेयं महामुनिम्।
यत्र त्वं नेष्यसे विप्र तत्र यास्याम्यतन्द्रिता ॥ २३

मार्कण्डेय उवाच।

आद्यं ब्रह्मसरः पुण्यं ततो रामह्रदः स्मृतः।
कुरुणा ऋषिणा कृष्टं कुरुक्षेत्रं ततः स्मृतम्।
तस्य मध्येन वै गाढं पुण्या पुण्यजलावहा ॥ २४

इति श्रीवामनपुराणे सरोमाहात्म्ये एकादशोऽध्याय ॥११॥

१२

लोमहर्षण उवाच।

इत्युपेर्वचनं श्रुत्वा मार्कण्डेयस्य धीमतः।
नदी प्रवाहसंयुक्ता कुरुक्षेत्रं विवेश ह ॥ १
तत्र सा रन्तुकं प्राप्य पुण्यतोया सरस्वती।
कुरुक्षेत्रं समाप्लाव्य प्रयाता पश्चिमां दिशम् ॥ २
तत्र तीर्थसहस्राणि ऋषिभिः सेवितानि च।
तान्यहं कीर्तयिष्यामि प्रसादात् परमेष्ठिनः ॥ ३
तीर्थानां स्मरणं पुण्यं दर्शनं पापनाशनम्।

जो मूर्त्त है या जो अमूर्त्त है यह सब कुछ और जो सब भूतों में एक रूप से स्थित है और जो केवल एक मात्र है और जो द्वैत में अलग अलग रूप से दिखाई पड़ता है वह सब कुछ आपके स्वर व्यञ्जनों से सम्बद्ध है। (२२)

इस प्रकार स्तुति किये जाने पर विष्णु की जिह्वा स्वरूपिणी सरस्वती ने महामुनि महात्मा मार्कण्डेय से कहा—हे विप्र! तुम जहाँ ले जाओगे मैं वहाँ आलस्य रहित होकर जाऊँगी। (२३)

मार्कण्डेय ने कहा—पूर्वकाल में पवित्र ब्रह्मसर (नाम से प्रसिद्ध) तदनन्तर रामह्रद (नाम से) अभिहित एवं तदुपरान्त कुरु ऋषि द्वारा कृष्ट होने से कुरुक्षेत्र कहे जाने वाले क्षेत्र मे आप अत्यन्त पवित्र तथा पुण्यजलवाली हों अर्थात् वहाँ प्रवाहित हों। (२४)

श्रीवामनपुराण के सरोमाहात्म्य में ग्यारहवा अध्याय समाप्त ॥११॥

१२

लोमहर्षण ने कहा—बुद्धिमान् मार्कण्डेय ऋषि के इस वचन को सुनकर प्रवाह-संयुक्त नदी कुरुक्षेत्र मे प्रविष्ट हुई। (१)

वह पुण्यतोया सरस्वती नदी वहाँ रन्तुक में जाकर कुरुक्षेत्र को प्लावित करती हुई पश्चिम दिशा की ओर चली गई। (२)

वहाँ (कुरुक्षेत्र मे) ऋषियों से सेवित सहस्रों तीर्थ हैं। परमेष्ठी (ब्रह्मा) के प्रसाद से मैं उनका वर्णन करूँगा। (३)

पापियों के लिये भी तीर्थों का स्मरण पुण्यदायक, उनका दर्शन पापनाशक और स्नान मुक्तिदायक कहा

स्नानं मुक्तिकरं प्रोक्तमपि दुष्कृतकर्मणः ॥ ४
ये स्मरन्ति च तीर्थानि देवताः प्रीणयन्ति च ।
स्नान्ति च श्रद्धानाश्च ते यान्ति परमां गतिम् ॥ ५
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् कुरुक्षेत्रं स बाह्याभ्यन्तरः शुचिः ॥ ६
कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।
इत्येवं वाचमुत्सृज्य सर्वपापैः प्रमुच्यते ॥ ७
ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरुक्ता चतुर्विधा ॥ ८
सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ ९
दूरस्थोऽपि कुरुक्षेत्रे गच्छामि च वसाम्यहम् ।
एवं यः सततं ब्रूयात् सोऽपि पापैः प्रमुच्यते ॥ १०
तत्र चैव सरःस्नायी सरस्वत्यास्तटे स्थितः ।
तस्य ज्ञानं ब्रह्ममयमुत्पत्स्यति न संशयः ॥ ११

देवता ऋषयः सिद्धाः सेवन्ते कुरुजाङ्गलम् ।
तस्य संसेवनान्नित्यं ब्रह्म चात्मनि पश्यति ॥ १२
चञ्चलं हि मनुष्यत्वं प्राप्य ये मोक्षकाङ्क्षिणः ।
सेवन्ति नियतात्मानो अपि दुष्कृतकारिणः ॥ १३
ते विमुक्ताश्च कलुषैरनेकजन्मसंभवैः ।
पश्यन्ति निर्मलं देवं हृदयस्थं सनातनम् ॥ १४
ब्रह्मवेदिः कुरुक्षेत्रं पुण्यं सान्निहितं सरः ।
सेवमाना नरा नित्यं प्राप्नुवन्ति परं पदम् ॥ १५
ग्रहनक्षत्रताराणां कालेन पतनाद् भयम् ।
कुरुक्षेत्रे मृतानां च पतनं नैव विद्यते ॥ १६
यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः ।
गन्धर्वाप्सरसो यक्षाः सेवन्ति स्थानकाङ्क्षिणः ॥ १७
गत्वा तु श्रद्धया युक्तः स्नात्वा स्थाणुमहाह्रदे ।
मनसा चिन्तितं कामं लभते नात्र संशयः ॥ १८

गया है। (४)

जो श्रद्धा-सहित तीर्थों का स्मरण करते हैं, देवताओं को प्रसन्न करते हैं और उनमें स्नान करते हैं, वे परम गति को प्राप्त करते हैं। (५)

अपवित्र या पवित्र अथवा सर्वावस्थाप्राप्त भी जो व्यक्ति कुरुक्षेत्र का स्मरण करे तो वह बाहर तथा भीतर से पवित्र हो जाता है। (६)

'मैं कुरुक्षेत्र में जाऊँगा और मैं कुरुक्षेत्र में निवास करूँगा' इस प्रकार का वचन कहने से मनुष्य सभी पापों से मुक्त हो जाता है। (७)

मानवों के लिये ब्रह्मज्ञान, गया में श्राद्ध, गौओं की रक्षा के लिये मृत्यु और कुरुक्षेत्र में निवास, यह चार प्रकार की मुक्ति कही गई है। (८)

सरस्वती और दृषद्वती इन दो देव नदियों के मध्य के देव निर्मित देश को ब्रह्मावर्त कहते हैं। (९)

दूर रहकर भी जो मनुष्य "मैं कुरुक्षेत्र जाऊँगा, वहाँ निवास करूँगा" इस प्रकार सदा कहता है वह भी सभी पापों से मुक्त हो जाता है। (१०)

वहाँ सरस्वती के तट पर रहते हुये सरोवर में स्नान करने वाले मनुष्य को निःसंदेह ब्रह्मज्ञान उत्पन्न होता है। (११)

देवता ऋषि और सिद्धलोग सदा कुरुक्षेत्र का सेवन करते हैं। वहाँ नित्य रहने से मनुष्य अपने भीतर ब्रह्म का दर्शन करता है। (१२)

चञ्चल मानव जीवन पाकर जो पापी भी जितेन्द्रिय होकर मोक्ष की इच्छा से यहाँ निवास करते हैं वे अनेक जन्मों के पापों से मुक्त हो अपने हृदयस्थ सनातन निर्मल देव का दर्शन करते हैं। (१३-१४)

ब्रह्मवेदी, कुरुक्षेत्र एवं पवित्र सान्निहित सरोवर का जो मनुष्य सतत सेवन करते हैं वे परम पद को प्राप्त करते हैं। (१५)

समय पर ग्रह, नक्षत्र एवं ताराओं के भी पतन का भय होता है, किन्तु कुरुक्षेत्र में मरने वालों का कभी पतन नहीं होता। (१६)

ब्रह्मादि देवता, ऋषि, सिद्ध, चारण, गन्धर्व, अप्सरायें और यक्ष उत्तम स्थान की प्राप्ति के लिये यहाँ निवास करते हैं। (१७)

वहाँ जाकर स्थाणु नामक महासरोवर में श्रद्धा पूर्वक स्नान करने से मनुष्य निःसंदेह मनोवाञ्छित फल प्राप्त करता है। (१८)

नियम परायण होने के पश्चात् सरोवर की प्रदक्षिणा

नियमं च ततः कृत्वा गत्वा सरः प्रदक्षिणम् ।
रन्तुकं च समासाद्य क्षामयित्वा पुनः पुनः ॥ १९
सरस्वत्यां नरः स्नात्वा यक्षं दृष्ट्वा प्रणम्य च ।
पुष्पं धूपं च नैवेद्यं दत्त्वा वाचमुदीरयेत् ॥ २०
तव प्रसादाद् यक्षेन्द्र वनानि सरितश्च याः ।
भ्रमिष्यामि च तीर्थानि अविघ्नं कुरु मे सदा ॥ २१

इति श्रीवामनपुराणे सरोमाहात्म्ये द्वादशोऽध्याय ॥१२॥

१३

ऋषय ऊचुः ।
वनानि सप्त नो ब्रूहि नव नद्यश्च याः स्मृताः ।
तीर्थानि च समग्राणि तीर्थस्नानफलं तथा ॥ १
येन येन विधानेन यस्य तीर्थस्य यत् फलम् ।
तत् सर्वं विस्तरेणेह ब्रूहि पौराणिकोत्तम ॥ २
लोमहर्षण उवाच ।
शृणु सप्त वनानीह कुरुक्षेत्रस्य मध्यतः ।
येषां नामानि पुण्यानि सर्वपापहराणि च ॥ ३
काम्यकं च वनं पुण्यं तथाऽदितिवनं महत् ।
व्यासस्य च वनं पुण्यं फलकीवनमेव च ॥ ४
तत्र सूर्यवनस्थानं तथा मधुवनं महत् ।
पुण्यं शीतवनं नाम सर्वकल्मषनाशनम् ॥ ५
वनान्येतानि वै सप्त नदीः शृणुत मे द्विजाः ।
सरस्वती नदी पुण्या तथा वैतरणी नदी ॥ ६
आपगा च महापुण्या गङ्गा मन्दाकिनी नदी ।
मधुस्रवा वासुनदी कौशिकी पापनाशिनी ॥ ७
दृषद्वती महापुण्या तथा हिरण्वती नदी ।
वर्षाकालवहाः सर्वा वर्जयित्वा सरस्वतीम् ॥ ८
एतासामुदकं पुण्यं प्रावृट्काले प्रकीर्त्तितम् ।
रजस्वलत्वमेतासां विद्यते न कदाचन ।

करके रन्तुक मे जाकर पुन पुन क्षमा प्रार्थना करने के बाद सरस्वती में स्नान कर यक्ष का दर्शन और प्रणाम करे तथा पुष्प, धूप एव नैवेद्य देकर इस प्रकार वचन कहे—हे यक्षेन्द्र ! आपकी कृपासे मैं वनों, नदियों और तीर्थों मे भ्रमण करूँगा उसे आप सदा विघ्न रहित करें। (१९-२१)

श्रीवामनपुराण के सरोमाहात्म्य मे बारहवाँ अध्याय समाप्त ॥१२॥

१३

ऋषियों ने कहा—उन सात वनों, नव नदियों, समग्र तीर्थों एव तीर्थ स्नान के फल का हमसे वर्णन करें। (१)

हे पौराणिकोत्तम ! जिस जिस विधान से जिस तीर्थ का जो फल होता है उन सबको विस्तार पूर्वक बतलायें। (२)

लोमहर्षण ने कहा—कुरुक्षेत्र के मध्य मे जो सात वन हैं उन्हें सुनो। उनके नाम सभी पापों को नाश करने वाले तथा पवित्र हैं। (३)

पवित्र काम्यक वन, महान् अदिति वन, पुण्यप्रद व्यास-वन, फलकी-वन, सूर्यवन, महान् मधुवन तथा सर्वकल्मष नाशक पवित्र शीतवन ये ही सात वन हैं। हे द्विजो ! नदियों को मुझसे सुनो। पवित्र सरस्वती नदी, वैतरणी नदी, महापवित्र आपगा, मन्दाकिनी गङ्गा, मधुस्रवा, वासु नदी, पापनाशिनी कौशिकी, महापवित्र दृषद्वती तथा हिरण्वती नदी। इनमें सरस्वती के अतिरिक्त सभी नदियाँ वर्षाकाल में बहने वाली हैं। (४-८)

वर्षाकाल मे इनका जल पवित्र माना जाता है। इनमे कभी भी रजस्वलत्व दोष नहीं होता। तीर्थ के प्रभाव

तीर्थस्य च प्रभावेण पुण्या ह्येताः सरिद्वराः ॥ ९
शृण्वन्तु मुनयः प्रीतास्तीर्थस्नानफलं महत् ।
गमनं स्मरणं चैव सर्वकल्मषनाशनम् ॥ १०
रन्तुकं च नरो दृष्ट्वा द्वारपालं महाबलम् ।
यक्षं समभिवाद्यैव तीर्थयात्रां समाचरेत् ॥ ११
ततो गच्छेत विप्रेन्द्रा नाम्नाऽदितिवनं महत् ।
अदित्या यत्र पुत्रार्थं कृतं घोरं महत्तपः ॥ १२
तत्र स्नात्वा च दृष्ट्वा च अदितिं देवमातरम् ।
पुत्रं जनयते शूरं सर्वदोषविवर्जितम् ।
आदित्यशतसंकाशं विमानं चाधिरोहति ॥ १३
ततो गच्छेत विप्रेन्द्रा विष्णोः स्थानमनुत्तमम् ।
सवनं नाम विख्यातं यत्र संनिहितो हरिः ॥ १४
विमले च नरः स्नात्वा दृष्ट्वा च विमलेश्वरम् ।
निर्मलं स्वर्गमायाति रुद्रलोकं च गच्छति ॥ १५
हरिं च बलदेवं च एकत्रासनसमन्वितौ ।
दृष्ट्वा मोक्षमवाप्नोति कलिकल्मषसंभवैः ॥ १६
ततः पारिप्लवं गच्छेत् तीर्थं त्रैलोक्यविश्रुतम् ।
तत्र स्नात्वा च दृष्ट्वा च ब्रह्माणं वेदसंयुतम् ॥ १७
ब्रह्मवेदफलं प्राप्य निर्मलं स्वर्गमाप्नुयात् ।
तत्रापि संगमं प्राप्य कौशिक्यां तीर्थसंभवम् ।
संगमे च नरः स्नात्वा प्राप्नोति परमं पदम् ॥ १८
धरण्यास्तीर्थमासाद्य सर्वपापविमोचनम् ।
क्षान्तियुक्तो नरः स्नात्वा प्राप्नोति परमं पदम् ॥ १९
धरण्यामपराधानि कृतानि पुरुषेण वै ।
सर्वाणि क्षमते तस्य स्नातमात्रस्य देहिनः ॥ २०
ततो दक्षाश्रमं गत्वा दृष्ट्वा दक्षेश्वरं शिवम् ।
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ २१
ततः शालूकिनीं गत्वा स्नात्वा तीर्थे द्विजोत्तमाः ।
हरिं हरेण संयुक्तं पूज्य भक्तिसमन्वितः ।
प्राप्नोत्यभिमताँल्लोकान् सर्वपापविवर्जितान् ॥ २२

से ये सभी श्रेष्ठ नदियाँ पवित्र हैं । (९)

हे मुनियो ! आपलोग प्रसन्न होकर तीर्थस्नान का महान् फल सुनें । वहाँ जाना एवं उनका स्मरण करना समस्त पापों का नाशक होता है । (१०)

महाबलवान् रन्तुक नामक द्वारपाल का दर्शन करने के उपरान्त यक्ष को प्रणाम कर तीर्थयात्रा प्रारम्भ करनी चाहिये । (११)

हे विप्रेन्द्रो ! तदनन्तर महान् अदिति-वन में जाना चाहिये, जहाँ अदिति ने पुत्र के लिए अत्यन्त कठोर तप किया था । (१२)

वहाँ स्नानकर देवमाता अदिति का दर्शन करने से मनुष्य समस्त दोषों से रहित शूर पुत्र उत्पन्न करता है और सैकड़ों सूर्यों के समान प्रकाशमान विमान पर आरूढ़ होता है । (१३)

हे विप्रेन्द्रो ! तदुपरान्त 'सवन' नाम से प्रसिद्ध सर्वोत्तम विष्णु-स्थान को जाना चाहिये, जहाँ भगवान् हरि सदा सन्निहित रहते हैं । (१४)

विमलतीर्थ में स्नान कर विमलेश्वर का दर्शन करने से मनुष्य निर्मल स्वर्ग तथा रुद्रलोक में जाता है । (१५)

आसन पर एकत्र आरूढ़ कृष्ण और बलदेव का दर्शन करने से मनुष्य कलिकल्मष-सम्भूत पापों से मुक्त हो जाता है । (१६)

तदनन्तर त्रैलोक्य प्रसिद्ध पारिप्लव नामक तीर्थ में जाय । वहाँ स्नान करने के पश्चात् वेद सयुत ब्रह्मा का दर्शन करने से ब्रह्मज्ञान का फल एवं निर्मल स्वर्ग की प्राप्ति होती है । कौशिकी के तीर्थभूत सङ्गम में जाकर स्नान करने से मनुष्य परम पद प्राप्त करता है । (१७-१८)

सर्वपापविमोचक धरणी के तीर्थ में जाकर स्नान करने से क्षमाशील मनुष्य परम पद प्राप्त करता है । (१९)

वहाँ स्नान करने मात्र से पृथ्वी पर मनुष्य द्वारा कृत समस्त अपराध क्षमित हो जाते हैं । (२०)

तदनन्तर दक्षाश्रम में जाकर दक्षेश्वर शिव का दर्शन करने से मनुष्य अश्वमेध यज्ञ का फल प्राप्त करता है । (२१)

हे द्विजोत्तमो ! तदनन्तर शालूकिनी तीर्थ में जाकर स्नान करने के पश्चात् भक्तिपूर्वक हर से संयुक्त हरि का पूजन कर मनुष्य सर्वपापविवर्जित अभिमत लोकों को प्राप्त करता है । (२२)

सर्पिर्दधि समासाद्य नागानां तीर्थमुत्तमम् ।
तत्र स्नानं नरः कृत्वा मुक्तो नागभयाद् भवेत् ॥ २३

ततो गच्छेत विप्रेन्द्रा द्वारपालं तु रन्तुकम् ।
तत्रोष्य रजनीमेकां स्नात्वा तीर्थवरे शुभे ॥ २४

द्वितीयं पूजयेद् यत्र द्वारपालं प्रयत्नतः ।
ब्राह्मणान् भोजयित्वा च प्रणिपत्य क्षमापयेत् ॥ २५

तव प्रसादाद् यक्षेन्द्र मुक्तो भवति किल्बिषैः ।
सिद्धिर्मयाभिलषिता तया सार्द्धं भवाम्यहम् ।
एवं प्रसाद्य यक्षेन्द्रं ततः पञ्चनदं व्रजेत् ॥ २६

पञ्चनदाश्च रुद्रेण कृता दानवभीषणाः ।
तत्र सर्वेषु लोकेषु तीर्थं पञ्चनद स्मृतम् ॥ २७

कोटितीर्थानि रुद्रेण समाहृत्य यत. स्थितम् ।
तेन त्रैलोक्यविख्यातं कोटितीर्थं प्रचक्षते ॥ २८

तस्मिन् तीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्वरं हरम् ।
पञ्चयज्ञानवाप्नोति नित्यं श्रद्धासमन्वितः ॥ २९

तत्रैव वामनो देवः सर्वदेवैः प्रतिष्ठितः ।
तत्रापि च नरः स्नात्वा ह्यग्निष्टोमफलं लभेत् ॥ ३०

अश्विनोस्तीर्थमासाद्य श्रद्धावान् यो जितेन्द्रियः ।
रूपस्य भागी भवति यशस्वी च भवेन्नरः ॥ ३१

वाराहं तीर्थमाख्यातं विष्णुना परिकीर्तितम् ।
तस्मिन् स्नात्वा श्रद्दधानः प्राप्नोति परमं पदम् ॥ ३२

ततो गच्छेत विप्रेन्द्राः सोमतीर्थमनुत्तमम् ।
यत्र सोमस्तपस्तप्त्वा व्याधिमुक्तोऽभवत् पुरा ॥ ३३

तत्र सोमेश्वरं दृष्ट्वा स्नात्वा तीर्थवरे शुभे ।
राजसूयस्य यज्ञस्य फल प्राप्नोति मानवः ॥ ३४

व्याधिभिश्च विनिर्मुक्तः सर्वदोषविवर्जित. ।
सोमलोकमवाप्नोति तत्रैव रमते चिरम् ॥ ३५

भूतेश्वरं च तत्रैव ज्वालामालेश्वर तथा ।
तावुभौ लिङ्गावभ्यर्च्य न भूयो जन्म चाप्नुयात् ॥ ३६

एकहंसे नरः स्नात्वा गोसहस्रफलं लभेत् ।

सर्पिर्दधि नामक नागों के उत्तम तीर्थ मे जाकर स्नान करने से मनुष्य नाग भय से मुक्त हो जाता है। (२३)

हे विप्रश्रेष्ठो! तदनन्तर रन्तुक नामक द्वारपाल में जाना चाहिये। वहाँ एक रात्रि निवास करे तथा कल्याणकारी श्रेष्ठतीर्थ में स्नान करने के उपरान्त दूसरे दिन प्रयत्न पूर्वक द्वारपाल का पूजन करे एव ब्राह्मणों को भोजन करावे। तदनन्तर प्रणाम कर इस प्रकार क्षमा-प्रार्थना करे—'हे यक्षेन्द्र! तुम्हारी कृपा से मनुष्य पापों से मुक्त हो जाता है। मैं अपनी अभीष्ट सिद्धि को प्राप्त करूँ" इस प्रकार यक्षेन्द्र को प्रसन्न करने के पश्चात् पञ्चनद तीर्थ मे जाना चाहिये। जहाँ भगवान् रुद्र ने दानवों के लिये भयकर पाँच नदों का निर्माण किया है वहाँ समस्त ससार में प्रसिद्ध पञ्चनद तीर्थ है। (२४-२७)

क्योंकि करोड़ों तीर्थों का समाहरण कर रुद्र वहाँ स्थित हैं अत उसे त्रैलोक्य विख्यात कोटितीर्थ कहा जाता है। (२८)

श्रद्धा-समन्वित मनुष्य उस तीर्थ में स्नान कर तथा कोटीश्वर हर का दर्शन कर पञ्चयज्ञानुष्ठान का फल प्राप्त करता है। (२९)

उसी स्थान पर सब देवताओं ने भगवान् वामनदेव की प्रतिष्ठा की है। वहाँ भी स्नान करने से मनुष्य को अग्निष्टोम यज्ञ का फल मिलता है। (३०)

श्रद्धावान् जितेन्द्रिय मनुष्य अश्विनीकुमारों के तीर्थ में जाकर रूपवान् और यशस्वी होता है। (३१)

विष्णु द्वारा वर्णित प्रसिद्ध वाराह नामक तीर्थ में स्नान कर श्रद्धालु पुरुष परम पद प्राप्त करता है। (३२)

हे विप्रेन्द्रो! तदनन्तर सर्वश्रेष्ठ सोमतीर्थ में जाना चाहिए, जहाँ पूर्वकाल मे तपस्या करने से चन्द्रमा व्याधि-मुक्त हुए थे। (३३)

उस शुभ तीर्थ में स्नान कर सोमेश्वर का दर्शन करने से मनुष्य राजसूय यज्ञ का फल प्राप्त करता है तथा व्याधियों और सभी दोषों से मुक्त होकर सोमलोक में जाता है, एवं चिरकाल तक वहाँ रमण करता है। (३४-३५)

वहीं पर भूतेश्वर एव ज्वालामालेश्वर नामक लिङ्ग है। उन दोनों लिङ्गों की पूजा करने से पुनर्जन्म नहीं होता। (३६)

'एकहस' में स्नान कर मनुष्य हजारों गौवों के दान का फल प्राप्त करता है। 'कृतशौच' नामक तीर्थ में जाने से तीर्थसेवी द्विजोत्तम पुण्डरीक (यज्ञविशेष) के फल को प्राप्त

कृतशौचं समासाद्य तीर्थसेवी द्विजोत्तमः ॥ ३७
पुण्डरीकमवाप्नोति कृतशौचो भवेन्नरः ।
ततो मुञ्जवटं नाम महादेवस्य धीमतः ॥ ३८
उपोष्य रजनीमेकां गाणपत्यमवाप्नुयात् ।
तत्रैव च महाग्राही यक्षिणी लोकविश्रुता ॥ ३९
स्नात्वाऽभिगत्वा तत्रैव प्रसाद्य यक्षिणीं ततः ।
उपवासं च तत्रैव महापातकनाशनम् ॥ ४०
कुरुक्षेत्रस्य तद् द्वारं विश्रुतं पुण्यवर्द्धनम् ।
प्रदक्षिणमुपावर्त्य ब्राह्मणान् भोजयेत् ततः ।
पुष्करं च ततो गत्वा अभ्यर्च्य पितृदेवताः ॥ ४१
जामदग्न्येन रामेण आहृतं तन्महात्मना ।
कृतकृत्यो भवेद् राजा अश्वमेधं च विन्दति ॥ ४२
कन्यादानं च यस्तत्र कार्त्तिक्यां वै करिष्यति ।
प्रसन्ना देवतास्तस्य दास्यन्त्यभिमतं फलम् ॥ ४३
कपिलश्च महायक्षो द्वारपालः स्वयं स्थितः ।
विघ्नं करोति पापानां दुर्गतिं च प्रयच्छति ॥ ४४
पत्नी तस्य महायक्षी नाम्नोदूखलमेखला ।
आहत्य दुन्दुभिं तत्र भ्रमते नित्यमेव हि ॥ ४५
सा ददर्श स्त्रियं चैकां सपुत्रां पापदेशजाम् ।
तामुवाच तदा यक्षी आहत्य निशि दुन्दुभिम् ॥ ४६
युगन्धरे दधि प्राश्य उषित्वा चाच्युतस्थले ।
तद्वद् भूतालये स्नात्वा सपुत्रा वस्तुमिच्छसि ॥ ४७
दिवा मया ते कथितं रात्रौ भक्ष्यामि निश्चितम् ।
एतच्छ्रुत्वा तु वचनं प्रणिपत्य च यक्षिणीम् ॥ ४८
उवाच दीनया वाचा प्रसादं कुरु भामिनि ।
ततः सा यक्षिणी तां तु प्रोवाच कृपयान्विता ॥ ४९
यदा सूर्यस्य ग्रहणं कालेन भविता क्वचित् ।
सन्निहत्यां तदा स्नात्वा पूता स्वर्गं गमिष्यसि ॥ ५०

इति श्रीवामनपुराणे सरोमाहात्म्ये त्रयोदशोऽध्याय ॥१३॥

करता है तथा उसकी शुद्धि हो जाती है। तदनन्तर बुद्धिमान् महादेव के मुञ्जवट नामक तीर्थ में एक रात्रि निवास करके मनुष्य गाणपत्य प्राप्त करता है। वहीं संसारप्रसिद्ध महा ग्राही यक्षिणी है। वहाँ जाकर स्नान करने के उपरान्त यक्षिणी को प्रसन्न कर उपवास करने से महान् पातकों का नाश होता है। (३७-४०)

कुरुक्षेत्र के उस विश्रुत पुण्यवर्द्धक द्वार की प्रदक्षिणा कर ब्राह्मणों को भोजन कराये। तदनन्तर पुष्कर में जाकर पितृदेवों की अर्चना करे। (४१)

जामदग्न्य राम उस तीर्थ को लाये थे। वहाँ (जाकर) मनुष्य कृतकृत्य होता है और राजा को अश्वमेध के फल की प्राप्ति होती है। (४२)

कार्तिकी पूर्णिमा को जो वहाँ कन्यादान करेगा, देवता उसके ऊपर प्रसन्न होकर उसे अभिमत फल देंगे। (४३)

वहाँ स्वयं कपिल नामक महायक्ष द्वारपालरूप से स्थित हैं, जो पापियों के मार्ग में विघ्न उपस्थित कर उनकी दुर्गति करते हैं। (४४)

उदूखलमेखला नामक उनकी महायक्षी पत्नी दुन्दुभि बजा कर वहाँ नित्य भ्रमण करती रहती है। (४५)

उस यक्षी ने पाप देश में उत्पन्न एक सपुत्रा स्त्री को देखने के उपरान्त रात्रि में दुन्दुभि बजाकर उससे कहा- (४६)

युगन्धर में दही खाकर तथा अच्युतस्थल में निवास करने के उपरान्त भूतालय में स्नान कर तुम पुत्र के साथ निवास करना चाहती हो। (४७)

मैंने दिन में यह बात कही है। रात्रि में मैं अवश्य तुमको खा जाऊँगी। उसकी यह बात सुनने के अनन्तर यक्षिणी को प्रणाम कर उसने दीन वाणी से कहा "हे भामिनी मेरे ऊपर अनुग्रह करो।" तदनन्तर उस यक्षिणी ने उससे कृपापूर्वक कहा— (४८-४९)

जब किसी समय सूर्य ग्रहण होगा उस समय सान्निहत्य में स्नान कर पवित्र होकर तुम स्वर्ग जाओगी। (५०)

श्रीवामनपुराण के सरोमाहात्म्य में तेरहवाँ अध्याय समाप्त ॥१३॥

१४

लोमहर्षण उवाच ।
ततो रामह्रदं गच्छेत् तीर्थसेवी द्विजोत्तमः ।
यत्र रामेण विप्रेण तरसा दीप्ततेजसा ॥ १
क्षत्रमुत्साद्य वीरेण ह्रदाः पञ्च निवेशिताः ।
पूरयित्वा नरव्याघ्र रुधिरेणेति नः श्रुतम् ॥ २
पितरस्तर्पितास्तेन तथैव च पितामहाः ।
ततस्ते पितरः प्रीता राममूचुर्द्विजोत्तमाः ॥ ३
राम राम महाबाहो प्रीताः स्मस्तव भार्गव ।
अनया पितृभक्त्या च विक्रमेण च ते विभो ॥ ४
वरं वृणीष्व भद्रं ते किमिच्छसि महायशः ।
एवमुक्तस्तु पितृभी राम: प्रभवतां वरः ॥ ५
अब्रवीत् प्राञ्जलिर्वाक्यं स पितॄन् गगने स्थितान् ।
भवन्तो यदि मे प्रीता यद्यनुग्राह्यता मयि ॥ ६
पितृप्रसादादिच्छेयं तपसाप्यायनं पुनः ।
यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया ॥ ७
ततश्च पापान्मुच्येयं युष्माकं तेजसा ह्यहम् ।
ह्रदाश्चैते तीर्थभूता भवेयुर्भुवि विश्रुताः ॥ ८
एवमुक्ताः शुभं वाक्यं रामस्य पितरस्तदा ।
प्रत्यूचुः परमप्रीता रामं हर्षपुरस्कृताः ॥ ९
तपस्ते वर्द्धतां पुत्र पितृभक्त्या विशेषतः ।
यच्च रोषाभिभूतेन क्षत्रमुत्सादितं त्वया ॥ १०
ततश्च पापान्मुक्तस्त्वं पातितास्ते स्वकर्मभिः ।
ह्रदाश्च तव तीर्थत्वं गमिष्यन्ति न संशयः ॥ ११
ह्रदेष्वेतेषु ये स्नात्वा स्वान् पितॄंस्तर्पयन्ति च ।
तेभ्यो दास्यन्ति पितरो यथाभिलषितं वरम् ॥ १२
ईप्सितान् मानसान् कामान् स्वर्गवासं च शाश्वतम् ।
एवं दत्त्वा वरान् विप्रा रामस्य पितरस्तदा ॥ १३
आमन्त्र्य भार्गवं प्रीतास्तत्रैवान्तर्हितास्तदा ।

१४

लोमहर्षण ने कहा—तदनन्तर तीर्थसेवी द्विजोत्तम को रामह्रद जाना चाहिये। जहाँ दीप्ततेजा विप्र वीर राम (परशुराम) ने बल पूर्वक क्षत्रियों को नष्ट कर पाँच ह्रदों का निवेश किया था। हे नरव्याघ्र ! हम लोगों ने ऐसा सुना है कि उन्होंने उन (ह्रदों) को रुधिर से पूरित कर उससे अपने पितरों एवं पितामहों को तृप्त किया। हे द्विजोत्तमो ! तदनन्तर उन प्रसन्न पितरों ने परशुराम से कहा— (१-३)

हे महाबाहु ! हे भार्गव राम ! हे विभु ! तुम्हारी इस पितृभक्ति और विक्रम से हम तुम्हारे ऊपर प्रसन्न हैं। (४)

हे महायशस्वी ! तुम वर माँगो ! क्या चाहते हो ? पितरों के ऐसा कहने पर प्रभावशालियों में श्रेष्ठ राम ने आकाशस्थित पितरों से हाथ जोडकर कहा—यदि आप लोग मेरे ऊपर प्रसन्न हैं तथा मेरे ऊपर अनुग्रह करना चाहते हैं तो आप पितरों के प्रसाद से मैं पुनः तप से पूर्ण होना चाहता हूँ। रोषाभिभूत होकर मैंने जो क्षत्रियों का विनाश किया है, आप के तेज द्वारा मैं उस पाप से मुक्त होजाऊँ एवं तीर्थभूत ये ह्रद संसार में प्रसिद्ध हों। (५-८)

राम के द्वारा इस प्रकार शुभ वचन कहे जाने पर उनके परमानन्दित पितरों ने हर्षपूर्वक उनसे कहा— (९)

हे पुत्र ! पितृभक्ति से तुम्हारा तप विशेष रूप से बढे। क्रोधाभिभूत होकर तुमने जो क्षत्रियों का विनाश *किया उस पाप से तुम मुक्त हो क्योंकि वे क्षत्रिय* अपने कर्म से मारे गये हैं। तुम्हारे (द्वारा निवेशित) ये ह्रद निःसंशय तीर्थ बनेंगे। (१०-११)

इन ह्रदों में स्नानकर जो अपने पितरों का तर्पण करेंगे उन्हें पितृगण यथाभिलषित वर, मनोभिलषित कामनायें एवं स्वर्ग में शाश्वत निवास प्रदान करेंगे। हे विप्रो ! इस प्रकार वर देने के उपरान्त भार्गव राम के पितर उनकी अनुमति

एवं रामह्रदाः पुण्या भार्गवस्य महात्मनः ॥ १४
स्नात्वा ह्रदेषु रामस्य ब्रह्मचारी शुचिव्रतः ।
राममभ्यर्च्य श्रद्धावान् विन्देद् बहु सुवर्णकम् ॥ १५
वंशमूलं समासाद्य तीर्थसेवी सुसंयतः ।
स्ववंशसिद्धये विप्राः स्नात्वा वै वंशमूलके ॥ १६
कायशोधनमासाद्य तीर्थं त्रैलोक्यविश्रुतम् ।
शरीरशुद्धिमाप्नोति स्नातस्तस्मिन् न संशयः ॥ १७
शुद्धदेहश्च तं याति यस्मान्नावर्तते पुनः ।
तावद् भ्रमन्ति तीर्थेषु सिद्धास्तीर्थपरायणाः ।
यावन्न प्राप्नुवन्तीह तीर्थं तत्कायशोधनम् ॥ १८
तस्मिंस्तीर्थे च संप्लाव्य कायं संयतमानसः ।
परं पदमवाप्नोति यस्मान्नावर्तते पुनः ॥ १९
ततो गच्छेत विप्रेन्द्रास्तीर्थं त्रैलोक्यविश्रुतम् ।
लोका यत्रोद्धृताः सर्वे विष्णुना प्रभविष्णुना ॥ २०
लोकोद्धारं समासाद्य तीर्थस्मरणतत्परः ।
स्नात्वा तीर्थवरे तस्मिन् लोकान् पश्यति शाश्वतान् ॥ २१
यत्र विष्णुः स्थितो नित्यं शिवो देवः सनातनः ।
तौ देवौ प्रणिपातेन प्रसाद्य मुक्तिमाप्नुयात् ॥ २२
श्रीतीर्थं तु ततो गच्छेत् शालग्राममनुत्तमम् ।
तत्र स्नातस्य सान्निध्यं सदा देवी प्रयच्छति ॥ २३
कपिलाह्रदमासाद्य तीर्थं त्रैलोक्यविश्रुतम् ।
तत्र स्नात्वाऽर्चयित्वा च दैवतानि पितॄंस्तथा ॥ २४
कपिलानां सहस्रस्य फलं विन्दति मानवः ।
तत्र स्थितं महादेवं कापिलं वपुरास्थितम् ॥ २५
दृष्ट्वा मुक्तिमवाप्नोति ऋषिभिः पूजितं शिवम् ।
सूर्यतीर्थं समासाद्य स्नात्वा नियतमानसः ॥ २६
अर्चयित्वा पितॄन् देवानुपवासपरायणः ।
अग्निष्टोममवाप्नोति सूर्यलोकं च गच्छति ॥ २७
सहस्रकिरणं देवं भानुं त्रैलोक्यविश्रुतम् ।

लेकर प्रसन्नता पूर्वक वहीं अ तर्हित हो गये। इस प्रकार महात्मा परशुराम के रामह्रद पुण्यप्रदायक हैं। (१२-१४)

श्रद्धावान्, शुचिव्रत व्यक्ति ब्रह्मचर्य पूर्वक राम के ह्रदों में स्नान करने के उपरान्त परशुराम का अर्चन करने से बहुत परिमाण में सुवर्ण प्राप्त करता है। (१५)

हे ब्राह्मणो! तीर्थसेवी जितेन्द्रिय मनुष्य वंशमूल तीर्थ में जाकर उसमें स्नान करने से अपने वश की सिद्धि प्राप्त करता है। (१६)

त्रैलोक्य प्रसिद्ध कायशोधन तीर्थ में जाकर उसमें स्नान करने से मनुष्य को निस्सन्देह शरीर की शुद्धि प्राप्त होती है। (१७)

और शुद्धदेह मनुष्य उस स्थान को जाता है जहाँ से वह पुनः नहीं लौटता। तीर्थपरायण सिद्ध पुरुष तीर्थों में तब तक भ्रमण करते रहते हैं जब तक वे उस कायशोधन नामक तीर्थ में नहीं पहुँचते। (१८)

संयतचित्त मनुष्य उस तीर्थ में शरीर को धोकर उस परम पद को प्राप्त करता है जहाँ से पुनः लौटना नहीं पड़ता। (१९)

हे विप्रो! तदनन्तर त्रिलोकप्रसिद्ध लोकोद्धार तीर्थ में जाना चाहिए जहाँ सर्वसमर्थ विष्णु ने समस्त लोकों का उद्धार किया था। लोकोद्धार नामक तीर्थ में जाकर उसमें स्नान करने से तीर्थस्मरण तत्पर व्यक्ति शाश्वत लोकों का दर्शन करता है। (२०-२१)

यहाँ विष्णु एवं सनातन देव शिव दोनों ही स्थित हैं। प्रणाम द्वारा उन दोनों देवों को प्रसन्न कर मुक्ति प्राप्त करे। (२२)

तदनन्तर तीर्थश्रेष्ठ शालग्राम नामक श्रीतीर्थ में जाना चाहिए। वहाँ स्नान करने से भगवती अपने निकट का निवास प्रदान करती हैं। (२३)

तदुपरान्त त्रैलोक्यविश्रुत कपिलाह्रद नाम तीर्थ में जाकर उसमें स्नान करने के पश्चात् देवता तथा पितरों की पूजा करने से मनुष्य को सहस्र कपिला गायों के दान का फल प्राप्त होता है। वहाँ पर स्थित कपिल शरीरधारी ऋषियों से पूजित महादेव शिव का दर्शन करने से मुक्ति की प्राप्ति होती है। स्थिरचित्त एवं उपवास-परायण व्यक्ति सूर्यतीर्थ में जाकर स्नान करने के उपरान्त पितरों का अर्चन करने से अग्निष्टोम यज्ञ का फल प्राप्त करता है एवं सूर्यलोक को जाता है। (२४-२७)

त्रैलोक्य विश्रुत सहस्र किरण सूर्यदेव का दर्शन करने से

दृष्ट्वा मुक्तिमवाप्नोति नरो ज्ञानसमन्वितः ॥ २८
भवानीवनमासाद्य तीर्थसेवी यथाक्रमम् ।
तत्राभिषेकं कुर्वाणो गोसहस्रफलं लभेत् ॥ २९
पितामहस्य पिबतो ह्यमृतं पूर्वमेव हि ।
उद्गारात् सुरभिर्जाता सा च पातालमाश्रिता ॥ ३०
तस्याः सुरभयो जाताः तनया लोकमातरः ।
ताभिस्तत्सकलं व्याप्तं पातालं सुनिरन्तरम् ॥ ३१
पितामहस्य यजतो दक्षिणार्थमुपाहृताः ।
आहूता ब्रह्मणा ताश्च विभ्रान्ता विवरेण हि ॥ ३२
तस्मिन् विवरद्वारे तु स्थितो गणपतिः स्वयम् ।
यं दृष्ट्वा सकलान् कामान् प्राप्नोति संयतेन्द्रियः ॥ ३३
संगिनीं तु समासाद्य तीर्थं मुक्तिसमाश्रयम् ।
देव्यास्तीर्थे नरः स्नात्वा लभते रूपमुत्तमम् ॥ ३४
अनन्तां श्रियमाप्नोति पुत्रपौत्रसमन्वितः ।
भोगांश्च विपुलान् भुक्त्वा प्राप्नोति परमं पदम् ॥ ३५
ब्रह्मावर्ते नरः स्नात्वा ब्रह्मज्ञानसमन्वितः ।
भवते नात्र सन्देहः प्राणान् मुञ्चति स्वेच्छया ॥ ३६
ततो गच्छेत विप्रेन्द्रा द्वारपालं तु रन्तुकम् ।
तस्य तीर्थं सरस्वत्यां यक्षेन्द्रस्य महात्मनः ॥ ३७
तत्र स्नात्वा महाप्राज्ञ उपवासपरायणः ।
यक्षस्य च प्रसादेन लभते कामिकं फलम् ॥ ३८
ततो गच्छेत विप्रेन्द्रा ब्रह्मावर्तं मुनिस्तुतम् ।
ब्रह्मावर्ते नरः स्नात्वा ब्रह्म चाप्नोति निश्चितम् ॥ ३९
ततो गच्छेत विप्रेन्द्राः सुतीर्थकमनुत्तमम् ।
तत्र संनिहिता नित्यं पितरो दैवतैः सह ॥ ४०
तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ।
अश्वमेधमवाप्नोति पितॄन् प्रीणाति शाश्वतान् ॥ ४१
ततोऽम्बुवनं धर्मज्ञ समासाद्य यथाक्रमम् ।
कामेश्वरस्य तीर्थे तु स्नात्वा श्रद्धासमन्वितः ॥ ४२
सर्वव्याधिविनिर्मुक्तो ब्रह्मावाप्तिर्भवेद् ध्रुवम् ।
मातृतीर्थं च तत्रैव यत्र स्नातस्य भक्तितः ॥ ४३
प्रजा विवर्द्धते नित्यमनन्तां चाप्नुयाच्छ्रियम् ।

ज्ञान समन्वित मनुष्य मुक्ति को प्राप्त करता है। (२८)

तीर्थसेवी मनुष्य क्रमानुसार भवानीवन में जाकर वहाँ अभिषेक करने से सहस्र गोदान का फल प्राप्त करता है। (२९)

प्राचीन काल में अमृत पीते हुए ब्रह्मा के उद्गार (डकार) से सुरभि की उत्पत्ति हुई और वह पाताल लोक में चली गई। (३०)

उस सुरभि से लोकमातायें गायें उत्पन्न हुईं। उनसे समस्त पाताल लोक व्याप्त हो गया। (३१)

पितामह के यज्ञ करते समय दक्षिणार्थ लायी गईं एवं ब्रह्मा के द्वारा आहूत वे गायें विवर के कारण भटकने लगीं। (३२)

उस विवर के द्वार पर स्वयं गणपति विराजमान हैं। संयतेन्द्रिय मनुष्य उनका दर्शन करने से समस्त कामनाओं को प्राप्त करता है। (३३)

देवी के मुक्ति के आश्रयभूत संगिनी तीर्थ में जाकर स्नान करने से मनुष्य को सुन्दर रूप की प्राप्ति होती है तथा वह पुत्र पौत्र समन्वित होकर अनन्त ऐश्वर्य को प्राप्त करता है और विपुल भोगों का उपभोग कर परम पद प्राप्त करता है। (३४–३५)

ब्रह्मावर्त्त तीर्थ में स्नान करने से मनुष्य निःसन्देह ब्रह्मज्ञानी हो जाता है एवं वह स्वेच्छानुसार प्राणों का परित्याग करता है। (३६)

हे विप्रश्रेष्ठो! तदनन्तर द्वारपाल रन्तुक के तीर्थ में जाय। उन महात्मा यक्षेन्द्र का तीर्थ सरस्वती नदी में है। वहाँ स्नान कर उपवास परायण महाप्राज्ञ व्यक्ति यक्ष के प्रसाद से इच्छित फल प्राप्त करता है। (३७–३८)

हे विप्रवरो! तदनन्तर मुनिप्रशंसित ब्रह्मावर्त्त तीर्थ में जाना चाहिए। ब्रह्मावर्त्त में स्नान करने से मनुष्य निश्चय ही ब्रह्म को प्राप्त करता है। (३९)

हे विप्रश्रेष्ठो! तदुपरान्त श्रेष्ठ सुतीर्थक नामक स्थान पर जाना चाहिए। वहाँ देवताओं के साथ पितृगण नित्य स्थित रहते हैं। पितरों एवं देवों की अर्चना में रत व्यक्ति वहाँ स्नान कर अश्वमेध यज्ञ का फल प्राप्त करता है तथा शाश्वत पितरों को प्रसन्न करता है। (४०–४१)

हे धर्मज्ञ! तदनन्तर क्रमानुसार कामेश्वर के तीर्थ अम्बुवन में जाकर श्रद्धापूर्वक स्नान करने से मनुष्य सभी व्याधियों से विनिर्मुक्त होकर निश्चय ही ब्रह्म की प्राप्ति करता है। वहीं स्थित मातृतीर्थ में भक्ति पूर्वक स्नान करने से मनुष्य की प्रजा (संतति) की नित्य वृद्धि होती है तथा उसे अनन्त लक्ष्मी की प्राप्ति होती है। तदुपरान्त नियत-

ततः शीतवनं गच्छेन्नियतो नियताशनः ॥ ४४
तीर्थं तत्र महाविप्रा महदन्यत्र दुर्लभम् ।
पुनाति दर्शनादेव दण्डकं च द्विजोत्तमाः ॥ ४५
केशानभ्युक्ष्य वै तस्मिन् पूतो भवति पापतः ।
तत्र तीर्थवरं चान्यत् स्वानुलोमायनं महत् ॥ ४६
तत्र विप्रा महाप्राज्ञा विद्वांसस्तीर्थतत्पराः ।
स्वानुलोमायने तीर्थे विप्रास्त्रैलोक्यविश्रुते ॥ ४७
प्राणायामैर्निर्हरन्ति स्वलोमानि द्विजोत्तमाः ।
पूतात्मानश्च ते विप्राः प्रयान्ति परमां गतिम् ॥ ४८
दशाश्वमेधिकं चैव तत्र तीर्थं सुविश्रुतम् ।
तत्र स्नात्वा भक्तियुक्तस्तदेव लभते फलम् ॥ ४९
ततो गच्छेत श्रद्धावान् मानुषं लोकविश्रुतम् ।
दर्शनात् तस्य तीर्थस्य मुक्तो भवति किल्बिषैः ॥ ५०

पुरा कृष्णमृगास्तत्र व्याधेन शरपीडिताः ।
विगाह्य तस्मिन् सरसि मानुषत्वमुपागताः ॥ ५१
ततो व्याधाश्च ते सर्वे तानपृच्छन् द्विजोत्तमान् ।
मृगा अनेन वै याता अस्माभिः शरपीडिताः ॥ ५२
निमग्नास्ते सरः प्राप्य क्व ते याता द्विजोत्तमाः ।
तेऽब्रुवंस्तत्र वै पृष्टा वयं ते च द्विजोत्तमाः ॥ ५३
अस्य तीर्थस्य माहात्म्यान्मानुषत्वमुपागताः ।
तस्माद् यूय श्रद्दधानाः स्नात्वा तीर्थे विमत्सराः ॥ ५४
सर्वपापविनिर्मुक्ता भविष्यथ न संशय. ।
ततः स्नाताश्च ते सर्वे शुद्धदेहा दिवं गताः ॥ ५५
एतत् तीर्थस्य माहात्म्यं मानुषस्य द्विजोत्तमाः ।
ये शृण्वन्ति श्रद्दधानास्तेऽपि यान्ति परां गतिम् ॥ ५६

इति श्रीवामनपुराणे सरोमाहात्म्ये चतुर्दशोऽध्याय ॥१४॥

भोजी एवं जितेन्द्रिय होकर शीतवन नामक तीर्थ में जाना चाहिए। हे महाविप्रो ! वहाँ पर अन्यत्र दुर्लभ दण्डक नामक महान् तीर्थ है। हे द्विजोत्तमो ! वह दर्शनमात्र से मनुष्य को पवित्र कर देता है। (४२-४५)

उस तीर्थ में केशों का मुण्डन कराने से मनुष्य पाप से मुक्त हो जाता है। वहाँ स्वानुलोमायन नामक एक अन्य महान् तीर्थ है। (४६)

हे द्विजोत्तमो ! वहाँ पर स्थित उस त्रैलोक्य विश्रुत स्वानुलोमायन नामक तीर्थ में तीर्थ-तत्पर महाप्राज्ञ विद्वान् विप्र लोग प्राणायामों के द्वारा अपने लोमों का परित्याग करते हैं और वे पूतात्मा विप्र परम गति को प्राप्त करते हैं। (४७-४८)

यहीं पर परमप्रसिद्ध दशाश्वमेधिक तीर्थ है। भक्तिपूर्वक उसमें स्नान करने से पूर्वोक्त फल की ही प्राप्ति होती है। (४९)

तदनन्तर श्रद्धावान् मनुष्य को लोक-प्रसिद्ध मानुष तीर्थ में जाना चाहिए। उस तीर्थ का दर्शन करने से ही पापों से मुक्ति हो जाती है। (५०)

पूर्वकाल में व्याध द्वारा बाणपीड़ित कृष्णमृग उस सरोवर में स्नान करने से मनुष्यत्व को प्राप्त हुए थे। (५१)

तदनन्तर उन सभी व्याधों ने उन द्विजोत्तमों से पूछा—हे द्विजोत्तमो ! हम लोगों द्वारा शरपीड़ित मृग इस मार्ग से जाते हुए सरोवर में निमग्न होकर कहाँ चले गये ? उनके पूछने पर उन्होंने उत्तर दिया—हम द्विजोत्तम ही वे मृग थे। इस तीर्थ के माहात्म्य से हम मनुष्य बन गये हैं। अत एव मत्सररहित होकर श्रद्धा पूर्वक तीर्थ में स्नान करने से तुम लोग निःसन्देह समस्त पापों से विनिर्मुक्त हो जाओगे। तदनन्तर स्नान करने से शुद्ध देह होकर वे सभी स्वर्ग चले गये। (५२-५५)

हे द्विजोत्तमो ! जो श्रद्धापूर्वक मानुष तीर्थ के इस माहात्म्य को सुनते हैं वे भी परम गति को प्राप्त करते हैं। (५६)

श्रीवामनपुराण के सरोमाहात्म्य में चौदहवाँ अध्याय समाप्त ॥१४॥

लोमहर्षण उवाच ।
मानुपस्य तु पूर्वेण क्रोशमात्रे द्विजोत्तमा. ।
आपगा नाम विख्याता नदी द्विजनिषेविता ॥ १
श्यामाकं पयसा सिद्धमाज्येन च परिप्लुतम् ।
ये प्रयच्छन्ति विप्रेभ्यस्तेषां पापं न विद्यते ॥ २
ये तु श्राद्धं करिष्यन्ति प्राप्य तामापगां नदीम् ।
ते सर्वकामसंयुक्ता भविष्यन्ति न संशयः ॥ ३
शंसन्ति सर्वे पितरः स्मरन्ति च पितामहाः ।
अस्माक च कुले पुत्रः पौत्रो वापि भविष्यति ॥ ४
य आपगां नदीं गत्वा तिलैः संतर्पयिष्यति ।
तेन तृप्ता भविष्यामो यावत्कल्पशतं गतम् ॥ ५
नभस्ये मासि सम्प्राप्ते कृष्णपक्षे विशेषत. ।
चतुर्दश्यां तु मध्याह्ने पिण्डदो मुक्तिमाप्नुयात् ॥ ६
ततो गच्छेत विप्रेन्द्रा ब्रह्मणः स्थानमुत्तमम् ।
ब्रह्मोदुम्बरमित्येवं सर्वलोकेषु विश्रुतम् ॥ ७
तत्र ब्रह्मर्षिकुण्डेषु स्नातस्य द्विजसत्तमाः ।
सप्तर्षीणां प्रसादेन सप्तसोमफलं भवेत् ॥ ८
भरद्वाजो गौतमश्च जमदग्निश्च कश्यपः ।
विश्वामित्रो वसिष्ठश्च अत्रिश्च भगवानृषिः ॥ ९
एतैः समेत्य तत्कुण्ड कल्पितं भुवि दुर्लभम् ।
ब्रह्मणा सेवितं यस्माद् ब्रह्मोदुम्बरमुच्यते ॥ १०
तस्मिंस्तीर्थवरे स्नातो ब्रह्मणोऽव्यक्तजन्मनः ।
ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा ॥ ११
देवान् पितॄन् समुद्दिश्य यो विप्रं भोजयिष्यति ।
पितरस्तस्य सुखिता दास्यन्ति भुवि दुर्लभम् ॥ १२
सप्तर्षीश्च समुद्दिश्य पृथक् स्नान समाचरेत् ।

१५

लोमहर्षण ने कहा—"हे द्विजोत्तमो। मानुष तीर्थ की पूर्व दिशा में एक कोश पर द्विजों से सेवित आपगा नामक एक विख्यात नदी है। (१)

वहाँ साँवा के चावल को दूध में पकाकर और उसमें घी मिलाकर जो ब्राह्मणों को देते हैं उनके पाप नहीं रह जाते। (२)

इस आपगा नदी के तट पर जाकर जो श्राद्ध करेंगे वे निःसंदेह समस्त कामनाओं से युक्त होंगे। (३)

पितृगण यह कहते हैं तथा पितामहगण यह स्मरण करते हैं कि हमारे कुल में कोई ऐसा पुत्र या पौत्र उत्पन्न होगा जो आपगा नदी के तट पर जाकर तिल से तर्पण करेगा जिससे हम सभी सैकड़ो कल्प तक तृप्त रहेंगे। (४-५)

भाद्रपद मास में, विशेषत कृष्ण पक्ष में, चतुर्दशी को मध्याह्न में पिण्ड दान करने वाला मनुष्य मुक्ति को प्राप्त करता है। (६)

हे विप्रोत्तमो। तदनन्तर समस्त लोक में ब्रह्मोदुम्बर नाम से प्रसिद्ध ब्रह्मा के उत्तम स्थान में जाना चाहिए। (७)

हे द्विजसत्तमो। वहाँ ब्रह्मर्षिकुण्डों में स्नान करने वाले को सप्तर्षियों की कृपा से सात सोम यज्ञों का फल मिलता है। (८)

भरद्वाज, गौतम, जमदग्नि, कश्यप, विश्वामित्र, वसिष्ठ एवं भगवान् अत्रि ऋषि ने मिलकर पृथ्वी में दुर्लभ इस कुण्ड को बनाया था। ब्रह्मा द्वारा सेवित होने से यह ब्रह्मोदुम्बर कहलाता है। (९-१०)

अव्यक्तजन्मा ब्रह्मा के उस उत्तम तीर्थ में स्नान करके मनुष्य निस्सन्देह ब्रह्मलोक प्राप्त करता है। (११)

जो मनुष्य वहाँ देवताओं और पितरों के उद्देश्य से ब्राह्मणों को भोजन कराएगा, उसके पितर सुखी होकर उसे संसार में दुर्लभ वस्तु प्रदान करेंगे। (१२)

सात ऋषियों के उद्देश्य से जो पृथक् रूप से

नारसिंहं वपुः कृत्वा हत्वा दानवमूर्जितम् ।
तिर्यग्योनौ स्थितो विष्णुः सिंहेषु रतिमाप्नुवन् ॥ २९
ततो देवाः सगन्धर्वा आराध्य वरदं शिवम् ।
ऊचुः प्रणतसर्वाङ्गा विष्णुदेहस्य लम्भने ॥ ३०
ततो देवो महात्माऽसौ शारभं रूपमास्थितः ।
युद्धं च कारयामास दिव्यं वर्षसहस्रकम् ।
युध्यमानौ तु तौ देवौ पतितौ सरमध्यतः ॥ ३१
तस्मिन् सरस्तटे विप्रो देवर्षिर्नारदः स्थितः ।
अश्वत्थवृक्षमाश्रित्य ध्यानस्थस्तो ददर्श ह ॥ ३२
विष्णुश्चतुर्भुजो जज्ञे लिङ्गाकारः शिवः स्थितः ।
तौ दृष्ट्वा तत्र पुरुषौ तुष्टाव भक्तिभावितः ॥ ३३
नमः शिवाय देवाय विष्णवे प्रभविष्णवे ।
हरये च उमाभर्त्रे स्थितिकालभृते नमः ॥ ३४
हराय बहुरूपाय विश्वरूपाय विष्णवे ।
त्र्यम्बकाय सुसिद्धाय कृष्णाय ज्ञानहेतवे ॥ ३५
धन्योऽहं सुकृती नित्यं यद् दृष्टौ पुरुषोत्तमौ ।
ममाश्रममिदं पुण्यं युवाभ्यां विमलीकृतम् ।
अद्यप्रभृति त्रैलोक्ये अन्यजन्मेति विश्रुतम् ॥ ३६
य इहागत्य स्नात्वा च पितॄन् संतर्पयिष्यति ।
तस्य श्रद्धान्वितस्येह ज्ञानमैन्द्रं भविष्यति ॥ ३७
अश्वत्थस्य तु यन्मूलं सदा तत्र वसाम्यहम् ।
अश्वत्थवन्दनं कृत्वा यमं रौद्रं न पश्यति ॥ ३८
ततो गच्छेत विप्रेन्द्रा नागस्य ह्रदमुत्तमम् ।
पौण्डरीके नरः स्नात्वा पुण्डरीकफलं लभेत् ॥ ३९
दशम्यां शुक्लपक्षस्य चैत्रस्य तु विशेषतः ।
स्नानं जपं तथा श्राद्धं मुक्तिमार्गप्रदायकम् ॥ ४०
ततस्त्रिविष्टपं गच्छेत् तीर्थं देवनिषेवितम् ।
तत्र वैतरणी पुण्या नदी पापप्रमोचनी ॥ ४१
तत्र स्नात्वाऽर्चयित्वा च शूलपाणिं वृषध्वजम् ।

नरसिंह शरीर धारण कर बलवान् दानव का वध करने के उपरान्त तिर्यग्योनि में स्थित विष्णु सिंहों में प्रेम करने लगे। (२९)

तदनन्तर गन्धर्वों सहित सभी देवों ने वरदाता शिव की आराधना कर साष्टाङ्ग प्रणाम पूर्वक विष्णु के पुनः देह (स्वरूप) धारण की प्रार्थना की। (३०)

तदनन्तर महादेव ने सरभ रूप धारण कर (नरसिंह से) सहस्र दिव्य वर्षों तक युद्ध किया। दोनों देवता युद्ध करते हुए सरोवर में गिर पड़े। उस सरोवर के तट पर अश्वत्थ वृक्ष के नीचे देवर्षि नारद ध्यानस्थ होकर बैठे थे। उन्होंने उन दोनों को देखा। चतुर्भुज रूप में विष्णु और लिङ्ग रूप में शिव हो गये। उन दोनों पुरुषों को देखकर उन्होंने भक्ति भाव से उनकी स्तुति की। (३१-३३)

शिव देव को नमस्कार है। प्रभावशाली विष्णु को नमस्कार है। स्थिति तथा संहार के आधार-स्वरूप हरि एवं उमापति को नमस्कार है। (३४)

बहुरूपधारी हर एवं विश्वरूपधारी विष्णु को नमस्कार है। सुसिद्ध त्र्यम्बक एवं ज्ञान के हेतु कृष्ण को नमस्कार है। (३५)

मैं धन्य तथा सदा पुण्यवान् हूँ क्योंकि मुझे दोनों पुरुष श्रेष्ठों का दर्शन प्राप्त हुआ। आप दोनों पुरुषों द्वारा शुद्ध किया गया मेरा यह आश्रम पवित्र हो गया। आज से त्रैलोक्य में यह 'अन्यजन्म' नाम से प्रसिद्ध होगा। (३६)

जो व्यक्ति यहाँ आकर स्नान कर पितरों का तर्पण करेगा उस श्रद्धावान् पुरुष को यहाँ ऐन्द्र ज्ञान प्राप्त होगा। (३७)

अश्वत्थ वृक्ष के मूल में मैं सदा निवास करूँगा। अश्वत्थ का वन्दन करने वाले व्यक्ति भयंकर यमराज को नहीं देखता। (३८)

हे विप्रेन्द्रो! तदनन्तर उत्तम नागह्रद में जाना चाहिए। पौंडरीक में स्नान कर मनुष्य पुण्डरीक (यज्ञ विशेष) का फल प्राप्त करता है। (३९)

शुक्ल पक्ष की, विशेषत चैत्र मास की, दशमी तिथि में वहाँ स्नान, जप और श्राद्ध करने से मुक्तिमार्ग की प्राप्ति होती है। (४०)

तदनन्तर देवताओं से निषेवित त्रिविष्टप नामक तीर्थ में जाना चाहिये वहाँ पाप को छुड़ाने वाली पवित्र वैतरणी नदी है। (४१)

वहाँ स्नानकर शूलपाणि वृषध्वज की पूजा कर

सर्वपापविशुद्धात्मा गच्छत्येव परां गतिम् ॥ ४२
ततो गच्छेत विप्रेन्द्रा रसावर्त्तमनुत्तमम् ।
तत्र स्नात्वा भक्तियुक्तः सिद्धिमाप्नोत्यनुत्तमाम् ॥ ४३
चैत्र शुक्लचतुर्दश्यां तीर्थे स्नात्वा ह्यलेपके ।
पूजयित्वा शिवं तत्र पापलेपो न विद्यते ॥ ४४
ततो गच्छेत विप्रेन्द्राः फलकीवनमुत्तमम् ।
यत्र देवाः सगन्धर्वाः साध्याश्च ऋषयः स्थिताः ।
तपश्चरन्ति विपुलं दिव्यं वर्षसहस्रकम् ॥ ४५
दृषद्वत्यां नरः स्नात्वा तर्पयित्वा च देवताः ।
अग्निष्टोमातिरात्राभ्यां फलं विन्दति मानवः ॥ ४६
सोमक्षये च संप्राप्ते सोमस्य च दिने तथा ।
यः श्राद्धं कुरुते मर्त्यस्तस्य पुण्यफलं शृणु ॥ ४७
गयायां च यथा श्राद्धं पितॄन् प्रीणाति नित्यशः ।
तथा श्राद्धं च कर्तव्यं फलकीवनमाश्रितैः ॥ ४८
मनसा स्मरते यस्तु फलकीवनमुत्तमम् ।
तस्यापि पितरस्तृप्तिं प्रयास्यन्ति न संशयः ॥ ४९
तत्रापि तीर्थं सुमहद् सर्वदेवैरलंकृतम् ।
तस्मिन् स्नातस्तु पुरुषो गोसहस्रफलं लभेत् ॥ ५०
पाणिखाते नरः स्नात्वा पितॄन् संतर्प्य मानवः ।
अवाप्नुयाद् राजसूयं सांख्यं योगं च विन्दति ॥ ५१
ततो गच्छेत सुमहत्तीर्थं मिश्रकमुत्तमम् ।
तत्र तीर्थानि मुनिना मिश्रितानि महात्मना ॥ ५२
व्यासेन मुनिशार्दूला दधीच्यर्थं महात्मना ।
सर्वतीर्थेषु स स्नाति मिश्रके स्नाति यो नरः ॥ ५३
ततो व्यासवनं गच्छेन्नियतो नियताशनः ।
मनोजवे नरः स्नात्वा दृष्ट्वा देवमणिं शिवम् ॥ ५४
मनसा चिन्तितं सर्वं सिध्यते नात्र संशयः ।
गत्वा मधुवटीं चैव देव्यास्तीर्थं नरः शुचिः ॥ ५५
तत्र स्नात्वाऽर्चयेद् देवान् पितॄंश्च प्रयतो नरः ।
स देव्या समनुज्ञातो यथा सिद्धिं लभेन्नरः ॥ ५६

मनुष्य समस्त पापों से विशुद्ध होकर निश्चय ही परमगति प्राप्त करता है। (४२)

हे विप्रश्रेष्ठो ! तदुपरान्त उत्तम रसावर्त नामक तीर्थ में जाना चाहिये। वहाँ भक्ति-युक्त होकर स्नान करने से अति उत्तम सिद्धि मिलती है। (४३)

चैत्र मास की शुक्ल चतुर्दशी तिथि को अलेपक नामक तीर्थ मे स्नान करके वहाँ शिव की पूजा करने से पाप का स्पर्श नहीं होता। (४४)

हे विप्रश्रेष्ठो ! वहाँ से उत्तम फलकीवन मे जाना चाहिये। वहाँ देवता, गन्धर्व साध्य और ऋषि लोग रहते एवं दिव्य सहस्र वर्ष पर्यन्त विपुल तप करते हैं। (४५)

दृषद्वती नदी में स्नान कर देवताओं का तर्पण करने से मनुष्य अग्निष्टोम और अतिरात्र नामक यज्ञों का फल पाता है। (४६)

सोमवार के दिन चन्द्र का क्षय (अमावस्या) होने पर जो मनुष्य वहाँ श्राद्ध करता है उसका पुण्यफल सुनो- (४७)

गया क्षेत्र में जिस प्रकार किया गया श्राद्ध पितरों को नित्य तृप्त करता है उसी प्रकार श्राद्ध फलकीवन में रहने वालों को करना चाहिये। (४८)

जो मनुष्य श्रेष्ठ फलकी वन का मन में भी स्मरण करता है उसके भी पितृगण नि सन्देह तृप्ति लाभ करते हैं। (४९)

वहीं सभी देवों से अलकृत एक सुमहत् तीर्थ है जिसमें स्नान करने वाला पुरुष सहस्र गोदान का फल प्राप्त करता है। (५०)

पाणिखात तीर्थ में स्नान कर पितरों का तर्पण करने से मनुष्य राजसूय यज्ञ तथा साख्य (ज्ञान) और योग (कर्म) के अनुष्ठान का फल प्राप्त करता है। (५१)

तदनन्तर मिश्रक नामक महान् तथा उत्तम तीर्थ में जाना चाहिए। हे मुनिश्रेष्ठो ! यहाँ महात्मा व्यास मुनि ने दधीचि के हेतु तीर्थों को मिश्रित किया था। मिश्रक तीर्थ में स्नान करने वाला मनुष्य सभी तीर्थों में स्नान कर लेता है। (५२-५३)

तदनन्तर सयमी तथा नियमित भोजनवाला होकर व्यास वन में जाना चाहिये। 'मनोजव' में स्नान कर देवमणि शिव का दर्शन करने से निस्सन्देह मनुष्य को अभीष्ट सिद्धि होती है। मनुष्य को देवीके मधुवटी नामक तीर्थ में जाकर स्नान कर देवों एव पितरों की पूजा करनी चाहिये। ऐसा करने वाला व्यक्ति देवी की आज्ञा से सिद्धि की प्राप्ति करता है। (५४-५६)

कौशिक्याः संगमे यस्तु दृषद्वत्यां नरोत्तमः ।
स्नायीत नियताहारः सर्वपापैः प्रमुच्यते ॥ ५७
ततो व्यासस्थली नाम यत्र व्यासेन धीमता ।
पुत्रशोकाभिभूतेन देहत्यागाय निश्चयः ॥ ५८
कृतो देवैश्च विप्रेन्द्राः पुनरुत्थापितस्तदा ।
अभिगम्य स्थलीं तस्य पुत्रशोकं न विन्दति ॥ ५९
किंदत्तं कूपमासाद्य तिलप्रस्थं प्रदाय च ।
गच्छेत परमां सिद्धिं ऋणैर्मुक्तिमवाप्नुयात् ॥ ६०
अह्नं च सुदिनं चैव द्वे तीर्थे भुवि दुर्लभे ।
तयोः स्नात्वा विशुद्धात्मा सूर्यलोकमवाप्नुयात् ॥ ६१
कृतजप्यं ततो गच्छेत् त्रिषु लोकेषु विश्रुतम् ।
तत्राभिषेकं कुर्वीत गङ्गायां प्रयतः स्थितः ॥ ६२
अर्चयित्वा महादेवमश्वमेधफलं लभेत् ।
कोटितीर्थे च तत्रैव दृष्ट्वा कोटीश्वरं प्रभुम् ॥ ६३
तत्र स्नात्वा श्रद्दधानः कोटियज्ञफलं लभेत् ।
ततो वामनकं गच्छेत् त्रिषु लोकेषु विश्रुतम् ॥ ६४
यत्र वामनरूपेण विष्णुना प्रभविष्णुना ।
बलेरपहृतं राज्यमिन्द्राय प्रतिपादितम् ॥ ६५
तत्र विष्णुपदे स्नात्वा अर्चयित्वा च वामनम् ।
सर्वपापविशुद्धात्मा विष्णुलोकमवाप्नुयात् ॥ ६६
ज्येष्ठाश्रमं च तत्रैव सर्वपातकनाशनम् ।
तं तु दृष्ट्वा नरो मुक्तिं संप्रयाति न संशयः ॥ ६७
ज्येष्ठे मासि सिते पक्षे एकादश्यामुपोषितः ।
द्वादश्यां च नरः स्नात्वा ज्येष्ठत्वं लभते नृषु ॥ ६८
तत्र प्रतिष्ठिता विप्रा विष्णुना प्रभविष्णुना ।
दीक्षाप्रतिष्ठासंयुक्ता विष्णुप्रीणनतत्पराः ॥ ६९
तेभ्यो दत्तानि श्राद्धानि दानानि विविधानि च ।
अक्षयाणि भविष्यन्ति यावन्मन्वन्तरस्थितिः ॥ ७०
तत्रैव कोटितीर्थं च त्रिषु लोकेषु विश्रुतम् ।
तस्मिंस्तीर्थे नरः स्नात्वा कोटियज्ञफलं लभेत् ॥ ७१

कौशिकी और दृषद्वती के संगम में स्नान करने वाला नियताहारी श्रेष्ठ पुरुष सभी पापों से मुक्त हो जाता है। (५७)

हे विप्रेन्द्रो! तदनन्तर व्यासस्थली है जहाँ पुत्रशोकाभिभूत बुद्धिमान् वेदव्यास ने शरीरत्याग का निश्चय किया था एवं तत्पश्चात् देवों ने उन्हें पुनः उठाया था। उस स्थल में जाकर मनुष्य को पुत्रशोक नहीं होता। (५८-५९)

किंदत्तकूप में जाकर एक प्रस्थ (परिमाण विशेष) तिल-दान करने से मनुष्य परमसिद्धि एवं ऋण से मुक्ति प्राप्त करता है। (६०)

अह्न एवं सुदिन नामक दो तीर्थ पृथ्वी में दुर्लभ हैं। उन दोनों में स्नान करने से विशुद्धात्मा मनुष्य सूर्यलोक प्राप्त करता है। (६१)

तदनन्तर त्रैलोक्यविश्रुत कृतजप्य नामक तीर्थ में जाना चाहिये। वहाँ नियमपूर्वक रहते हुए गंगा में स्नान करना चाहिये। यहाँ महादेव का अर्चन करने से अश्वमेध का फल प्राप्त होता है। तदुपरान्त वहीं पर श्रद्धा पूर्वक कोटितीर्थ में स्नान कर कोटीश्वर प्रभु का दर्शन करने से मनुष्य को कोटि यज्ञों का फल प्राप्त होता है। तदनन्तर त्रैलोक्य प्रसिद्ध वामनक तीर्थ में जाना चाहिये जहाँ वामनरूपधारी प्रभाव-शाली विष्णु ने बलि से राज्य अपहृत कर इन्द्र को अर्पित किया था। (६२-६५)

वहाँ विष्णुपद तीर्थ में स्नान कर वामनदेव की पूजा करने से मनुष्य समस्त पापों से शुद्ध होकर विष्णुलोक प्राप्त करता है। (६६)

वहीं पर अवस्थित सर्वपापनाशक ज्येष्ठाश्रम का दर्शन कर मनुष्य निस्सन्देह मुक्ति प्राप्त करता है। (६७)

ज्येष्ठ मास के शुक्ल पक्ष की एकादशी तिथि को उपवास कर द्वादशी के दिन स्नान करने से मानव मनुष्यों में श्रेष्ठता प्राप्त करता है। (६८)

वहाँ प्रभावशाली विष्णु ने यज्ञादि में दीक्षित तथा प्रतिष्ठित एवं अपनी आराधना में तत्पर ब्राह्मणों को प्रतिष्ठित किया था। (६९)

उन्हें दिये गये श्राद्ध और विविध दान अक्षय एवं मन्वन्तर पर्यन्त स्थिर रहने वाले होते हैं। (७०)

वहीं त्रैलोक्यविश्रुत कोटि तीर्थ है। उस तीर्थ में स्नान कर मनुष्य कोटि यज्ञों के फल को प्राप्त करता है। (७१)

यत्र देवैः सगन्धर्वैः हनुमान् प्रकटीकृतः ॥ ३
तत्र तीर्थे नरः स्नात्वा अमृतत्वमवाप्नुयात् ।
कुलोत्तारणमासाद्य तीर्थसेवी द्विजोत्तमः ॥ ४
कुलानि तारयेत् सर्वान् मातामहपितामहान् ।
शालिहोत्रस्य राजर्षेस्तीर्थे त्रैलोक्यविश्रुतम् ॥ ५
तत्र स्नात्वा विमुक्तस्तु कलुषैर्देहसंभवैः ।
श्रीकुञ्जं तु सरस्वत्यां तीर्थं त्रैलोक्यविश्रुतम् ॥ ६
तत्र स्नात्वा नरो भक्त्या अग्निष्टोमफलं लभेत् ।
ततो नैमिषकुञ्जं तु समासाद्य नरः शुचिः ॥ ७
नैमिषस्य च स्नानेन यत् पुण्यं तत् समाप्नुयात् ।
तत्र तीर्थं महाख्यातं वेदवत्या निषेवितम् ॥ ८
रावणेन गृहीतायाः केशेषु द्विजसत्तमाः ।
तद्वधाय च सा प्राणान् मुमुचे शोककर्शिता ॥ ९
ततो जाता गृहे राज्ञो जनकस्य महात्मनः ।
सीता नामेति विख्याता रामपत्नी पतिव्रता ॥ १०

वहाँ से शूलपाणि के अमृत स्थान में जाना चाहिये, जहाँ गन्धर्वों सहित देवताओं ने हनुमान् को प्रकट किया था। (३)

भिक्षु ने कहा—हे पार्वति ! मैं तुमसे यह बात पूछता हूँ कि तुम्हें यह बुद्धि किसने दी ? तुम्हारा पल्लव के समान कोमल हाथ शङ्कर के सर्पयुक्त हाथ से कैसे मिलेगा। (६३)

तथा दुकूलाम्बरशालिनी त्वं
मृगारिचर्माभिवृतस्तु रुद्रः।
त्वं चन्दनाक्ता स च भस्मभूषितो
न युक्तरूपं प्रतिभाति मे त्विदम् ॥ ६४

पुलस्त्य उवाच।

एवं वादिनि विप्रेन्द्र पार्वती भिक्षुमब्रवीत्।
मा मैवं वद भिक्षो त्वं हरः सर्वगुणाधिकः ॥ ६५

शिवो वाप्यथवा भीमः सधनो निर्धनोऽपि वा।
अलंकृतो वा देवेशस्तथा वाप्यनलंकृतः ॥ ६६

यादृशस्तादृशो वापि स मे नाथो भविष्यति।
निवार्यतामय भिक्षुर्विवक्षुः स्फुरिताधरः।
न तथा निन्दकः पापी यथा शृण्वन् शशिप्रभे ॥ ६७

पुलस्त्य उवाच।

इत्येवमुक्त्वा वरदा समुत्थातुमथैच्छत।
ततोऽत्यजद् भिक्षुरूपं स्वरूपस्थोऽभवच्छिवः ॥ ६८

उवाच प्रिये गच्छ स्वमेव भवनं पितुः।
तवार्थाय प्रहेष्यामि महर्षीन् हिमवद्गृहे ॥ ६९

यच्चेह रुद्रमीहन्त्या मृन्मयश्चेश्वरः कृतः।
असौ भद्रेश्वरेत्येवं ख्यातो लोके भविष्यति ॥ ७०

देवदानवगन्धर्वा यक्षाः किंपुरुषोरगाः।
पूजयिष्यन्ति सततं मानवाश्च शुभेप्सवः ॥ ७१

इत्येवमुक्ता देवेन गिरिराजसुता मुने।
जगामाम्बरमाविश्य स्वमेव भवनं पितुः ॥ ७२

शंकरोऽपि महातेजा विसृज्य गिरिकन्यकाम्।
पृथूदकं जगामाथ स्नानं चक्रे विधानतः ॥ ७३

ततस्तु देवप्रवरो महेश्वरः
पृथूदके स्नानमपास्तकल्मषः।
कृत्वा सनन्दिः सगणः सवाहनो
महागिरिं मन्दरमाजगाम ॥ ७४

और तुम सुन्दरवस्त्र धारण करने वाली हो किन्तु रुद्र व्याघ्रचर्म धारण करते हैं। तुम चन्दन-चर्चित हो एवं शंकर भस्म भूषित हैं। अतः मुझे यह उपयुक्त नहीं प्रतीत होता। (६४)

पुलस्त्य ने कहा—हे विप्रेन्द्र! भिक्षु के ऐसा कहने पर पार्वती ने उससे कहा—हे भिक्षुक! तुम ऐसा मत कहो। शंकर सब गुणों में श्रेष्ठ हैं। (६५)

वे देवेश शिव या भयङ्कर, सधन या निर्धन तथा अलंकृत अथवा अलङ्कार विहीन हों। वे जैसे तैसे क्यों न हों वे ही मेरे स्वामी होंगे। हे शशिप्रभे! इसे मना करो। यह भिक्षुक पुनः कुछ कहना चाहता है जिससे इसके ओठ फड़क रहे हैं। निन्दक वैसा पापी नहीं होता जैसा (निन्दा को) सुनने वाला होता है। (६६-६७)

पुलस्त्य ने कहा—ऐसा कहकर वरदा पार्वती ने वहाँ से उठ कर जाना चाहा। तदनन्तर शंकर भिक्षुरूप को त्याग कर स्वरूपस्थ हो गये। (६८)

वे स्वरूपस्थ होकर बोले—हे प्रिये! अपने पिता के घर जाओ। तुम्हारे लिये मैं हिमवान् के घर पर महर्षियों को भेजूँगा। (६९)

रुद्र को चाहने वाली तुमने यहाँ जिस मृण्मय ईश्वर को बनाया है वे संसार में भद्रेश्वर नाम से प्रसिद्ध होंगे। (७०)

देव, दानव, गन्धर्व, यक्ष, किंनर, उरग एवं मनुष्य मंगल की इच्छा से सदा उनकी पूजा करेंगे। (७१)

हे मुनि! शङ्कर के ऐसा कहने पर हिमालय-पुत्री पार्वती आकाश मार्ग से अपने पिता के घर चली गयीं। (७२)

महातेजस्वी शङ्कर भी गिरिराज की कन्या को विदाकर पृथूदक तीर्थ में गये एवं विधान पूर्वक स्नान किया। (७३)

तदनन्तर देवप्रवर महेश्वर पृथूदक में स्नान से पाप विमुक्त होकर नन्दी, गणों एवं वाहन के सहित महापर्वत मन्दर पर आये। (७४)

ततोऽब्रवीत् सुरपतिर्धर्म्यं वाक्यं हितं सुरान् ।
आत्मनो यशसो वृद्ध्यै सप्तर्षीन् विनयान्वितान् ॥ ८

हर उवाच ।

कश्यपात्रे वारुणेय गाधेय शृणु गौतम ।
भरद्वाज शृणुष्व त्वमङ्गिरस्त्वं शृणुष्व च ॥ ९
ममासीद् दक्षतनुजा प्रिया सा दक्षकोपतः ।
उत्ससर्ज सती प्राणान् योगदृष्ट्या पुरा किल ॥ १०
साऽद्य भूयः समुद्भूता शैलराजसुता उमा ।
सा मदर्थाय शैलेन्द्रो याच्यतां द्विजसत्तमाः ॥ ११

पुलस्त्य उवाच ।

समर्पयस्त्वेवमुक्ता बाढमित्यब्रुवन् वचः ।
ॐ नम. शंकरायेति प्रोक्त्वा जग्मुर्हिमालयम् ॥ १२
ततोऽप्यरुन्धतीं शर्वः प्राह गच्छस्व सुन्दरि ।
पुरन्ध्यो हि पुरन्ध्रीणां गतिं धर्मस्य वै विदुः ॥ १३
इत्येवमुक्त्वा दुर्लङ्घ्यं लोकाचारं त्वरुन्धती ।
नमस्ते रुद्र इत्युक्त्वा जगाम पतिना सह ॥ १४
गत्वा हिमाद्रिशिखरमोषधिप्रस्थमेव च ।
ददृशुः शैलराजस्य पुरीं सुरपुरीमिव ॥ १५
ततः संपूज्यमानास्ते शैलपत्नीभिरादरात् ।
सुनाभादिभिरव्यग्रै. पूज्यमानास्तु पर्वतैः ॥ १६
गन्धर्वैः किंनरैर्यक्षैस्तथान्यैस्तत्पुरस्सरैः ।
विविशुर्भवनं रम्यं हिमाद्रेर्हाटकोज्ज्वलम् ॥ १७
ततः सर्वे महात्मानस्तपसा धौतकल्मषाः ।
समासाद्य महाद्वारं संतस्थुर्द्वाःस्थकारणात् ॥ १८
ततस्तु त्वरितोऽभ्यागाद् द्वाःस्थोऽद्रिर्गन्धमादनः ।
धारयन् वै करे दण्डं पद्मरागमयं महत् ॥ १९
ततस्तमूचुर्मुनयो गत्वा शैलपतिं शुभम् ।
निवेदयास्मान् संप्राप्तान् महत्कार्यार्थिनो वयम् ॥ २०
इत्येवमुक्तः शैलेन्द्रो ऋषिभिर्गन्धमादनः ।
जगाम तत्र यत्रास्ते शैलराजोऽद्रिभिर्वृतः ॥ २१
निषण्णो भुवि जानुभ्यां दत्त्वा हस्तौ मुखे गिरिः ।

तदनन्तर सुरपति शिव ने विनयान्वित सप्तर्षियों से अपने यश का वृद्धिकारी, देवताओं के लिये हितकर एवं धर्मयुक्त वचन कहा। (८)

शङ्कर ने कहा—हे कश्यप ! हे अत्रि ! हे वसिष्ठ ! हे विश्वामित्र ! हे गौतम ! हे भरद्वाज ! हे अङ्गिरा ! आप लोग सुनें— (९)

प्राचीनकाल में दक्ष की कन्या सती मेरी प्रिया थी। उसने दक्ष के ऊपर क्रुद्ध होकर योगदृष्टि से अपने प्राणों का त्याग कर दिया। (१०)

वही आज पुनः उमा नाम से गिरिराज हिमालय की कन्या हुई है। हे द्विजसत्तमो ! आप लोग मेरे लिए उसे पर्वतराज से माँगें। (११)

पुलस्त्य ने कहा—ऐसा कहे जाने पर सप्तर्षियों ने 'अच्छा' यह वचन कहा एवं 'ॐ नमः शङ्कराय' कहकर वे हिमालय के यहाँ गये। (१२)

तदनन्तर शङ्कर ने अरुन्धती से कहा—हे सुन्दरि ! तुम भी जाओ। स्त्रियों के धर्म की गति को स्त्रियाँ ही जानती हैं। (१३)

इस प्रकार दुर्लङ्घ्य लोकाचार जिनसे कहा गया है ऐसी अरुन्धती 'नमस्ते रुद्र' ऐसा कहकर अपने पति के साथ गई। (१४)

औषधियों से युक्त हिमालय के शिखर पर जाकर सुरपुरी के सदृश शैलराज हिमालय की नगरी को देखा। (१५)

तदनन्तर शैलराज की पत्नियों, स्थिरचित्त वाले सुनाभादि पर्वतों, गन्धर्वों, किन्नरों, यक्षों एवं अन्यों से पूजित होकर वे हिमालय के स्वर्ण की तरह प्रकाशमान रमणीय भवन में प्रविष्ट हुए। (१६-१७)

तदनन्तर तपस्या से पाप-रहित वे सभी महात्मा महाद्वार पर जाकर द्वारपाल के पास रुक गये। (१८)

तदुपरान्त हाथ में पद्मरागमय महान् दण्ड धारण किये हुए द्वार स्थित गन्धमादन पर्वत शीघ्र उनके निकट गया। (१९)

तदनन्तर मुनियों ने उससे कहा—श्रीमान् शैलपति से जाकर यह संवाद कहो कि हम लोग महान् कार्य के निमित्त आये हैं। (२०)

ऋषियों के ऐसा कहने पर शैलेन्द्र गन्धमादन, पर्वतों से घिरे हुए शैलराज के समीप गये। (२१)

पृथ्वी पर घुटनों के बल बैठकर दोनों हाथ मुख के निकट ले जाकर एवं दण्ड को काँख में दबाकर उसने यह

दण्डं निक्षिप्य कक्षायामिदं वचनमब्रवीत् ॥ २२

गन्धमादन उवाच ।

इमे हि ऋषयः प्राप्ताः शैलराज तवार्थिनः ।
द्वारे स्थिताः कार्यिणस्ते तव दर्शनलालसाः ॥ २३

पुलस्त्य उवाच ।

द्वाःस्थवाक्यं समाकर्ण्य समुत्थायाचलेश्वरः ।
स्वयमभ्यागमद् द्वारि समादायार्घ्यमुत्तमम् ॥ २४
तानभ्यर्च्यार्घ्यादिना शैलः समानीय सभातलम् ।
उवाच वाक्यं वाक्यज्ञः कृतासनपरिग्रहान् ॥ २५

हिमवानुवाच ।

अनभ्रवृष्टिः किमियमुताहोऽकुसुमं फलम् ।
अप्रतर्क्यमचिन्त्यं च भवदागमनं त्विदम् ॥ २६
अद्यप्रभृति धन्योऽस्मि शैलराडद्य सत्तमाः ।
संशुद्धदेहोऽस्म्यद्यैव यद् भवन्तो ममाजिरम् ॥ २७
आत्मसंसर्गसंशुद्धं कृतवन्तो द्विजोत्तमाः ।
दृष्टिपूतं पदाक्रान्तं तीर्थं सारस्वतं यथा ॥ २८
दासोऽहं भवतां विप्राः कृतपुण्यश्च सांप्रतम् ।
येनार्थिनो हि ते यूयं तन्ममाज्ञातुमर्हथ ॥ २९
सदारोऽहं समं पुत्रैर्भृत्यैर्नप्तृभिरव्ययाः ।
किंकरोऽस्मि स्थितो युष्मदाज्ञाकारी तदुच्यताम् ॥ ३०

पुलस्त्य उवाच ।

शैलराजवचः श्रुत्वा ऋषयः संशितव्रताः ।
ऊचुरङ्गिरसं वृद्धं कार्यमद्रौ निवेदय ॥ ३१
इत्येवं चोदितः सर्वैर्ऋषिभिः कश्यपादिभिः ।
प्रत्युवाच परं वाक्यं गिरिराजं तमङ्गिराः ॥ ३२

अङ्गिरा उवाच ।

श्रूयतां पर्वतश्रेष्ठ येन कार्येण वै वयम् ।
समागतास्त्वत्सदनमरुन्धत्या समं गिरे ॥ ३३
योऽसौ महात्मा सर्वात्मा दक्षयज्ञक्षयंकरः ।
शंकरः शूलधृक् शर्वस्त्रिनेत्रो वृषवाहनः ॥ ३४
जीमूतकेतुः शत्रुघ्नो यज्ञभोक्ता स्वयं प्रभुः ।
यमीश्वरं वदन्त्येके शिवं स्थाणुं भवं हरम् ॥ ३५
भीममुग्रं महेशानं महादेवं पशोः पतिम् ।
वयं तेन प्रेषिताः स्मस्त्वत्सकाशं गिरीश्वर ॥ ३६

वचन कहा । (२२)

गन्धमादन ने कहा—हे शैलराज ! ये ऋषिगण किसी प्रयोजनवश आप के पास आये हैं और दर्शन करने की कामना से द्वार पर खड़े हैं । (२३)

पुलस्त्य ने कहा—द्वारपाल की बात सुनने के उपरान्त पर्वतराज उठकर तथा उत्तम अर्घ्य लेकर स्वयं द्वार पर गये । (२४)

अर्घ्य आदि द्वारा उनका अर्चन करने के उपरान्त सभा में लाकर उन लोगों से वाक्यज्ञ शैल ने उनके आसन ग्रहण करने पर यह वाक्य कहा । (२५)

हिमवान् ने कहा— यह बिना मेघ की वर्षा अथवा बिना फूल का फल कैसा क्योंकि आप लोगों का यह आगमन कल्पनातीत एवं अचिन्त्य है । (२६)

हे सत्तमो ! आज से मैं धन्य हुआ । आज ही मैं शैलराज हुआ । आज ही मेरा शरीर शुद्ध हुआ है क्यों कि हे द्विजोत्तमो ! आज आपने मेरे आँगन को दृष्टि-पूत, पदाक्रान्त एवं आत्मसंसर्ग से सारस्वत तीर्थ के सदृश शुद्ध किया है । (२७-२८)

हे ब्राह्मणो ! मैं आप लोगों का दास हूँ । सम्प्रति पुण्यवान् हुआ हूँ । आप लोग जो चाहते हों उसके लिए मुझे आज्ञा दें । (२९)

हे महर्षियो ! मैं स्त्री, पुत्र, नाती, भृत्यों के सहित आप का आज्ञाकारी सेवक हूँ । अतः आज्ञा दें । (३०)

पुलस्त्य ने कहा—गिरिराज की बात सुनकर प्रशस्त व्रत वाले ऋषियों ने वृद्ध अङ्गिरा मुनि से कहा—हिमवान् को आप प्रयोजन बतलायें । (३१)

इस प्रकार कश्यपादि ऋषियों से प्रेरित अङ्गिरा ने उन गिरिराज हिमालय से यह श्रेष्ठ वचन कहा । (३२)

अङ्गिरा ने कहा – हे पर्वतराज ! हम लोग अरुन्धती के साथ आप के घर जिस कार्य से आये हैं उसे सुनिये । (३३)

हे गिरीश्वर ! जिन महात्मा, सर्वात्मा, दक्ष-यज्ञ-विनाशकारी, शूलधारी, शर्व, त्रिनेत्र, वृषभवाहन, जीमूतकेतु, शत्रुघ्न, यज्ञभोक्ता, स्वयंप्रभु, भगवान् शङ्कर को कुछ लोग शिव, स्थाणु, भव, हर, भीम, उग्र, महेशान, महादेव एवं पशुपति कहते हैं उन्होंने ही हम लोगों को आप के निकट भेजा है । (३४-३६)

इयं या त्वत्सुता काली सर्वलोकेषु सुन्दरी ।
तां प्रार्थयति देवेशस्तां भवान् दातुमर्हति ॥ ३७

स एव धन्यो हि पिता यस्य पुत्री शुभं पतिम् ।
रूपाभिजनसंपत्त्या प्राप्नोति गिरिसत्तम ॥ ३८

यावन्तो जङ्गमागम्या भूताः शैल चतुर्विधाः ।
तेषां माता त्वियं देवी यतः प्रोक्तः पिता हरः ॥ ३९

प्रणम्य शंकरं देवाः प्रणमन्तु सुतां तव ।
कुरुष्व पादं शत्रूणां मूर्ध्नि भस्मपरिप्लुतम् ॥ ४०

याचितारो वयं शर्वो वरो दाता त्वमप्युमा ।
वधूः सर्वजगन्माता कुरु यच्छ्रेयसे तव ॥ ४१

पुलस्त्य उवाच ।

तद्वचोऽङ्गिरसः श्रुत्वा काली तस्थावधोमुखी ।
हर्षमागत्य महसा पुनर्दैन्यमुपागता ॥ ४२

ततः शैलपतिः प्राह पर्वतं गन्धमादनम् ।
गच्छ शैलानुपामन्त्र्य सर्वानागन्तुमर्हसि ॥ ४३

ततः शीघ्रतरः शैलो गृहाद् गृहमगाञ्जवी ।
मेर्वादीन् पर्वतश्रेष्ठानाजुहाव समंततः ॥ ४४

तेऽप्याजग्मुस्त्वरावन्तः कार्यं मत्वा महत्तदा ।
विविशुर्विस्मयाविष्टाः सौवर्णेष्वासनेषु ते ॥ ४५

उदयो हेमकूटश्च रम्यको मन्दरस्तथा ।
उद्दालको वारुणश्च वराहो गरुडासनः ॥ ४६

शुक्तिमान् वेगसानुश्च दृढशृङ्गोऽथ शृङ्गवान् ।
चित्रकूटस्त्रिकूटश्च तथा मन्दरकाचलः ॥ ४७

विन्ध्यश्च मलयश्चैव पारियात्रोऽथ दुर्दरः ।
कैलासाद्रिर्महेन्द्रश्च निषधोऽञ्जनपर्वतः ॥ ४८

एते प्रधाना गिरयस्तथाऽन्ये क्षुद्रपर्वताः ।
उपविष्टाः सभायां वै प्रणिपत्य ऋषींश्च तान् ॥ ४९

ततो गिरीशः स्वां भार्यां मेनामाहूतवांश्च सः ।
समागच्छत कल्याणी समं पुत्रेण भामिनी ॥ ५०

साऽभिवन्द्य ऋषीणां हि चरणांश्च तपस्विनी ।
सर्वान् ज्ञातीन् समाभाष्य विवेश सपुत्रा ततः ॥ ५१

ततोऽद्रिषु महाशैल उपविष्टेषु नारद ।

आप की इस समस्त लोकों में सुन्दरी पुत्री काली को देवेश (शङ्कर) माँगते हैं। आप उसे प्रदान करें। (३७)

हे गिरिसत्तम! वही पिता धन्य होता है जिसकी पुत्री रूप, कुल और सम्पत्ति से युक्त शुभ पति को प्राप्त करती है। (३८)

हे शैल! ये देवी चतुर्विध समस्त चराचर जीवों की माता हैं क्योंकि हर उन (प्राणियों) के पिता कहे गये हैं। (३९)

समस्त देवता शङ्कर को प्रणाम कर तुम्हारी पुत्री को प्रणाम करें। अपने शत्रुओं के सिर पर अपना भस्म युक्त पैर रखो। (४०)

हम लोग याचना करने वाले हैं, शङ्कर वर हैं, आप दाता हैं और समस्त संसार की जननी उमा वधू हैं। आप जो अच्छा समझें करें। (४१)

पुलस्त्य ने कहा अङ्गिरा की यह बात सुनकर काली ने मुख नीचे कर लिया। सहसा प्रसन्न होकर वे पुन खिन्न हो गयी। (४२)

तदनन्तर गिरिराज ने गन्धमादन पर्वत से कहा—जाओ। सब पर्वतों को बुला लाओ। (४३)

तदुपरान्त वेगवान् पर्वत (गन्धमादन) शीघ्रता-पूर्वक घर घर जाकर मेरु आदि सभी श्रेष्ठ पर्वतों को चारों ओर से बुला लाया। (४४)

वे सभी पर्वत भी कोई महान् कार्य समझ कर शीघ्रता से आ गये और सुवर्णमय आसनों पर विस्मयपूर्वक बैठ गये। (४५)

उदय, हेमकूट, रम्यक, मन्दर, उद्दालक, वारुण, वराह, गरुडासन, शुक्तिमान्, वेगसानु, दृढशृङ्ग, शृङ्गवान्, चित्रकूट, त्रिकूट, मन्दराचल, विन्ध्य, मलय, पारियात्र, दुर्दर, कैलास, महेन्द्र, निषध, अञ्जन-ये सभी प्रमुख पर्वत तथा छोटे-छोटे अन्य पर्वत उन ऋषियों को प्रणाम कर सभा में बैठ गये। (४६-४९)

तदनन्तर उन गिरिराज ने अपनी भार्या मेना को बुलवाया। (वह) कल्याणी भामिनी अपने पुत्र के साथ आई। (५०)

तदनन्तर वे साध्वी ऋषियों के चरणों में प्रणाम कर एवं समस्त ज्ञातियों से अनुज्ञा लेकर पुत्र के साथ बैठ गईं। (५१)

हे नारद! तदुपरान्त सभी पर्वतों के बैठ जाने

उवाच वाक्यं वाक्यज्ञः सर्वानाभाष्य सुस्वरम् ॥ ५२

हिमवानुवाच ।

इमे सप्तर्षयः पुण्या याचितारः सुतां मम ।
महेश्वरार्थे कन्यां तु तथावेद्यं भवत्सु वै ॥ ५३
तद् वदध्वं यथाप्रज्ञं ज्ञातयो यूयमेव मे ।
नोल्लङ्घ्य युष्मान् दास्यामि तत्क्षमं वक्तुमर्हथ ॥ ५४

पुलस्त्य उवाच ।

हिमवद्वचनं श्रुत्वा मेर्वाद्याः स्थावरोत्तमाः ।
सर्व एवाब्रुवन् वाक्यं स्थिताः स्वेष्वासनेषु ते ॥ ५५
याचितारश्च मुनयो वरस्त्रिपुरहा हरः ।
दीयतां शैल कालीयं जामाताऽभिमतो हि नः ॥ ५६
मेनाप्यथाह भर्तारं शृणु शैलेन्द्र मद्वचः ।
पितृनाराध्य देवैर्मे दत्ताऽनेनैव हेतुना ॥ ५७
यस्तस्यां भूतपतिना पुत्रो जातो भविष्यति ।
स हनिष्यति दैत्येन्द्रं महिषं तारकं तथा ॥ ५८
इत्येवं मेनया प्रोक्तः शैलैः शैलेश्वरः सुताम् ।
प्रोवाच पुत्रि दत्ताऽसि शर्वाय त्वं मयाऽधुना ॥ ५९
ऋषीनुवाच कालीयं मम पुत्री तपोधनाः ।
प्रणामं शंकरवधूर्भक्तिनम्रा करोति वः ॥ ६०
ततोऽप्यरुन्धती कालीमङ्कमारोप्य चाटुकैः ।
लज्जमानां समाश्वास्य हरनामोदितैः शुभैः ॥ ६१
ततः सप्तर्षयः प्रोचुः शैलराज निशामय ।
जामित्रगुणसंयुक्तां तिथिं पुण्यां सुमङ्गलाम् ॥ ६२
उत्तराफाल्गुनीयोगं तृतीयेऽह्नि हिमांशुमान् ।
गमिष्यति च तत्रोक्तो मुहूर्तो मैत्रनामकः ॥ ६३
तस्यां तिथ्यां हरः पाणिं ग्रहीष्यति समन्त्रकम् ।
तत् पुण्या वयं यामस्तदनुज्ञातुमर्हसि ॥ ६४
ततः संपूज्य विधिना फलमूलादिभिः शुभैः ।
विसर्जयामास शनैः शैलराड् ऋषिपुंगवान् ॥ ६५
तेऽप्याजग्मुर्महावेगात् स्वाक्रम्य मरुदालयम् ।
आसाद्य मन्दरगिरिं भूयोऽवन्दन्त शंकरम् ॥ ६६
प्रणम्योचुर्महेशानं भवान् भर्त्ताऽद्रिजा वधूः ।

पर उनकी अनुमति लेकर वाक्यज्ञ महाशैल ने मधुर वचन कहा। (५२)

हिमवान् ने कहा—ये पुण्यात्मा सप्तर्षि शङ्कर के लिए मेरी कन्या को माँग रहे हैं। यही आप लोगों से निवेदन करना है। (५३)

आप ही मेरे ज्ञाति-बन्धु हैं अतः अपनी बुद्धि के अनुसार परामर्श दें। आप का उल्लङ्घन कर मैं (कन्या का) दान नहीं करूँगा, अतः आप लोग उचित परामर्श दें। (५४)

पुलस्त्य ने कहा—हिमवान् की बात सुनकर मेरु प्रभृति सभी गिरियों ने अपने-अपने आसन पर बैठे हुए ही कहा— (५५)

याचना करने वाले सप्तर्षि हैं, और त्रिपुरासुर का वध करने वाले शङ्कर वर हैं। हे शैलराज! इस काली को आप प्रदान करें। जामाता हम लोगों को पसन्द है। (५६)

तदनन्तर मेना ने पति से कहा—हे शैलेन्द्र! मेरी बात सुनिये। पितरों की आराधना पर इन देवों ने मुझे इसलिए दिया था कि भूतपति द्वारा इससे जो पुत्र उत्पन्न होगा, वह दैत्येन्द्र महिष एवं तारक का वध करेगा। (५७-५८)

मेना तथा पर्वतों के इस प्रकार कहने पर हिमवान् ने अपनी कन्या से कहा—हे पुत्रि! अब मैंने तुम्हें शङ्कर को दे दिया। (५९)

ऋषियों से उन्होंने कहा—हे तपोधनो! यह मेरी पुत्री तथा शङ्कर की वधू काली भक्ति से नम्र हो कर आप लोगों को प्रणाम करती है। (६०)

तदनन्तर अरुन्धती ने लज्जित हो रही काली को गोद में बैठा कर शङ्कर के शुभ नामों के उच्चारण से उसे समाश्वस्त किया। (६१)

तदुपरान्त सप्तर्षियों ने कहा—हे शैलराज! जामित्रगुणसंयुक्त मंगलमय पवित्र तिथि को सुनिये। तीसरे दिन चन्द्रमा उत्तराफाल्गुनी नक्षत्र से योग करेगा। उसे मैत्र नामक मुहूर्त कहते हैं। (६२-६३)

उस तिथि में शङ्कर मन्त्र के साथ आप की पुत्री का पाणिग्रहण करेंगे। आप अनुमति दें, हम लोग जाते हैं। (६४)

तदनन्तर शैलराज ने सुन्दर फलमूलों से विधिपूर्वक पूजा कर उन ऋषियों को विदा किया। (६५)

वे आकाशमार्ग से अत्यन्त वेग से मन्दरगिरि पर आये एवं महेश को प्रणाम कर कहा—आप वर एवं गिरिजा वधू हैं। प्रजा सहित तीनों लोक धनवाहन (शिव)

सप्तर्षिकास्त्रयो लोका द्रक्ष्यन्ति घनवाहनम् ॥ ६७
ततो महेश्वरः प्रीतो मुनीन् सर्वाननुक्रमात् ।
पूजयामास विधिना अरुन्धत्या समं हरः ॥ ६८
ततः संपूजिता जग्मुः सुराणां मन्त्रणाय ते ।
तेऽप्याजग्मुर्हरं द्रष्टुं ब्रह्मविष्णिन्द्रभास्कराः ॥ ६९
गेहं ततोऽभ्येत्य महेश्वरस्य
कृतप्रणामा निविशुर्महर्षे ।
सस्मार नन्दिप्रमुखांश्च सर्वा-
नभ्येत्य ते वन्द्य हरं निषण्णाः ॥ ७०
देवैर्गणैश्चापि वृतो गिरीशः
स शोभते मुक्तजटाग्रभारः ।
यथा वने सर्जकदम्बमध्ये
प्ररोहमूलोऽथ वनस्पतिर्वै ॥ ७१

इति श्रीवामनपुराणे षड्विंशोऽध्यायः ॥२६॥

२७

पुलस्त्य उवाच ।
समागतान् सुरान् दृष्ट्वा नन्दिराख्यातवान् विभोः ।
अथोत्थाय हरिं भक्त्या परिष्वज्य न्यपीडयत् ॥ १
ब्रह्माणं शिरसा नत्वा समाभाष्य शतक्रतुम् ।
आलोक्यान्यान् सुरगणान् सभावयत् स शंकरः ॥ २
गणाश्च जय देवेति वीरभद्रपुरोगमाः ।
शैवाः पाशुपताद्याश्च विविशुर्मन्दराचलम् ॥ ३
ततस्तस्मान्महाशैलं कैलासं सह दैवतैः ।
जगाम भगवान् शर्वः कर्तुं वैवाहिकं विधिम् ॥ ४
ततस्तस्मिन् महाशैले देवमाताऽदितिः शुभा ।
सुरभिः सुरसा चान्याश्चक्रुर्मण्डनमाकुलाः ॥ ५

का दर्शन करेंगे । (६६-६७)

तदनन्तर शङ्कर ने प्रसन्न होकर क्रमानुसार अरुन्धती सहित सप्तर्षियों की विधिपूर्वक पूजा की । (६८)

(शिव द्वारा) भली भाँति पूजित होकर वे देवों को निमन्त्रित करने गये । (तदनन्तर) वे ब्रह्मा, विष्णु, इन्द्र एवं सूर्य आदि (देवता) भी शिव का दर्शन करने आये । (६९)

हे महर्षि ! वहाँ जाकर (शङ्कर को) प्रणाम करने के उपरान्त वे लोग शङ्कर के गृह में प्रविष्ट हुए । उन्होंने नन्दी आदि का स्मरण किया । वे सभी आकर शङ्कर को प्रणाम करने के पश्चात् बैठ गये । (७०)

देवों एवं गणों से आवृत खुली जटा वाले वे शङ्कर वन में सर्ज और कदम्ब के मध्य प्ररोहयुक्त वटवृक्ष के सदृश शोभित हो रहे थे । (७१)

श्रीवामनपुराण में छब्बीसवाँ अध्याय समाप्त ॥२६॥

२७

पुलस्त्य ने कहा—नन्दी ने आये हुए समस्त देवताओं को देखकर शङ्कर से बताया । शङ्कर ने उठकर भक्तिपूर्वक विष्णु का गाढ़ आलिङ्गन किया । (१)

उन शङ्कर ने ब्रह्मा को शिर से प्रणाम किया एवं इन्द्र से कुशल समाचार पूछा तथा अन्य देवों की ओर देखकर उनका आदर किया । (२)

वीरभद्रादि शैव एवं पाशुपत गण 'जय देव' कहते हुए मन्दराचल में प्रविष्ट हुए । (३)

तदनन्तर भगवान् शिव वैवाहिक विधि सम्पन्न करने के लिए देवताओं सहित कैलास नामक महान् पर्वत पर गये। (४)

तदुपरान्त उस महान् पर्वत पर देवमाता कल्याणी अदिति, सुरभि, सुरसा एवं अन्य स्त्रियों ने शीघ्रता से शङ्कर का मण्डन किया । (५)

महास्थिशेखरी चारुरोचनातिलको हरः ।
सिंहाजिनी चालिनीलभुजंगकृतकुण्डलः ॥ ६
महाहिरत्नवलयो हारकेयूरनूपुरः ।
समुन्नतजटाभारो वृषभस्थो विराजते ॥ ७
तस्याग्रतो गणाः स्वैः स्वैरारूढा यान्ति वाहनैः ।
देवाश्च पृष्ठतो जग्मुर्हुताशनपुरोगमाः ॥ ८
वैनतेयं समारूढः सह लक्ष्म्या जनार्दनः ।
प्रयाति देवपार्श्वस्थो हंसेन च पितामहः ॥ ९
गजाधिरूढो देवेन्द्रश्छत्रं शुक्लपटं विभुः ।
धारयामास विततं शच्या सह सहस्रदृक् ॥ १०
यमुना सरितां श्रेष्ठा वालव्यजनमुत्तमम् ।
श्वेतं प्रगृह्य हस्तेन कच्छपे सुस्थिता ययौ ॥ ११
हंसकुन्देन्दुसंकाशं वालव्यजनमुत्तमम् ।
सरस्वती सरिच्छ्रेष्ठा गजारूढा समादधे ॥ १२
ऋतवः षट् समादाय कुसुमं गन्धसंयुतम् ।
पञ्चवर्णं महेशानं जग्मुस्ते कामचारिणः ॥ १३
मत्तमैरावणनिभं गजमारुह्य वेगवान् ।
अनुलेपनमादाय ययौ तत्र पृथूदकः ॥ १४
गन्धर्वास्तुम्बरुमुखा गायन्तो मधुरस्वरम् ।
अनुजग्मुर्महादेवं वादयन्तश्च किन्नराः ॥ १५
नृत्यन्त्योऽप्सरश्चैव स्तुवन्तो मुनयश्च तम् ।
गन्धर्वा यान्ति देवेशं त्रिनेत्रं शूलपाणिनम् ॥ १६
एकादश तथा कोट्यो रुद्राणां तत्र वै ययुः ।
द्वादशैवादितेयानामष्टौ कोट्यो वसूनपि ॥ १७
सप्तषष्टिस्तथा कोट्यो गणानामृषिसत्तम ।
चतुर्विंशत् तथा जग्मुर्ऋषीणामूर्ध्वरेतसाम् ॥ १८
असंख्यातानि यूथानि यक्षकिन्नररक्षसाम् ।
अनुजग्मुर्महेशानं विवाहाय समाकुलाः ॥ १९
ततः क्षणेन देवेशः क्ष्माधराधिपतेस्तलम् ।
संप्राप्तास्त्वागमन् शैलाः कुञ्जरस्थाः समन्ततः ॥ २०
ततो ननाम भगवांस्त्रिनेत्रः स्थावराधिपम् ।
शैलाः प्रणेमुरीशानं ततोऽसौ मुदितोऽभवत् ॥ २१
समं सुरैः पार्षदैश्च विवेश वृषकेतनः ।
नन्दिना दर्शिते मार्गे शैलराजपुरं महत् ॥ २२

नरकपाल धारी, सुन्दर गोरोचन के तिलक वाले, व्याघ्र चर्मधारी, भ्रमर के सदृश नीले (काले) सर्प का कुण्डल धारण किये, महान् सर्पों का रत्नकङ्कण पहने, हार, केयूर एवं नूपुर धारण किये तथा लम्बी, उन्नत जटा समूह वाले शंकर वृषभ पर विराजित हुए। (६-७)

शङ्कर के आगे अपने-अपने वाहनों पर बैठे उनके गण एवं उनके पीछे अग्नि आदि देवता चले। (८)

शङ्कर के पार्श्व में लक्ष्मी सहित गरुडारूढ विष्णु एवं हंसारूढ ब्रह्मा चलने लगे। (९)

शची सहित गजारूढ सहस्रनेत्र इन्द्र ने शुक्ल वस्त्र निर्मित विस्तृत छत्र धारण किया। (१०)

नदियों में श्रेष्ठ यमुना कच्छप पर सवार हो अपने हाथ में उत्तम श्वेत चँवर लेकर चलने लगी। (११)

सरिच्छ्रेष्ठा सरस्वती भी हाथी पर चढ़कर हंस, कुन्द एवं इन्दु सदृश चँवर लेकर चलने लगी। (१२)

कामचारी छः ऋतुएँ पाँच वर्णों के सुगन्धित पुष्प लेकर शङ्कर के साथ चलने लगीं। (१३)

ऐरावत तुल्य मत्त गज पर आरूढ़ पृथूदक अनुलेपन लेकर चला। (१४)

मधुर स्वर से गायन कर रहे तुम्बरुप्रभृति गन्धर्व एवं बाजा बजा रहे किन्नर शङ्कर के पीछे पीछे चले। (१५)

नृत्य कर रही अप्सरायें तथा देवेश शूलपाणि त्रिलोचन की स्तुति करते हुए मुनि तथा गन्धर्व चले। (१६)

हे ऋषिसत्तम! ग्यारह कोटि रुद्र, बारह कोटि आदित्य, आठ कोटि वसु, सड़सठ कोटि गण एवं चौबीस (कोटि) ऊर्ध्वरेता ऋषियों ने प्रस्थान किया। (१७-१८)

महेश के पीछे यक्ष किन्नर एवं राक्षसों के असंख्य यूथ विवाह के लिए आकुलतापूर्वक चले। (१९)

तदुपरान्त देवेश क्षणमात्र में पर्वतराज हिमालय पर पहुँच गये। चारों ओर से गजारूढ़ पर्वत उनके पास एकत्रित हो गये। (२०)

तदुपरान्त त्रिलोचन भगवान् शंकर ने पर्वतराज को प्रणाम किया तथा अन्य पर्वतों ने शिव को प्रणाम किया जिससे वे प्रसन्न हो गये। (२१)

नन्दी द्वारा दिखाये गये मार्ग से देवताओं एवं पार्षदों सहित वृषकेतन शंकर पर्वतराज के महान् पुर में प्रविष्ट हुए। (२२)

जीमूतकेतु रायात इत्येवं नगरस्त्रियः ।
निजं कर्म परित्यज्य दर्शनव्यापृताभवन् ॥ २३
माल्यार्द्धमन्या चादाय करेणैकेन भामिनी ।
केशपाशं द्वितीयेन शंकराभिमुखी गता ॥ २४
अन्याऽलक्तकरागाढ्यं पादं कृत्वाकुलेक्षणा ।
अनलक्तकमेकं हि हरं द्रष्टुमुपागता ॥ २५
एकेनाक्ष्णाञ्जितेनैव श्रुत्वा भीममुपागतम् ।
साञ्जनां च प्रगृह्यान्या शलाकां सुष्ठु धावति ॥ २६
अन्या सरसनं वासः पाणिनादाय सुन्दरी ।
उन्मत्तेवागमन्नग्ना हरदर्शनलालसा ॥ २७
अन्यातिक्रान्तमीशानं श्रुत्वा स्तनभरालसा ।
अनिन्दत रुषा बाला यौवनं स्वं कृशोदरी ॥ २८
इत्थं स नागरस्त्रीणां क्षोभं संजनयन् हरः ।
जगाम वृषभारूढो दिव्यं श्वशुरमन्दिरम् ॥ २९
ततः प्रविष्टं प्रसमीक्ष्य शंभुं
शैलेन्द्रवेश्मन्यबला ब्रुवन्ति ।
स्थाने तपो दुश्चरमम्बिकाया-
श्चीर्णं महानेष सुरस्तु शंभुः ॥ ३०
स एष येनाङ्गमनङ्गतां कृतं
कन्दर्पनाम्नः कुसुमायुधस्य ।
क्रतोः क्षयी दक्षविनाशकर्ता
भगाक्षिहा शूलधरः पिनाकी ॥ ३१
नमो नमः शंकर शूलपाणे
मृगारिचर्माम्बर कालशत्रो ।
महाहिहाराङ्कितकुण्डलाय
नमो नमः पार्वतिवल्लभाय ॥ ३२
इत्थं संस्तूयमानः सुरपतिविधृतेनातपत्रेण शंभुः
सिद्धैर्वन्द्यः सयक्षैरहिकृतवलयी चारुभस्मोपलिप्तः ।
अग्रस्थेनाग्रजेन प्रमुदितमनसा विष्णुना चानुगेन
वैवाहीं मङ्गलाढ्यां हुतवहमुदितामारुरोहाथ वेदीम् ॥ ३३
आयाते त्रिपुरान्तके सहचरैः सार्धं च सप्तर्षिभि-
र्व्यग्रोऽभूद् गिरिराजवेश्मनिजनः काल्याः समालंकृतौ ।

जीमूतकेतु शंकर को आया जान नगर की स्त्रियाँ अपना काम छोड़कर उनके दर्शन में संलग्न हो गईं । (२३)

एक स्त्री एक हाथ में आधी माला और दूसरे हाथ में अपने केशपाश को पकड़े हुए शङ्कर की ओर दौड़ी । (२४)

अन्य उत्सुक नेत्रों वाली एक पैर में महावर लगा कर तथा दूसरे में बिना महावर लगाये शङ्कर को देखने चली आयी । (२५)

कोई महिला शङ्कर को आया सुनकर एक आँख में आँजन लगाये और दूसरी आँख के लिए अञ्जनयुक्त शलाका लिये दौड़ पड़ी । (२६)

शंकर के दर्शन की लालसा से दूसरी सुन्दरी उन्मत्ता की तरह करधनी सहित वस्त्र को हाथ में लिए नङ्गी ही चली आयी । (२७)

महादेव का आना सुनकर दूसरी स्तन के भार से अलसायी कृशोदरी बाला क्रोध से अपने यौवन की निन्दा करने लगी । (२८)

इस प्रकार नगर की महिलाओं को क्षुब्ध करते हुए वृषभारूढ शङ्कर अपने श्वसुर के दिव्य मन्दिर में गये । (२९)

तदनन्तर घर में प्रविष्ट शम्भु को देखकर शैलेन्द्र के घर में आई हुई स्त्रियाँ कहने लगीं कि पार्वती द्वारा किया गया घोर तप उचित है । क्योंकि ये शङ्कर महान् देव हैं । (३०)

ये वही हैं जिन्होंने कन्दर्प नामक कुसुमायुध के अङ्ग को नष्ट कर दिया । ये ही क्रतुक्षयी, दक्षविनाशक, भगाक्षिहन्ता, शूलधर एवं पिनाकी हैं । (३१)

हे शङ्कर ! हे शूलपाणे ! हे व्याघ्रचर्मधारिन् ! हे कालशत्रो ! हे महान् सर्पों का हार और कुण्डल धारण करने वाले पार्वतीवल्लभ ! आप को बारम्बार नमस्कार है । (३२)

इस प्रकार संस्तुत तथा इन्द्र के द्वारा धारण किये छत्र से युक्त, सिद्धों एवं यक्षों द्वारा वन्दनीय, सर्प का कंकण पहने सुन्दर भस्म से उपलिप्त, ब्रह्मा को आगे किये हुये एवं विष्णु द्वारा अनुगत शिव मङ्गलमयी अग्निपूर्ण वैवाहिक वेदी पर गये । (३३)

सहचरों और सप्तर्षियों के साथ त्रिपुरान्तक शिव के आने पर हिमवान् के घर के लोग काली के सजाने में एवं आये हुए पर्वत देवताओं की पूजा, और सत्कार में व्यस्त

व्याकुलत्वं समुपगताश्च गिरय. पूजादिना देवताः
प्रायोऽव्याकुलिता भवन्ति सुहृद. कन्याविवाहोत्सुकाः॥३४

प्रसाध्य देवीं गिरिजां ततः स्त्रियो
दुकूलशुक्लाभिवृताङ्गयष्टिकाम् ।
भ्रात्रा सुनामेन तदोत्सवे कृते
सा शंकराभ्याशमथोपपादिता ॥ ३५

ततः शुभे हर्म्यतले हिरण्मये
स्थिताः सुराः शङ्करकालिचेष्टितम् ।
पश्यन्ति देवोऽपि समं कृशाङ्गया
लोकानुजुष्ट पदमाससाद ॥ ३६

यत्र क्रीडा विचित्राः सकुसुमतरवो वारिणो बिन्दुपातै-
र्गन्धाल्यैर्गन्धचूर्णैरविरलमवनौ गुण्डितौ गुण्डिकायाम् ।
मुक्तादामैः प्रकाम हरगिरितनया क्रीडनार्थं तदाऽघ्नत्
पश्चात्सिन्दूरपुञ्जैरविरतविततैश्चक्रतुः क्ष्मां सुरक्ताम् ॥३७

एवं क्रीडां हरः कृत्वा समं च गिरिकन्यया ।
आगच्छद् दक्षिणां वेदिमृषिभिः सेवितां दृढाम् ॥ ३८

अथाजगाम हिमवान् शुक्लाम्बरधरः शुचिः ।
पवित्रपाणिरादाय मधुपर्कमथोज्ज्वलम् ॥ ३९

उपविष्टस्त्रिनेत्रस्तु शार्क्रीं दिशमपश्यत ।
सप्तर्षिकांश्च शैलेन्द्रः सूपविष्टोऽवलोकयन् ॥ ४०

सुखासीनस्य शर्वस्य कृताञ्जलिपुटो गिरिः ।
प्रोवाच वचनं श्रीमान् धर्मसाधनमात्मनः ॥ ४१

हिमवानुवाच ।

मत्पुत्रीं भगवन् कालीं पौत्रीं च पुलहाग्रजे ।
पितॄणामपि दौहित्रीं प्रतीच्छेमां मयोद्यताम् ॥ ४२

पुलस्त्य उवाच ।

इत्येवमुक्त्वा शैलेन्द्रो हस्तं हस्तेन योजयन् ।
प्रादात् प्रतीच्छ भगवन् इदमुच्चैरुदीरयन् ॥ ४३

हर उवाच ।

न मेऽस्ति माता न पिता तथैव
न ज्ञातयो वाऽपि च बान्धवाश्च ।
निराश्रयोऽहं गिरिशृङ्गवासी
सुतां प्रतीच्छामि तवाद्रिराज ॥ ४४

हो गये। कन्या के विवाह में उत्सुक सुहृद् लोग प्राय व्याकुल हो ही जाते हैं। (३४)

तदनन्तर पार्वती के शरीर को स्त्रियों ने उज्ज्वल रेशमी वस्त्रों से आच्छादित कर सजाया एवं भाई सुनाभ वैवाहिक उत्सव के लिए उसे शङ्कर के निकट ले गये। (३५)

तदनन्तर सुवर्णमय प्रासाद के भीतर बैठे हुए देवगण शङ्कर और पार्वती की वैवाहिक चेष्टाओं को देखने लगे और महादेव भी कृशाङ्गी पार्वती के साथ लोक सेवित स्थान को प्राप्त किये। (३६)

सुन्दर पुष्पों वाले वृक्षों से अलङ्कृत भूमि के घेरे में क्रीडा करते हुए शङ्कर और पार्वती ने एक दूसरे पर सुगन्धित जलविन्दुओं और गन्धचूर्णों की अविरल वर्षा की। तदनन्तर उन दोनों ने क्रीडनार्थ एक दूसरे को मुक्ता-दाम से मारने के उपरान्त सिन्दूरपुञ्ज की अविरत वर्षा से पृथ्वी को लाल कर दिया। (३७)

इस प्रकार पार्वती के साथ क्रीडा कर शङ्कर ऋषियों से सेवित सुदृढ़ दक्षिण वेदी पर आये। (३८)

तदनन्तर पवित्री पहने तथा श्वेतवस्त्र धारण किये हिमवान् उज्ज्वल मधुपर्क लेकर आये। (३९)

त्रिनेत्र बैठे हुए ऐन्द्री (पूर्व) दिशा को देख रहे थे तथा शैलेन्द्र ने सप्तर्षियों की ओर देखते हुये भली भांति आसन ग्रहण किया। (४०)

सुखासीन शङ्कर से गिरि ने हाथ जोड़कर अपने धर्म का साधक वचन कहा। (४१)

हिमवान् ने कहा—हे भगवन्! मेरे द्वारा दी जा रही पुलहाग्रज की पौत्री, पितरों की दौहित्री एवं मेरी पुत्री, को आप स्वीकार करें। (४२)

पुलस्त्य ने कहा—यह कहकर शैलेन्द्र ने (शङ्कर के) हाथ से (पार्वती के) हाथ को मिलाकर उच्च स्वर से यह कहते हुये कि 'हे भगवन्! इसे स्वीकार करें' दिया। (४३)

शङ्कर ने कहा—हे पर्वतराज! मेरे पिता, माता, दायाद या कोई बान्धव नहीं है। मैं निराश्रय होकर गिरिशिखर पर रहता हूँ। मैं आप की पुत्री को स्वीकार करता हूँ। (४४)

इत्येवमुक्त्वा वरदोऽप्यपीडयत्
　　करं करेणाद्रिकुमारिकायाः ।
सा चापि संस्पर्शमवाप्य शंभोः
　　परां मुदं लब्धवती सुरर्षे ॥ ४५
तथाधिरूढो वरदोऽथ वेदिं
　　सहाद्रिपुत्र्या मधुपर्कमश्नन् ।
दत्त्वा च लाजान् कलमस्य शुक्लां-
　　स्ततो विरिञ्चो गिरिजामुवाच ॥ ४६
कालि पश्यस्व वदनं भर्तुः शशधरप्रभम् ।
समदृष्टिः स्थिरा भूत्वा कुरुष्वाग्नेः प्रदक्षिणम् ॥ ४७
ततोऽम्बिका हरमुखे दृष्टे शैत्यमुपागता ।
यथार्करश्मिसंतप्ता प्राप्य वृष्टिमिवावनिः ॥ ४८
भूयः प्राह विभोर्वक्त्रमीक्षस्वेति पितामहः ।
लज्जया साऽपि दृष्टेति शनैर्ब्रह्माणमब्रवीत् ॥ ४९
समं गिरिजया तेन हुताशस्त्रिःप्रदक्षिणम् ।
कृतो लाजाश्च हविषा समं क्षिप्ता हुताशने ॥ ५०
ततो हराङ्घ्रिर्मालिन्या गृहीतो दायकारणात् ।
किं याचसि च दास्यामि मुञ्चस्वेति हरोऽब्रवीत् ॥ ५१
मालिनी शंकरं प्राह मत्सख्या देहि शंकर ।
सौभाग्यं निजगोत्रीयं ततो मोक्षमवाप्स्यसि ॥ ५२
अथोवाच महादेवो दत्तं मालिनि मुञ्च माम् ।
सौभाग्यं निजगोत्रीयं योऽस्यास्तं शृणु वच्मि ते ॥ ५३
योऽसौ पीताम्बरधरः शङ्खभृक् मधुसूदनः ।
एतदीयो हि सौभाग्यो दत्तोऽस्मद्गोत्रमेव हि ॥ ५४
इत्येवमुक्ते वचने प्रमुमोच वृषध्वजम् ।
मालिनी निजगोत्रस्य शुभचारित्रमालिनी ॥ ५५
यदा हरो हि मालिन्या गृहीतश्चरणे शुभे ।
तदा कालीमुखं ब्रह्मा ददर्श शशिनोऽधिकम् ॥ ५६
तद् दृष्ट्वा क्षोभमगमत् शुक्रच्युतिमवाप च ।
तच्छुक्रं वालुकायां च खिलीचक्रे ससाध्वसः ॥ ५७
ततोऽब्रवीद्धरो ब्रह्मन् न द्विजान् हन्तुमर्हसि ।

यह कहकर वरदायक शङ्कर ने पर्वतपुत्री पार्वती के हाथ को अपने हाथ में लिया हे देवर्षि ! शङ्कर के हाथ का स्पर्श प्राप्त कर उसे भी अत्यन्त आनन्द हुआ । (४५)

तदनन्तर मधुपर्क खाते हुए वरदाता शङ्कर पर्वतपुत्री के साथ वेदी पर बैठे । तदुपरान्त धान का सफेद लावा देकर ब्रह्मा ने गिरिजा से कहा— (४६)

हे काली ! पति के चन्द्र सदृश मुख को देखो एवं समदृष्टि से स्थिर होकर अग्नि की प्रदक्षिणा करो । (४७)

तदनन्तर शङ्कर का मुख देखने पर अम्बिका को इस प्रकार की शीतलता प्राप्त हुई जैसी सूर्यकिरणसन्तप्त पृथ्वी को वृष्टि से प्राप्त होती है । (४८)

पितामह ने पुनः कहा—विभु का मुख देखो । उसने भी लज्जा पूर्वक धीरे से ब्रह्मा से कहा—देख लिया । (४९)

तदनन्तर गिरिजा के साथ उन्होंने अग्नि की तीन प्रदक्षिणा की एवं अग्नि में हविष्य के साथ लावा की आहुति दी । (५०)

तदनन्तर मालिनी ने दाय (अर्थात् नेग) के लिए शङ्कर का पैर पकड़ लिया । शङ्कर ने कहा—क्या माँगती हो ? मैं दूँगा । पैर छोड़ दो । (५१)

मालिनी ने शङ्कर से कहा—हे शङ्कर ! मेरी सखी को अपने गोत्र का सौभाग्य दीजिए तभी छुटकारा मिलेगा । (५२)

तदनन्तर महादेव ने कहा—हे मालिनी ! मैंने दिया । मुझे छोड़ो । इसका जो गोत्रीय सौभाग्य होगा उसे मैं तुम्हें बतलाता हूँ । तुम सुनो । (५३)

ये जो पीताम्बर शङ्खधारी मधुसूदन हैं मैंने इनके ही सौभाग्य को तथा अपने गोत्र को दिया । (५४)

इस प्रकार शंकर के कहने पर अपने कुल की शुभ सच्चरित्रता की माला धारण करने वाली मालिनी ने शङ्कर को छोड़ दिया । (५५)

जब मालिनी ने शङ्कर के दोनों चरणों को पकड़ा उस समय ब्रह्मा ने चन्द्रमा से भी अधिक सुन्दर काली के मुख को देखा । (५६)

उसे देखने से क्षोभ होने के कारण उनका शुक्र च्युत हो गया । भयवश उन्होंने उस शुक्र को बालुका में छिपा दिया । (५७)

तदनन्तर शङ्कर ने कहा—हे ब्रह्मन् ! ब्राह्मणों का वध

अमी महर्षयो धन्या वालखिल्याः पितामह ॥ ५८
ततो महेशवाक्यान्ते समुत्तस्थुस्तपस्विनः ।
अष्टाशीतिसहस्राणि वालखिल्या इति स्मृताः ॥ ५९
ततो विवाहे निर्वृत्ते प्रविष्टः कौतुकं हरः ।
रेमे सहोमया रात्रिं प्रभाते पुनरुत्थितः ॥ ६०
ततोऽद्रिपुत्रीं समवाप्य शंभुः
सुरैः समं भूतगणैश्च हृष्टः ।
संपूजितः पर्वतपार्थिवेन
स मन्दरं शीघ्रमुपाजगाम ॥ ६१
ततः सुरान् ब्रह्महरीन्द्रमुख्यान्
प्रणम्य संपूज्य यथाविभागम् ।
विसर्ज्य भूतैः सहितो महीध्र-
मध्यावसन्मन्दरमष्टमूर्तिः ॥ ६२

इति श्रीवामनपुराणे सप्तविंशोऽध्याय ॥२७॥

२८

पुलस्त्य उवाच ।
ततो गिरौ वसन् रुद्रः स्वेच्छया विचरन् मुने ।
विश्वकर्माणमाहूय प्रोवाच कुरु मे गृहम् ॥ १
ततश्चकार शर्वस्य गृहं स्वस्तिकलक्षणम् ।
योजनानि चतुःषष्टिः प्रमाणेन हिरण्मयम् ॥ २
दन्ततोरणनिर्व्यूहं मुक्ताजालान्तरं शुभम् ।
शुद्धस्फटिकसोपानं वैडूर्यकृतरूपकम् ॥ ३
सप्तकक्षं सुविस्तीर्णं सर्वैः समुदितं गुणैः ।
ततो देवपतिश्चक्रे यज्ञं गार्हस्थ्यलक्षणम् ॥ ४
तं पूर्वचरितं मार्गमनुयाति स्म शंकरः ।

मत कीजिए। हे पितामह! ये सभी बालखिल्य महर्षि हैं, जो बड़े ही धन्य हैं। (५८)

तदुपरान्त शङ्कर के कहने के अनन्तर अट्ठासी हजार बालखिल्य नामक तपस्वी उठ खड़े हुए। (५९)

तदनन्तर विवाह हो जाने पर शङ्कर कौतुकागार (कोहबर) में गये। उन्होंने रात्रि में पार्वती के साथ रमण किया और पुनः प्रातःकाल उठे। (६०)

तदुपरान्त पार्वती को प्राप्त कर प्रसन्न हुये शङ्कर पर्वतराज से पूजित होने के उपरान्त देवों एवं भूतगणों के साथ शीघ्रता पूर्वक मन्दराचल पर आ गये। (६१)

तदनन्तर अष्टमूर्ति शङ्कर ने ब्रह्मा, विष्णु, इन्द्र आदि देवताओं का यथोचित पूजन तथा प्रणाम कर उन्हें विदा किया और स्वयं अपने भूतगणों के साथ मन्दर पर्वत पर रहने लगे। (६२)

श्रीवामनपुराण में सत्ताइसवाँ अध्याय समाप्त ॥२७॥

२८

पुलस्त्य ने कहा—हे मुने! मन्दर पर्वत पर रहते हुए और इच्छानुसार विचरण करते हुए शङ्कर ने विश्वकर्मा को बुलाकर कहा—मेरे लिए घर बना दो। (१)

तदनन्तर उसने शंकर के लिए चौंसठ योजन विस्तृत सुवर्णमय तथा स्वस्तिक चिह्नों से युक्त गृह बनाया। (२)

उसमें हाथी के दाँतों के तोरण और मोतियों के सुन्दर झालर लगे थे एवं उसमें वैडूर्यमणिखचित शुद्ध स्फटिक के सोपान थे। (३)

सात कक्षों से युक्त वह सुविस्तीर्ण गृह सभी गुणों से सम्पन्न था। तदनन्तर देवाधिदेव ने गार्हस्थ्य रूपी यज्ञ किया। (४)

शङ्कर भगवान् पूर्वाचरित मार्ग का अनुसरण

तथा मतस्त्रिनेत्रस्य महान् कालोऽभ्यगान्मुने ॥ ५
रमतः सह पार्वत्या धर्मापेक्षी जगत्पतिः ।
ततः कदाचिन्नर्मार्थं कालीत्युक्ता भवेन हि ॥ ६
पार्वती मन्युनाविष्टा शंकरं वाक्यमब्रवीत् ।
संरोहतीषुणा विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न प्ररोहति वाक्क्षतम् ॥ ७

वाक्सायका वदनान्निष्पतन्ति
तैराहतः शोचति रात्र्यहानि ।
न तान् विमुञ्चेत हि पण्डितो जन-
स्तमद्य धर्मं वितथं त्वया कृतम् ॥ ८

तस्माद् व्रजामि देवेश तपस्तप्तुमनुत्तमम् ।
तथा यतिष्ये न यथा भवान् कालीति वक्ष्यति ॥ ९
इत्येवमुक्त्वा गिरिजा प्रणम्य च महेश्वरम् ।
अनुज्ञाता त्रिनेत्रेण दिवमेवोत्पपात ह ॥ १०
समुत्पत्य च वेगेन हिमाद्रिशिखरं शिवम् ।
दृष्ट्वाच्छिन्नं प्रयत्नेन विधात्रा निर्मितं यथा ॥ ११
ततोऽवतीर्य सस्मार जयां च विजयां तथा ।
जयन्तीं च महापुण्यां चतुर्थीमपराजिताम् ॥ १२
ताः संस्मृताः समाजग्मुः कालीं द्रष्टुं हि देवताः ।
अनुज्ञातास्तथा देव्या शुश्रूषां चक्रिरे शुभाः ॥ १३
ततस्तपसि पार्वत्यां स्थितायां हिमवद्वनात् ।
समाजगाम तं देशं व्याघ्रो दंष्ट्रानखायुधः ॥ १४
एकपादस्थितायां तु देव्यां व्याघ्रस्त्वचिन्तयत् ।
यदा पतिष्यते चेयं तदादास्यामि वै अहम् ॥ १५
इत्येवं चिन्तयन्नेव दत्तदृष्टिर्मृगाधिपः ।
पश्यमानस्तु वदनमेकदृष्टिरजायत ॥ १६
ततो वर्षशतं देवी गृणन्ती ब्रह्मणः पदम् ।
तपोऽतप्यत ततोऽभ्यागाद् ब्रह्मा त्रिभुवनेश्वरः ॥ १७
पितामहस्ततोवाच देवीं प्रीतोऽस्मि शाश्वते ।
तपसा धूतपापाऽसि वरं वृणु यथेप्सितम् ॥ १८

अथोवाच वचः काली व्याघ्रस्य कमलोद्भव।
वरदो भव तेनाह यास्ये प्रीतिमनुत्तमाम्॥ १९
ततः प्रादाद् वरं ब्रह्मा व्याघ्रस्याद्भुतकर्मणः।
गाणपत्यं विभौ भक्तिमजेयत्वं च धर्मिताम्॥ २०
वरं व्याघ्राय दत्त्वैवं शिवकान्तामथाब्रवीत्।
वृणीष्व वरमव्यग्रा वरं दास्ये तवाम्बिके॥ २१
ततो वरं गिरिसुता प्राह देवी पितामहम्।
वरः प्रदीयतां मह्यं वर्णे कनकसंनिभम्॥ २२
तथेत्युक्त्वा गतो ब्रह्मा पार्वती चाभवत् ततः।
कोशं कृष्णं परित्यज्य पद्मकिञ्जल्कसन्निभा॥ २३
तस्मात् कोशाच्च संजाता भूयः कात्यायनी मुने।
तामभ्येत्य सहस्राक्षः प्रतिजग्राह दक्षिणाम्।
प्रोवाच गिरिजां देवो वाक्यं स्वार्थाय वासवः॥ २४

इन्द्र उवाच।

इयं प्रदीयतां मह्यं भगिनी मेऽस्तु कौशिकी।
त्वत्कोशसंभवा चेयं कौशिकी कौशिकोऽप्यहम्॥ २५

तदनन्तर काली ने कहा—हे कमलोद्भव! इस व्याघ्र को आप वर दें। इसी से मैं भी अतिप्रसन्न होऊँगी। (१९)

तदुपरान्त ब्रह्मा ने उस अद्भुतकर्मा व्याघ्र को गणों का स्वामित्व, शंकर की भक्ति, अजेयता और धार्मिकता का वर दिया। (२०)

इस प्रकार व्याघ्र को वर देकर (उन्होंने) शिवकान्ता से कहा—हे अम्बिके! तुम अव्यग्र चित्त से वर माँगो। मैं तुम्हें वर दूँगा। (२१)

तदनन्तर गिरिनन्दिनी देवी ने पितामह से कहा—हे ब्रह्मन्! मुझे यही वर दीजिए कि मेरा वर्ण सुवर्णतुल्य हो जाय। (२२)

'ऐसा ही हो' कहकर ब्रह्मा चले गये। पार्वती भी अपने कृष्ण आवरण को छोड़कर कमल के केसर के समान हो गयीं। (२३)

हे मुनि! उस कृष्ण कोश से पुनः कात्यायनी उत्पन्न हुईं। सहस्राक्ष इन्द्र ने उनके निकट जाकर दक्षिणा ग्रहण की। उन्होंने अपने लिए गिरिजा से यह वचन कहा— (२४)

इन्द्र ने कहा—आप इसे मुझे प्रदान करें। यह कौशिकी मेरी भगिनी बने। आप के कोश से उत्पन्न होने से यह कौशिकी हुई एवं मैं भी कौशिक हूँ। (२५)

तां प्रादादिति संश्रुत्य कौशिकीं रूपसंयुताम्।
सहस्राक्षोऽपि तां गृह्य विन्ध्यं वेगाज्जगाम च॥ २६
तत्र गत्वा त्वथोवाच तिष्ठस्वात्र महाबले।
पूज्यमाना सुरैर्नाम्ना ख्याता त्वं विन्ध्यवासिनी॥ २७
तत्र स्थाप्य हरिर्देवीं दत्त्वा सिंहं च वाहनम्।
भवामरारिहन्त्रीति उक्त्वा स्वर्गमुपागमत्॥ २८
उमाऽपि तं वरं लब्ध्वा मन्दरं पुनरेत्य च।
प्रणम्य च महेशानं स्थिता सविनयं मुने॥ २९
ततोऽमरगुरुः श्रीमान् पार्वत्या सहितोऽव्ययः।
तस्थौ वर्षसहस्रं हि महामोहनके मुने॥ ३०
महामोहस्थिते रुद्रे भुवनाश्चेलुरुद्धताः।
चुक्षुभुः सागराः सप्त देवाश्च भयमागमन्॥ ३१
ततः सुराः सहेन्द्रेण ब्रह्मणः सदनं गताः।
प्रणम्योचुर्महेशानं जगत् क्षुब्धं तु किं त्विदम्॥ ३२
तानुवाच भवो नूनं महामोहनके स्थितः।

'उसको दिया' यह सुनने के अनन्तर उस रूपवती कौशिकी को लेकर देवराज इन्द्र वेग से विन्ध्याचल पर गये। (२६)

वहाँ जाकर (उन्होंने) कहा—हे महाबले! आप यहाँ रहें। देवताओं द्वारा पूजित होती हुई आप विन्ध्यवासिनी नाम से प्रख्यात होंगी। (२७)

वहाँ देवी को स्थापित कर और इन्हें वाहन रूप में सिंह देने के उपरान्त "आप देवताओं के शत्रुओं को मारने वाली बनें" यह कहकर इन्द्र स्वर्ग चले गये। (२८)

हे मुनि! उमा भी वह वर प्राप्त करने के उपरान्त मन्दर पर्वत पर गयीं एवं महेश को प्रणाम कर विनयपूर्वक रहने लगीं। (२९)

हे मुनि! तदनन्तर श्रीमान्, अव्यय, अमरगुरु एक सहस्र वर्ष पर्यन्त महामोहनक में स्थित रहे। (३०)

रुद्रदेव के महामोह में स्थित होने पर समस्त भुवन उद्धत होकर विचलित हो गये। सातों सागर क्षुब्ध हो हो उठे और देवगण भयभीत हो गये। (३१)

तब देवता लोग इन्द्र के साथ ब्रह्मलोक गये तथा महेशान ब्रह्मा को प्रणाम कर बोले—यह जगत क्यों क्षुब्ध हो गया है? (३२)

उन्होंने उन लोगों से कहा—महादेव निश्चय ही

तेनाक्रान्तास्त्विमे लोका जग्मुः क्षोभं दुरत्ययम् ॥ ३३
इत्युक्त्वा सोऽभवत् तूर्णीं ततोऽप्यूचुः सुरा हरिम्।
आगच्छ शक्र गच्छामो यावत् तन्न समाप्यते ॥ ३४
समाप्ते मोहने बालो यः समुत्पत्स्यतेऽव्ययः।
स नूनं देवराजस्य पदमैन्द्रं हरिष्यति ॥ ३५
ततोऽमराणां वचनाद् विवेको बलघातिनः।
भयाज्ज्ञानं ततो नष्टं भाविकर्मप्रचोदनात् ॥ ३६
ततः शक्रः सुरैः सार्धं वह्निना च सहस्रदृक्।
जगाम मन्दरगिरिं तच्छृङ्गे न्यविशत्ततः ॥ ३७
अशक्ताः सर्व एवैते प्रवेष्टुं तद्भवाजिरम्।
चिन्तयित्वा तु सुचिरं पावकं ते व्यसर्जयन् ॥ ३८
स चाभ्येत्य सुरश्रेष्ठो दृष्ट्वा द्वारे च नन्दिनम्।
दुष्प्रवेशं च तं मत्वा चिन्तां वह्निः परां गतः ॥ ३९
स तु चिन्तार्णवे मग्नः प्रापश्यच्छंभुसद्मनः।
निष्क्रामन्तीं महापङ्क्तिं हंसानां विमलां तथा ॥ ४०
असावुपाय इत्युक्त्वा हंसरूपो हुताशनः।
वञ्चयित्वा प्रतीहारं प्रविवेश हराजिरम् ॥ ४१
प्रविश्य सूक्ष्ममूर्तिश्च शिरोदेशे कपर्दिनः।
प्राह प्रहस्य गम्भीरं देवा द्वारि स्थिता इति ॥ ४२
तच्छ्रुत्वा सहसोत्थाय परित्यज्य गिरेः सुताम्।
विनिष्क्रान्तोऽजिराच्छर्वो वह्निना सह नारद ॥ ४३
विनिष्क्रान्ते सुरपतौ देवा मुदितमानसाः।
शिरोभिरवनीं जग्मुः सेन्द्रार्कशशिपावकाः ॥ ४४
ततः प्रीत्या सुरानाह यदर्थं कार्यमाशु मे।
प्रणामावनतानां वो दास्येऽहं वरमुत्तमम् ॥ ४५

देवा ऊचुः।

यदि तुष्टोऽसि देवानां वरं दातुमिहेच्छसि।
तदिदं त्यज्यतां तावन्महामैथुनमीश्वर ॥ ४६

महामोहनक में स्थित हैं। उसी से आक्रान्त हो ये लोक अत्यन्त क्षुब्ध हो रहे हैं। (३३)

इतना कहकर वे मौन हो गये। उसके बाद देवताओं ने इन्द्र से कहा—हे शक्र! जब तक वह (महामोहनक) समाप्त नहीं हो जाता तब तक हम लोग चलें। (३४)

मोह समाप्त होने पर उत्पन्न होने वाला अविनाशी बालक निश्चय ही देवराज के ऐन्द्र पद का हरण करेगा। (३५)

तदनन्तर भाविकर्म की प्रेरणावश देवताओं के वचन से बलघाती (इन्द्र) का विवेक एवं भय के कारण ज्ञान नष्ट हो गया। (३६)

तब सहस्रनेत्र इन्द्र अग्नि और देवों के साथ मन्दर पर्वत पर गये एवं उसके शिखर पर बैठे। (३७)

किन्तु वे सभी महादेव के भवन में प्रविष्ट नहीं हो सके। बहुत देर तक विचार कर उन लोगों ने अग्नि को भेजा। (३८)

सुरश्रेष्ठ अग्नि वहाँ गये और द्वार पर नन्दी को देख कर, वहाँ प्रवेश करना दुःसाध्य जानकर अत्यन्त चिन्तित हुए। (३९)

चिन्ता-सागर में मग्न उन्होंने शम्भु के भवन से निकल रही हंसों की विमल महापङ्क्ति को देखा। (४०)

'यही उपाय है' ऐसा कहकर अग्नि हंस रूप में द्वारपाल को धोखा देकर महादेव के घर में प्रवेश किए। (४१)

प्रविष्ट होने के उपरान्त सूक्ष्म शरीरधारी अग्निदेव ने महादेव के शिर के पास हँसते हुए गम्भीर स्वर से कहा—देवता लोग दरवाजे पर खड़े हैं। (४२)

हे नारद! महादेव इस बात को सुनकर उसी क्षण उठे और हिमालय की कन्या को छोड़कर अग्नि के साथ आंगन से निकल पड़े। (४३)

सुरपति शङ्कर के निकल आने पर इन्द्र सहित चन्द्र, सूर्य और अग्नि आदि सभी देवताओं ने आनन्दित होकर पृथ्वी पर शिर झुकाया। (४४)

तदनन्तर (भगवान् महादेव ने) प्रीतिपूर्वक देवताओं से कहा—शीघ्र मुझे कार्य बताइये। प्रणाम के लिए अवनत आप लोगों को मैं उत्तम वर दूँगा। (४५)

देवताओं ने कहा—हे ईश्वर! यदि आप प्रसन्न हैं और देवों को वर देना चाहते हैं तो आप इस महामैथुन का त्याग करें। (४६)

ईश्वर उवाच ।
एवं भवतु संत्यक्तो मया भावोऽमरोत्तमाः ।
ममेदं तेज उद्रिक्तं कश्चिद् देवः प्रतीच्छतु ॥ ४७
पुलस्त्य उवाच ।
इत्युक्ताः शंभुना देवाः सेन्द्रचन्द्रदिवाकराः ।
असीदन्त यथा मग्नाः पङ्के वृन्दारका इव ॥ ४८
सीदत्सु दैवतेष्वेवं हुताशोऽभ्येत्य शंकरम् ।
प्रोवाच मुञ्च तेजस्त्वं प्रतीच्छाम्येष शंकर ॥ ४९
ततो मुमोच भगवांस्तद्रेतः स्कन्नमेव तु ।
जलं तृषान्ते वै यद्वत् तैलपानं पिपासितः ॥ ५०
ततः पीते तेजसि वै शार्वे देवेन वह्निना ।
स्वस्थाः सुराः समामन्त्र्य हरं जग्मुस्त्रिविष्टपम् ॥ ५१
संप्रयातेषु देवेषु हरोऽपि निजमन्दिरम् ।
समभ्येत्य महादेवीमिदं वचनमब्रवीत् ॥ ५२
देवि देवैरिहाभ्येत्य यत्नात् प्रेष्य हुताशनम् ।
नीतः प्रोक्तो निषिद्धस्तु पुत्रोत्पत्तिं तवोदरात् ॥ ५३

ईश्वर ने कहा—हे देवश्रेष्ठो! ऐसा ही हो। मैंने आसक्ति छोड़ दिया। कोई देवता मेरे इस निकले हुए तेज को ग्रहण करे। (४७)

पुलस्त्य ने कहा—शम्भु के ऐसा कहने पर इन्द्रसहित चन्द्रमा एवं सूर्यादि देवता पङ्कमग्न गज के सदृश दुःखी हुए। (४८)

देवताओं के इस प्रकार दुःखी होने पर अग्नि ने शङ्कर के निकट जाकर कहा—हे शङ्कर! आप तेज को मुक्त करें। मैं ग्रहण करूँगा। (४९)

तदनन्तर भगवान् ने (तेज को) छोड़ दिया। उस स्खलित रेतस् को (अग्निदेव इस प्रकार पी गये) जैसे जल का प्यासा व्यक्ति तैलपान कर जाता है। (५०)

अग्निदेव द्वारा शम्भु का वीर्य पी लेने पर स्वस्थ देवता लोग महादेव की अनुमति लेकर स्वर्ग चले गये। (५१)

देवताओं के चले जाने पर महादेव ने भी अपने मन्दिर में जाकर महादेवी से यह वचन कहा— (५२)

हे देवि! देवों ने यहाँ आकर प्रयत्नपूर्वक अग्नि को (मेरे पास) भेजकर मुझे बुलाया और तुम्हारे उदर से पुत्रोत्पत्ति न करने के लिये कहा। (५३)

साऽपि भर्तुर्वचः श्रुत्वा क्रुद्धा रक्तान्तलोचना ।
शशाप दैवतान् सर्वान् नष्टपुत्रोद्भवा शिवा ॥ ५४
यस्मान्नेच्छन्ति ते दुष्टा मम पुत्रमथौरसम् ।
तस्मात् ते न जनिष्यन्ति स्वासु योषित्सु पुत्रकान् ॥ ५५
एवं शप्त्वा सुरान् गौरी शौचशालामुपागमत् ।
आहूय मालिनीं स्नातुं मतिं चक्रे तपोधना ॥ ५६
मालिनी सुरभिं गृह्य श्लक्ष्णमुद्वर्तनं शुभा ।
देव्यङ्गमुद्वर्तयते कराभ्यां कनकप्रभम् ।
तत्स्वेदं पार्वती चैव मेने कीदृग्गुणेन हि ॥ ५७
मालिनी तूर्णमगमद् गृहं स्नानस्य कारणात् ।
तस्यां गतायां शैलेयी मलाच्चक्रे गजाननम् ॥ ५८
चतुर्भुजं पीनवक्षं पुरुषं लक्षणान्वितम् ।
कृत्वोत्ससर्ज भूम्यां च स्थिता भद्रासने पुनः ॥ ५९
मालिनी तच्छिरःस्नानं ददौ विहसती तदा ।

पति का वचन सुनकर विनष्ट पुत्र-जन्म वाली शिवा ने क्रोध से आँखें लाल कर समस्त देवताओं को शाप दिया। (५४)

क्योंकि वे दुष्ट मेरे उदर से पुत्र का जन्म नहीं चाहते अतः वे भी अपनी पत्नियों से पुत्र नहीं उत्पन्न करेंगे। (५५)

इस प्रकार देवताओं को शाप देकर तपोधना गौरी शौचालय में गयीं और मालिनी को बुलाकर स्नान करने का विचार किया। (५६)

सुन्दरी मालिनी सुगन्धयुक्त कोमल उद्वर्त्तन लेकर देवी के स्वर्णिम आभा से युक्त शरीर में दोनों हाथों से लगाने लगी। पार्वती विचार करने लगीं कि इस स्वेद में क्या गुण है। (५७)

मालिनी स्नान (कराने) के लिए शीघ्र स्नानागार में चली गयी। उसके चले जाने पर शैलनन्दिनी ने (उस) मल से गजानन को बनाया। (५८)

चार भुजाओं से युक्त, पीन वक्षस्थल वाले, लक्षणान्वित पुरुष को बनाकर भूमि पर रख दिया एवं पुनः उत्तम आसन पर बैठ गईं। (५९)

उस समय मालिनी ने हँसते हुए देवी को शिर से

ईषद्धासामुमा दृष्ट्वा मालिनीं प्राह नारद ॥ ६०
किमर्थं भीरु शनकैर्हससि त्वमतीव च ।
साऽथोवाच हसाम्येव भवत्यास्तनयः किल ॥ ६१
भविष्यतीति देवेन प्रोक्तो नन्दी गणाधिपः ।
तच्छ्रुत्वा मम हासोऽयं संजातोऽत्र कृशोदरि ॥ ६२
यस्माद् देवैः पुत्रकामः शंकरो विनिवारितः ।
एतच्छ्रुत्वा वचो देवी सस्नौ तत्र विधानतः ॥ ६३
स्नात्वार्च्य शंकरं भक्त्या समभ्यागाद् गृहं प्रति ।
ततः शंभुः समागत्य तस्मिन् भद्रासने त्वपि ॥ ६४
स्नातस्तस्य ततोऽधस्तात् स्थितः स मलपूरुषः ।
उमास्वेदं भवस्वेदं जलभूतिसमन्वितम् ॥ ६५
तत्संपर्कात् समुत्तस्थौ फूत्कृत्य करमुत्तमम् ।
अपत्यं हि विदित्वा च प्रीतिमान् भुवनेश्वरः ॥ ६६
तं चादाय हरो नन्दिमुवाच भगनेत्रहा ।
रुद्रः स्नात्वार्च्य देवादीन् वाग्भिरद्भिः पितॄनपि॥ ६७
जप्त्वा सहस्रनामानमुमापार्श्वमुपागतः ।
समेत्य देवीं विहसन् शंकरः शूलधृग् वचः ॥ ६८
प्राह त्वं पश्य शैलेयि स्वसुतं गुणसंयुतम् ।
इत्युक्ता पर्वतसुता समेत्यापश्यदद्भुतम् ॥ ६९
यत्तदङ्गमलाद्दिव्यं कृतं गजमुखं नरम् ।
ततः प्रीता गिरिसुता तं पुत्रं परिषस्वजे ॥ ७०
मूर्ध्नि चैनमुपाघ्राय ततः शर्वोऽब्रवीदुमाम् ।
नायकेन विना देवि तव भूतोऽपि पुत्रकः ॥ ७१
यस्माज्जातस्ततो नाम्ना भविष्यति विनायकः ।
एष विघ्नसहस्राणि सुरादीनां करिष्यति ॥ ७२
पूजयिष्यन्ति चैवास्य लोका देवि चराचराः ।
इत्येवमुक्त्वा देव्यास्तु दत्तवांस्तनयाय हि ॥ ७३
सहायं तु गणश्रेष्ठं नाम्ना ख्यातं घटोदरम् ।
तथा मातृगणा घोरा भूता विघ्नकराश्च ये ॥ ७४
ते सर्वे परमेशेन देव्याः प्रीत्योपपादिताः ।
देवी च स्वसुतं दृष्ट्वा परां मुदमवाप च ॥ ७५
रेमेऽथ शंभुना सार्धं मन्दरे चारुकन्दरे ।

स्नान कराया। हे नारद! मालिनी को मुस्कुराते हुए देख कर देवी ने कहा— (६०)

हे भीरु! तुम धीरे-धीरे इतना क्यों हँस रही हो? मालिनी ने कहा—मैं इसलिए हँस रही हूँ कि आप को अवश्य पुत्र होगा, ऐसा महादेव ने गणपति नन्दी से कहा था। हे कृशोदरि! उसे सुनकर (स्मरण कर) आज मुझे हँसी आ गयी क्योंकि देवताओं ने शङ्कर को पुत्र की कामना करने से रोक दिया है। इस बात को सुनकर देवी ने वहाँ विधिपूर्वक स्नान किया। (६१-६३)

स्नान करने के उपरान्त भक्ति से शङ्कर की पूजा कर देवी गृह में चली गयीं। तदनन्तर महादेव ने भी आकर उसी पवित्र आसन पर स्नान किया। उसी आसन के नीचे वह मलपुरुष पड़ा था। उमा के स्वेद एवं जल और भस्म से युक्त शङ्कर के स्वेद का सम्पर्क होने से वह उत्तम शुण्ड से फूत्कार करते हुए उठा। उसे अपना पुत्र जानकर भुवनेश्वर प्रसन्न हो गये। (६४-६६)

भग के नेत्र को नष्ट करने वाले महादेव ने उसे लेकर नन्दी से कहा—(यह मेरा पुत्र है)। स्नानोपरान्त शिव ने स्तुतियों से देवताओं की तथा जल से पितरों की भी पूजा की। (६७)

तदनन्तर सहस्रनाम का जप कर वे उमा के पास गये। देवी के पास जाकर शूलधारी शङ्कर ने हँसते हुए यह वचन कहा—हे शैलनन्दिनी! तुम अपने गुणयुक्त पुत्र को देखो। ऐसा कहे जाने पर पार्वती ने जाकर यह आश्चर्य देखा कि उनके अंग के मल से दिव्य हाथी के मुख वाला मनुष्य बन गया है। तदनन्तर गिरिजा ने प्रीतिपूर्वक उस पुत्र का आलिङ्गन किया। (६८-७०)

तदुपरान्त उसके सिर को सूँघकर शम्भु ने उमा से कहा—हे देवि! तुम्हारा यह पुत्र बिना नायक के उत्पन्न हुआ है अतः इसका नाम विनायक होगा। यह देवादिकों के सहस्रों विघ्नों को करेगा। (७१-७२)

हे देवि! समस्त चराचर लोक इसकी पूजा करेंगे। देवी से ऐसा कहकर उन्होंने पुत्र विनायक को घटोदर नामक श्रेष्ठ गण, घोर मातृगणों तथा विघ्नकारी भूतों को सहायक बनाया। देवी की प्रीति के लिए परमेश ने उन सबकी सृष्टि की। अपने पुत्र को देखकर देवी को भी परम आनन्द प्राप्त हुआ। (७३-७५)

तदनन्तर देवी शम्भु के साथ सुन्दर कन्दराओं वाले मन्दराचल पर रमण करने लगीं। हे विभो! इसी प्रकार यह देवी पुनः कात्यायनी हुईं थीं जिन्होंने प्राचीन समय

एवं भूयोऽभवद् देवी इयं कात्यायनी विभो ।
या जघान महादैत्यौ पुरा शुम्भनिशुम्भकौ ॥ ७६
एतत् तवोक्तं वचनं शुभाख्यं
यथोद्भवं पर्वततो मृडान्याः ।
स्वर्ग्यं यशस्यं च तथाघहारि
आख्यानमूर्जस्करमद्रिपुत्र्याः ॥ ७७

इति श्रीवामनपुराणे अष्टाविंशोऽध्यायः ॥२८॥

२९

पुलस्त्य उवाच ।
कश्यपस्य दनुर्नाम भार्यासीद् द्विजसत्तम ।
तस्याः पुत्रत्रयं चासीत् सहस्राक्षाद् बलाधिकम् ॥ १
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः ।
तृतीयो नमुचिर्नाम महाबलसमन्वितः ॥ २
योऽसौ नमुचिरित्येवं ख्यातो दनुसुतोऽसुरः ।
तं हन्तुमिच्छति हरिः प्रगृह्य कुलिशं करे ॥ ३
त्रिदिवेशं समायान्तं नमुचिस्तद्भयादथ ।
प्रविवेश रथं भानोस्ततो नाशकदच्युतः ॥ ४
शक्रस्तेनाथ समयं चक्रे सह महात्मना ।
अवध्यत्वं वरं प्रादाच्छस्त्रैरस्त्रैश्च नारद ॥ ५
ततोऽवध्यत्वमाज्ञाय शस्त्रादस्त्राच्च नारद ।
संत्यज्य भास्कररथं पातालमुपयादथ ॥ ६
स निमज्जन्नपि जले सामुद्रं फेनमुत्तमम् ।
ददर्श दानवपतिस्त प्रगृह्येदमब्रवीत् ॥ ७
यदुक्तं देवपतिना वासवेन वचोऽस्तु तत् ।

ने शुम्भ और निशुम्भ नामक दो महान् दैत्यों का संहार किया था। (७६)

मृडानी जिस प्रकार पर्वत से उत्पन्न हुई थीं उस शुभ आख्यान को मैंने तुमसे कहा। पर्वतनन्दिनी का यह आख्यान स्वर्ग एवं यश को देने वाला, अघहारी तथा ओजस्वी है। (७७)

श्रीवामनपुराण में अट्ठाइसवाँ अध्याय समाप्त ॥२८॥

२९

पुलस्त्य ने कहा—हे द्विजसत्तम! कश्यप की दनु नाम की पत्नी थी। उसे इन्द्र से अधिक बल वाले तीन पुत्र थे। (१)

उनमें बड़े का नाम शुम्भ, मझले का नाम निशुम्भ, और महाबलवान तृतीय पुत्र का नाम नमुचि था। (२)

हाथ में वज्र धारण कर इन्द्र ने नमुचि नाम से प्रसिद्ध दनुपुत्र असुर को मारना चाहा। (३)

तदनन्तर इन्द्र को आते देखकर उनके भय से नमुचि सूर्य के रथ में प्रविष्ट हो गया। इससे इन्द्र उसे मार न सके। (४)

हे नारद! तदुपरान्त महात्मा इन्द्र ने उससे सन्धि कर लिया और उसे अस्त्र शस्त्रों से अवध्य होने का वर दिया। (५)

हे नारद! तदनन्तर अपने को अस्त्र शस्त्रों से अवध्य हुआ जानकर वह असुर सूर्य के रथ को छोड़कर पाताल चला गया। (६)

उस दानवपति ने जल में स्नान करते हुए समुद्र के उत्तम फेन को देखा और उसे ग्रहण कर यह वचन कहा— (७)

देवराज इन्द्र ने जो वचन कहा वह सफल हो। यह

अयं स्पृशतु मां फेनः कराभ्यां गृह्य दानवः ॥ ८
मुखनासाक्षिकर्णादीन् संममार्ज यथेच्छया ।
तस्मिञ्छक्रोऽसृजद् वज्रमन्तर्हितमपीश्वरः ॥ ९
तेनासौ भग्ननासास्यः पपात च ममार च ।
समये च तथा नष्टे ब्रह्महत्याऽस्पृशद्धरिम् ॥ १०
स वै तीर्थं समासाद्य स्नातः पापादमुच्यत ।
ततोऽस्य भ्रातरौ वीरौ क्रुद्धौ शुम्भनिशुम्भकौ ॥ ११
उद्योगं सुमहत्कृत्वा सुरान् बाधितुमागतौ ।
सुरास्तेऽपि सहस्राक्षं पुरस्कृत्य विनिर्ययुः ॥ १२
जितास्त्वाक्रम्य दैत्याभ्यां सबला. सपदानुगाः ।
शक्रस्याहृत्य च गजं याम्यं च महिषं बलात् ॥ १३
वरुणस्य मणिच्छत्रं गदां वै मारुतस्य च ।
निधयः पद्मशङ्खाद्या हृतास्त्वाक्रम्य दानवैः ॥ १४
त्रैलोक्यं वशगं चास्ते ताभ्यां नारद सर्वतः ।
तदाजग्मुर्महीपृष्ठं ददृशुस्ते महासुरम् ॥ १५
रक्तबीजमथोचुस्ते को भवानिति सोऽब्रवीत् ।
स चाह दैत्योऽस्मि विभो सचिवो महिषस्य तु ॥ १६
रक्तबीजेति विख्यातो महावीर्यो महाभुजः ।
अमात्यौ रुचिरौ वीरौ चण्डमुण्डाविति श्रुतौ ॥ १७
तावास्तां सलिले मग्नौ भयाद् देव्या महाभुजौ ।
यस्त्वासीत् प्रभुरस्माकं महिषो नाम दानवः ॥ १८
निहतः स महादेव्या विन्ध्यशैले सुविस्तृते ।
भवन्तौ कस्य तनयौ कौ वा नाम्ना परिश्रुतौ ।
किंवीर्यौ किंप्रभावौ च एतच्छंसितुमर्हथः ॥ १९

शुम्भनिशुम्भावूचतुः ।

अहं शुंभ इति ख्यातो दनोः पुत्रस्तथौरसः ।
निशुम्भोऽयं मम भ्राता कनीयान् शत्रुसूदनः ॥ २०
अनेन बहुशो देवाः सेन्द्ररुद्रदिवाकराः ।
समेत्य निर्जिता वीरा येऽन्ये च बलवत्तराः ॥ २१
तदुच्यतां कया दैत्यो निहतो महिषासुरः ।

फेन मेरा स्पर्श करे। ऐसा कहकर वह दानव दोनों हाथों से फेन लेकर अपनी इच्छा के अनुसार उससे अपने मुख, नाक और कर्ण आदि का मार्जन करने लगा। उस (फेन) में इन्द्र देव ने छिपे हुए वज्र की सृष्टि की। (८-९)

उससे नाक और मुख टूट जाने से वह गिर पड़ा और मर गया। प्रतिज्ञा के टूट जाने पर इन्द्र को ब्रह्महत्या का पाप लगा। (१०)

वे तीर्थों में जाकर स्नान करने से पापमुक्त हुए। तदनन्तर शुम्भ और निशुम्भ नामक उसके दो वीर भाई अत्यन्त क्रुद्ध हुए। (११)

वे दोनों महान् उद्योग कर देवताओं को मारने के लिए आये। वे सभी देवता भी इन्द्र को आगे कर निकल पड़े। (१२)

उन दोनों दैत्यों ने आक्रमण कर सेना और अनुचरों के साथ देवताओं को हरा दिया। इन्द्र के हाथी, यम के महिष, वरुण के मणिमय छत्र, वायु की गदा तथा पद्मशङ्खादि निधियों को भी दानवों ने आक्रमण कर हरण कर लिया। (१३-१४)

हे नारद! उन दोनों ने तीनों लोकों को वशीभूत कर लिया। उसके बाद वे सभी भूतल पर आये और रक्तबीज नामक एक महान् असुर को देख कर उससे पूछे—आप कौन हैं? उसने उत्तर दिया—हे विभो! मैं महिषासुर का मन्त्री एक दैत्य हूँ। (१५-१६)

मैं रक्तबीज नाम से प्रसिद्ध महापराक्रमी एवं विशाल भुजाओं वाला (दैत्य) हूँ। चण्ड और मुण्ड नाम से प्रसिद्ध (महिष) के सुन्दर वीर महाबाहु दो अमात्य देवी के भय से जल में मग्न हो गये हैं। महादेवी ने सुविस्तृत विन्ध्यपर्वत पर हमारे स्वामी महिष नामक दानव को मार डाला है। आप मुझे बतलायें कि आप किसके पुत्र हैं? तथा आप किस नाम से प्रसिद्ध हैं? आप में कितना पराक्रम एवं प्रभाव है? (१७-१९)

शुम्भ और निशुम्भ ने कहा—मैं दनु का औरस पुत्र शुम्भ नाम से विख्यात हूँ। यह मेरा छोटा भाई निशुम्भ शत्रु समूह का नाशक है। (२०)

इस निशुम्भ ने इन्द्र, रुद्र, दिवाकर आदि देवताओं तथा अन्य अनेक बलवान वीरों को बहुत बार आक्रमण कर हरा दिया है। (२१)

अब बतलाओ कि किस स्त्री ने दैत्य महिषासुर को

यावत्तां घातयिष्यावः स्वसैन्यपरिवारितौ ॥ २२
इत्थं तयोस्तु वदतोर्नर्मदायास्तटे मुने ।
जलवासाद् विनिष्क्रान्तौ चण्डमुण्डौ च दानवौ ॥ २३
ततोऽभ्येत्यासुरश्रेष्ठौ रक्तबीजं समाश्रितौ ।
ऊचतुर्वचनं श्लक्ष्णं कोऽयं तव पुरस्सरः ॥ २४
स चोभौ प्राह दैत्योऽसौ शुम्भो नाम सुरार्दनः ।
कनीयानस्य च भ्राता द्वितीयो हि निशुम्भकः ॥ २५
एतावाश्रित्य तां दुष्टां महिषघ्नीं न संशयः ।
अहं विवाहयिष्यामि रत्नभूतां जगत्त्रये ॥ २६

चण्ड उवाच ।

न सम्यगुक्तं भवता रत्नार्होऽसि न साम्प्रतम् ।
यः प्रभुः स्यात्स रत्नार्हस्तस्माच्छुम्भाय योजयताम्॥२७
तदाचचक्षे शुम्भाय निशुम्भाय च कौशिकीम् ।
भूयोऽपि तद्विधां जातां कौशिकीं रूपशालिनीम् ॥ २८
ततः शुम्भो निजं दूतं सुग्रीवं नाम दानवम् ।
दैत्यं च प्रेषयामास मत्काशं विन्ध्यवासिनीम् ॥ २९
स गत्वा तद्वचः श्रुत्वा देव्यागत्य महासुरः ।
निशुम्भशुम्भावाहेदं मन्युनाभिपरिप्लुतः ॥ ३०

सुग्रीव उवाच ।

युवयोर्वचनाद् देवीं प्रदेष्टुं दैत्यनायकौ ।
गतवानहमत्रैव तामहं वाक्यमब्रुवम् ॥ ३१
यथा शुम्भोऽतिविख्यातः ककुद्मी दानवेष्वपि ।
स त्वां प्राह महाभागे प्रभुरस्मि जगत्त्रये ॥ ३२
यानि स्वर्गे महीपृष्ठे पाताले चापि सुन्दरि ।
रत्नानि सन्ति तावन्ति मम वेश्मनि नित्यशः ॥ ३३
त्वमुक्ता चण्डमुण्डाभ्यां रत्नभूता कृशोदरि ।
तस्माद् भजस्व मां वा त्वं निशुम्भं वा ममानुजम् ॥ ३४
सा चाह मां विहसती शृणु सुग्रीव मद्वचः ।
सत्यमुक्तं त्रिलोकेशः शुम्भो रत्नार्ह एव च ॥ ३५
किं त्वस्ति दुर्विनीताया हृदये मे मनोरथः ।

मारा है ? हम दोनों अपने सैन्यों को साथ लेकर उस स्त्री का संहार करेंगे । (२२)

हे मुनि ! नर्मदा तट पर इस प्रकार दोनों के बात करते समय चण्ड और मुण्ड नामक दोनों दानव जल से निकल आये । (२३)

उन दोनों ने रक्तबीज के पास जाकर मधुर शब्दों में पूछा—तुम्हारे सम्मुख यह कौन खड़ा है ? उसने उन दोनों से कहा—यह देवताओं को कष्ट देने वाला शुम्भ नामक दैत्य है एवं यह दूसरा निशुम्भ नामका इसका छोटा भाई है । (२४-२५)

दुर्योधनश्च बलिनं घण्टाकर्णमयोधयत् ॥ ५०
हस्ती च कुण्डजठरं ह्लादो वीरं घटोदरम् ।
एते हि बलिना श्रेष्ठा दानवाः प्रमथास्तथा ।
संयोधयन्ति देवर्षे दिव्याब्दानां शतानि षट् ॥ ५१
शतक्रतुमथायान्त वज्रपाणिमभिस्थितम् ।
वारयामास बलवान् जम्भो नाम महासुरः ॥ ५२
शम्भुनामाऽसुरपतिः स ब्रह्माणमयोधयत् ।
महौजसं कुजम्भश्च विष्णु दैत्यान्तकारिणम् ॥ ५३

विवस्वन्तं रणे शाल्वो वरुणं त्रिशिरास्तथा ।
द्विमूर्धा पवनं सोमं राहुर्मित्रं विरूपधृक् ॥ ५४
अष्टौ ये वसवः ख्याता धराद्यास्ते महासुरान् ।
अष्टावेव महेष्वासान् वारयामासुराहवे ॥ ५५
सरभः शलभः पाकः पुरोऽथ विपृथुः पृथुः ।
वातापी चेल्वलश्चैव नानाशस्त्रास्त्रयोधिनः ॥ ५६
विश्वेदेवगणान् सर्वान् विष्वक्सेनपुरोगमान् ।
एक एव रणे रौद्रः कालनेमिर्महासुरः ॥ ५७
एकादशैव ये रुद्रास्तानेकोऽपि रणोत्कटः ।
योधयामास तेजस्वी विद्युन्माली महासुरः ॥ ५८
द्वावश्विनौ च नरको भास्करानेव शम्बरः ।
साध्यान् मरुद्गणांश्चैव निवातकवचादयः ॥ ५९
एव द्वन्द्वसहस्राणि प्रमथामरदानवैः ।
कृतानि च सुराब्दानां दशतीः षट् महामुने ॥ ६०
यदा न शकिता योद्धुं दैवतैरमरारयः ।

में भयङ्कर द्वन्द्व युद्ध हुआ। (४७)

अन्धक नन्दी के साथ, अय शिरा शङ्कुकर्ण के साथ, बुद्धिमान् बलि कुम्भध्वज के साथ एव विरोचन नन्दिषेण के साथ युद्ध करने लगा। (४८)

अश्वग्रीव विशाख के साथ और शाख वृत्र के साथ, बाण नैगमेय के साथ एव राक्षसपुगव बल के साथ लड़ने लगा। (४९)

महावीर्यवान् परशुधारी विनायक युद्ध मे क्रुद्ध होकर राक्षसश्रेष्ठ तुहुण्ड के साथ लडने लगे एव दुर्योधन बलवान् घण्टाकर्ण के साथ युद्ध करने लगा। (५०)

हस्ती कुण्डजठर के साथ एव ह्लाद वीर घटोदर से लडने लगा। हे देवर्षि! बलवानों में श्रेष्ठ ये सभी दानव एव प्रमथगण परस्पर छ सौ दिव्य वर्षों तक युद्ध करते रहे। (५१)

जम्भ नामक बलवान् महान् असुर ने आ रहे वज्रपाणि इन्द्र को रोका। (५२)

शम्भु नामक असुरराज ब्रह्मा से लडने लगा एव कुजम्भ महान् ओजस्वी दैत्यान्तकारी विष्णु से युद्ध करने लगा। (५३)

शाल्व सूर्य से, त्रिशिरा वरुण से, द्विमूर्धा पवन से, राहु सोम से एव विरूपधृक् मित्र से युद्ध करने लगा। (५४)

धरादि नाम से प्रसिद्ध आठ वसुओं ने सरभ, शलभ, पाक पुर, विपृथु, पृथु, वातापी एव इल्वल-इन आठ महान् धनुर्धर असुरों का युद्ध में सामना किया। ये असुर अनेक प्रकार के शस्त्रास्त्र लेकर लडने लगे। कालनेमि नामक भयङ्कर महासुर युद्ध में एकाकी ही विष्वक्सेनादि विश्वेदेव गणों से युद्ध करने लगा। (५५-५७)

रणोत्कट तेजस्वी विद्युन्माली नामक महासुर ने अकेले ही एकादश रुद्रों का सामना किया। (५८)

नरक ने दोनों अश्विनीकुमारों से, शम्बर ने (द्वादश) भास्करों से एव निवातकवचादि ने साध्यों तथा मरुद्गणों से युद्ध किया। (५९)

हे महामुने! इस प्रकार साठ दिव्य वर्षों तक प्रमथों एव दानवों के सहस्रों युग्म परस्पर द्वन्द्वयुद्ध करते रहे। (६०)

जब असुर गण देवों से युद्ध करने मे असमर्थ हो गए तो उन लोगों ने माया का आश्रयकर देवों का क्रमश

तदा मायां समाश्रित्य ग्रसन्त नमतोऽव्ययान् ॥ ६१
ततोऽभवच्छैलपृष्ठं प्रावृडभ्रसमप्रभैः ।
आवृतं वर्जितं मर्त्यैः प्रमथैरमरैरपि ॥ ६२
दृष्ट्वा शून्यं गिरिप्रस्थं ग्रस्तांश्च प्रमथामरान् ।
क्रोधादुत्पादयामास रुद्रो जृम्भायिका वशी ॥ ६३
तया स्पृष्टा दनुसुता अलसा मन्दभाषिणः ।
वदन निकृतं कृत्वा मुक्तशस्त्रं निजृम्भिरे ॥ ६४
जृम्भमाणेषु च तदा दानवेषु गणेश्वरा ।
सुराश्च निर्ययुस्तूर्णं दैत्यदेहेभ्य आकुलाः ॥ ६५
मेघप्रभेभ्यो दैत्येभ्यो निर्गच्छन्तोऽमरोत्तमाः ।
शोभन्ते पद्मपत्राक्षा मेघेभ्य इव विद्युत ॥ ६६
गणामरेषु च समं निर्गतेषु तपोधन ।
अयुध्यन्त महात्मानो भूय एवातिकोपिताः ॥ ६७
ततस्तु देवैः सगणैः दानवाः शर्वपालितैः ।
पराजीयन्त संग्रामे भूयो भूयस्त्वहर्निशम् ॥ ६८
ततस्त्रिनेत्रः स्वां संध्यां सप्ताब्दशतिके गते ।
कालेऽभ्युपागत तदा सोऽष्टादशभुजोऽव्ययः ॥ ६०
संस्पृश्यापः सरस्वत्यां स्नात्वा च विधिना हरः ।
कृतार्थो भक्तिमान् मूर्ध्ना पुष्पाञ्जलिमुपाक्षिपत् ॥ ७०
ततो ननाम शिरसा ततश्चक्रे प्रदक्षिणम् ।
हिरण्यगर्भेत्यादित्यमुपतस्थे जजाप ह ॥ ७१
त्वष्ट्रे नमो नमस्तेऽस्तु सम्यगुच्चार्य शूलधृक् ।
ननर्त भावगम्भीरं दोर्दण्डं भ्रामयन् बलात् ॥ ७२
परिनृत्यति देवेशे गणाश्चैवामरास्तथा ।
नृत्यन्ते भावसंयुक्ता हरस्यानुविलासिनः ॥ ७३
सन्ध्यामुपास्य देवेशः परिनृत्य यथेच्छया ।
युद्धाय दानवैः सार्द्धं मतिं भूयः समादधे ॥ ७४
ततोऽमरगणैः सर्वैस्त्रिनेत्रभुजपालितैः ।
दानवा निर्जिताः सर्वे बलिभिर्भयवर्जितः ॥ ७५
स्वबलं निर्जितं दृष्ट्वा मत्वाऽजेयं च शंकरम् ।
अन्धकः सुन्दमाहूय इदं वचनमब्रवीत् ॥ ७६
सुन्द भ्राताऽसि मे वीर विश्वास्यः सर्ववस्तुषु ।

ग्रास करना प्रारम्भ किया। (६१)

तदनन्तर समस्त प्रमथों एवं देवों से रहित पर्वत वर्षाकालीन मेघ के सदृश दानवों से आवृत हो गया। (६२)

पर्वत प्रदेश को शून्य एवं प्रमथों तथा देवों को ग्रस्त हुआ देखकर जितेन्द्रिय रुद्र ने क्रोध से जृम्भायिका को उत्पन्न किया। (६३)

उसके स्पर्श करने पर अस्त्रों को छोड़कर मन्दभाषण करते हुए आलस्यपूर्ण दानव मुख को विकृत कर जम्हाई लेने लगे। (६४)

दानवों के जम्हाई लेते समय आकुल गणेश्वर एवं देवता लोग शीघ्रता पूर्वक दैत्यों की देह से बाहर निकल गये। (६५)

मेघ सदृश दैत्यों के (शरीर से) बाहर निकल रहे कमल के समान नेत्र वाले श्रेष्ठ देवगण मेघ से प्रकट होने वाली विद्युत् के सदृश शोभित हो रहे थे। (६६)

हे तपोधन! गणों और देवों के निकल आने पर वे महात्मा (दैत्य) अति क्रुद्ध होकर युद्ध करने लगे। (६७)

तदनन्तर शम्भुपालित गणों एवं देवों ने संग्राम में दानवों को अहर्निश बारम्बार पराजित किया। (६८)

तदनन्तर सात सौ वर्षों का समय व्यतीत हो जाने पर अष्टादश भुजाओं वाले अव्यय त्रिनेत्र अपनी सन्ध्या करने लगे। (६९)

जल का स्पर्श कर विधिपूर्वक सरस्वती में स्नान कर कृतार्थ भक्तिमान् शंकर ने मस्तक से पुष्पाञ्जलि अर्पित की। (७०)

तदनन्तर शिर से प्रणाम एवं तदनन्तर प्रदक्षिणा कर 'हिरण्यगर्भ' इत्यादि मन्त्र से सूर्य की वन्दना और जप किया। (७१)

तदुपरान्त 'त्वष्ट्रे नमो नमस्तेऽस्तु' इसका सम्यक् रूप से उच्चारण कर शूलपाणि बलपूर्वक भुजदण्ड घुमाते हुए भावगम्भीर होकर नाचने लगे। (७२)

देवेश्वर के नाचने पर गण और देवता भी भक्तियुक्त होकर हर का अनुगमन करते हुए नाचने लगे। (७३)

सन्ध्योपासन कर यथेच्छ नृत्य के बाद देवेश ने पुनः दानवों से युद्ध करने का विचार किया। (७४)

तदनन्तर शङ्कर की भुजाओं से रक्षित बलवान् एवं भयरहित समस्त देवों ने समस्त दानवों को जीत लिया। (७५)

अपनी सेना को पराजित देख तथा महादेव को अजेय जानकर अन्धक ने सुन्द को बुलाकर यह वचन कहा—(७६)

हे वीर सुन्द! तुम मेरे भाई हो और सभी विषयों में तुम मेरे विश्वासपात्र हो। अतः आज मैं तुमसे जो कहता हूँ

तद्वदाम्यद्य यद्वाक्यं तच्छ्रुत्वा यत्क्षमं कुरु ॥ ७७
दुर्जयोऽसौ रणपटुर्धर्मात्मा कारणान्तरैः ।
समास्ते हि हृदये पद्माक्षी शैलनन्दिनी ॥ ७८
तदुत्तिष्ठस्व गच्छामो यत्रास्ते चारुहासिनी ।
तत्रैना मोहयिष्यामि हररूपेण दानव ॥ ७९
भवान् भवस्यानुचरो भव नन्दी गणेश्वरः ।
ततो गत्वाऽथ भुक्त्वा तां जेष्यामि प्रमथान् सुरान् ॥ ८०
इत्येवमुक्ते वचने बाढं सुन्दोऽभ्यभाषत ।
समजायत शैलादिरन्धकः शंकरोऽप्यभूत् ॥ ८१
नन्दिरुद्रौ ततो भूत्वा महासुरचमूपती ।
सम्प्राप्तौ मन्दरगिरिं प्रहारैः क्षतविग्रहौ ॥ ८२
हस्तमालम्ब्य सुन्दस्य अन्धको हरमन्दिरम् ।
विवेश निर्विशङ्केन चित्तेनासुरसत्तमः ॥ ८३
ततो गिरिसुता दूरादायान्तं वीक्ष्य चान्धकम् ।
महेश्वरवपुश्छन्नं प्रहारैर्जर्जरच्छविम् ॥ ८४
सुन्दं शैलादिरूपस्थमवष्टभ्याविशत् ततः ।
तं दृष्ट्वा मालिनीं प्राह सुयशां विजयां जयाम् ॥ ८५
जये पश्यस्व देवस्य मदर्थे विग्रहं कृतम् ।
शत्रुभिर्दानववरैस्तदुत्तिष्ठस्व सत्वरम् ॥ ८६
घृतमानय पौराणं बीजिकां लवणं दधि ।
व्रणभङ्गं करिष्यामि स्वयमेव पिनाकिनः ॥ ८७
कुरुष्व शीघ्रं सुयशे स्वभर्तुर्व्रणनाशनम् ।
इत्येवमुक्त्वा वचनं समुत्थाय वरासनात् ॥ ८८
अभ्युद्ययौ तदा भक्त्या मन्यमाना वृषध्वजम् ।
शूलपाणेस्ततः स्थित्वा रूपं चिह्नानि यत्नतः ॥ ८९
अन्विष्येष ततो ब्रह्मन्नोभौ पार्श्वस्थितौ वृषौ ।
सा ज्ञात्वा दानवं रौद्रं मायाच्छादितविग्रहम् ॥ ९०
अपयानं तदा चक्रे गिरिराजसुता मुने ।
देव्याश्चिन्तितमाज्ञाय सुन्दं त्यक्त्वान्धकोऽसुरः ॥ ९१
समाद्रवत वेगेन हरकान्तां विभावरीम् ।
समाद्रवत दैतेयो येन मार्गेण साऽगमत् ॥ ९२
अपस्फारान्तरं भञ्जन् पादप्लुतिभिराकुलः ।

उसे सुनकर यथाशक्ति पूर्ण करो । (७७)

किसी कारणवश यह रणपटु धर्मात्मा दुर्जेय है। मेरे हृदय में कमलनयनी पार्वती समासीन हैं। (७८)

अतः उठो। हम वहाँ चलें जहाँ वह सुहासिनी स्थित है। हे दानव! वहाँ मैं शङ्कर के रूप से उसे मोहित करूँगा। (७९)

तुम शङ्कर का अनुचर गणेश्वर नन्दी बनो। तदनन्तर वहाँ जाकर उसका भोगकर प्रमथों एवं देवों को जीतूँगा। (८०)

ऐसा कहने पर सुन्द ने कहा—ठीक है। तदनन्तर वह शैलादि (नन्दी) बन गया एवं अन्धक शिव बन गया। (८१)

तदनन्तर महासुर (अन्धक) एवं सेनापति (सुन्द) प्रहारों से क्षत विक्षत शरीर वाले रुद्र और नन्दी का रूप धारण कर मन्दर गिरि पर पहुँचे। (८२)

सुन्द का हाथ पकड़कर असुरश्रेष्ठ अन्धक निर्भयचित्त से महादेव के मन्दिर में प्रविष्ट हुआ। (८३)

तदनन्तर शैलादि नन्दी के वेश में स्थित सुन्द को पकड़कर प्रहारों से जर्जरित महादेव के शरीर में प्रच्छन्न अन्धक को दूर से आते हुए देखकर पार्वती ने यशस्विनी मालिनी, विजया तथा जया से कहा— (८४ ८५)

हे जये! देखो! दानव-शत्रुओं ने मेरे लिए स्वामी का शरीर कैसा कर डाला है। अतः शीघ्र उठो। (८६)

पुराना घृत, बीजिका, लवण एवं दधि लाओ। मैं स्वयं ही पिनाकी शंकर के व्रणों को भरूँगी। (८७)

हे यशस्विनी! शीघ्र अपने स्वामी के घावों को भरो। ऐसा कहते हुए आसन से उठकर उन्हें वृषध्वज मानती हुई वे भक्ति पूर्वक उसके समीप गईं। तदनन्तर खड़ी होकर वे शंकर के रूप एवं लक्षणों को भलीभाँति देखने लगीं। हे ब्रह्मन्! उन्होंने देखा कि उनके पार्श्व में स्थित दोनों वृष नहीं हैं। अतः उन्हें ज्ञात हो गया कि यह माया से प्रच्छन्न शरीर वाला भयङ्कर दानव है। (८८ ९०)

हे मुने! तदनन्तर गिरिराजपुत्री भाग गईं। देवी के विचार को जानकर अन्धकासुर सुन्द को छोड़कर वेग पूर्वक शंकर प्रिया विभावरी के पीछे उसी मार्ग से दौड़ने लगा जिससे वे गई थीं। (९१ ९२)

चरणचपेटों से राह के अवरोधों को चूर चूर करते हुए

तमापतन्तं दृष्ट्वैव गिरिजा प्राद्रवद् भयात् ॥ ९३
गृहं त्यक्त्वा ह्युपवनं सखीभिः सहिता तदा ।
तत्राप्यनुजगामासौ मदान्धो मुनिपुंगव ॥ ९४
तथापि न शशापैनं तपसो गोपनाय तु ।
तद्भयादाविशद् गौरी श्वेतार्ककुसुमं शुचि ॥ ९५
विजयाद्या महागुल्मे संप्रयाता लयं मुने ।
नष्टायामथ पार्वत्यां भूयो हैरण्यलोचनिः ॥ ९६
सुन्दं हस्ते समादाय स्वसैन्यं पुनरागमत् ।
अन्धके पुनरायाते स्वबलं मुनिसत्तम ॥ ९७
प्रावर्तत महायुद्धं प्रमथासुरयोरथ ।
ततोऽमरगणश्रेष्ठो विष्णुश्चक्रगदाधरः ॥ ९८
निजघानासुरबलं शंकरप्रियकाम्यया ।
शार्ङ्गचापच्युतैर्बाणैः सस्यूता दानवर्षभाः ॥ ९९
पञ्च षट् सप्त चाष्टौ वा प्रच्नपादैर्घना इव ।
गदया कांश्चिदवधीत् चक्रेणान्यान् जनार्दनः ॥ १००
खड्गेन च चकर्तान्यान् दृष्ट्याऽन्यान् भस्मसाद् व्यधात् ।
हलेनाकृष्य चैवान्यान् मुसलेन व्यचूर्णयत् ॥ १०१
गरुडः पक्षपाताभ्यां तुण्डेनाप्युरसाऽहनत् ।
स चादिपुरुषो धाता पुराणः प्रपितामहः ॥ १०२
भ्रामयन् विपुलं पद्मभ्यषिञ्चत वारिणा ।
संस्पृष्टा ब्रह्मतोयेन सर्वतीर्थमयेन हि ॥ १०३
गणामरगणाश्चासन् नवनागशताधिकाः ।
दानवास्तेन तोयेन संस्पृष्टाश्चाघहारिणा ॥ १०४
सवाहनाः क्षयं जग्मुः कुलिशेनेव पर्वताः ।
दृष्ट्वा ब्रह्महरी युद्धे घातयन्तौ महासुरान् ॥ १०५
शतक्रतुश्च दुद्राव प्रगृह्य कुलिशं बली ।
तमापतन्तं संप्रेक्ष्य बली दानवसत्तमः ॥ १०६
मुक्त्वा देवं गदापाणिं विमानस्थं च पद्मजम् ।
शक्रमेवाद्रवद् योद्धुं मुष्टिमुद्यम्य नारद ।
बलवान् दानवपतिरजेयो देवदानवैः ॥ १०७
तमापतन्तं त्रिदशेश्वरस्तु
दोर्ष्णा सहस्रेण ययानलेन ।

वह व्याकुलतापूर्वक दौड़ा । उसे आते देख गिरिजा भय से भागीं । (९३)

हे मुनिपुंगव ! तदनन्तर देवी सखियों के साथ गृह छोड़कर उपवन में चली गयीं । वहाँ भी मदान्ध (अन्धक) ने उनका अनुसरण किया । (९४)

इतने पर भी अपने तप की रक्षा के लिए उन्होंने उसे शाप नहीं दिया । गौरी उसके भय से पवित्र शुक्ल अर्कपुष्प में लीन हो गयीं । (९५)

हे मुने ! विजया आदि भी घनी झाड़ियों में लीन हो गयीं । तदनन्तर पार्वती के लुप्त हो जाने पर हिरण्याक्षपुत्र (अन्धक) सुन्द का हाथ पकड़कर पुन अपनी सेना में चला गया । हे मुनिसत्तम ! अन्धक के पुन अपनी सेना में लौट आने पर प्रमथों एव असुरों मे महायुद्ध होने लगा । तदनन्तर सुरश्रेष्ठ चक्रगदाधर विष्णु शङ्कर का प्रिय करने की कामना से असुर सेना का वध करने लगे । शार्ङ्ग धनुष से निकले बाणों से पाँच, छ, सात या आठ श्रेष्ठ दानव उसी प्रकार विद्ध होने लगे जैसे सूर्य की किरणों से मेघ विद्ध होते हैं । जनार्दन ने कुछ को गदा से एव कुछ को चक्र से मार डाला । (९६-१००)

किन्हीं को खड्ग के द्वारा काट डाला और किन्हीं को दृष्टि से भस्म कर दिया तथा कुछ असुरों को हल द्वारा खींचकर मुसल से चूर्ण कर दिया । (१०१)

गरुड़ ने अपने दोनों परों, चोंच तथा वक्ष से अनेक दैत्यों को मार डाला । पुरातन आदिपुरुष धाता प्रपितामह ने महान् पद्म को घुमाते हुए सभी को जल से सिञ्चित किया । सर्वतीर्थमय ब्रह्मतोय का स्पर्श होने से गण एवं देवता लोग सौ नव हाथियों से अधिक बलवान् हो गए । तथा उस पापहारी जल के स्पर्श से वाहन-सहित दानव इस प्रकार नष्ट होने लगे जैसे वज्र से पर्वत नष्ट होते हैं । ब्रह्मा एव विष्णु को युद्ध मे महासुरों को मारते देखकर बलवान् इन्द्र भी अपना वज्र लेकर दौड़े । हे नारद ! उन्हें आते देखकर देवों तथा दानवों से अजेय दानवश्रेष्ठ बलवान् दानवपति बल देव गदाधर एवं विमानस्थ ब्रह्मा को छोड़कर मुष्टि को उठाये हुए इन्द्र से ही लड़ने के लिए दौड़ा । (१०२-१०७)

उसे आते देख त्रिदशेश्वर इन्द्र ने सहस्र भुजाओं से अपनी शक्ति भर वज्र को घुमाते हुए बल के मस्तक पर हे मूढ़ ।

वज्रं परिभ्राम्य बलस्य मूर्ध्नि
चिक्षेप हे मूढ हतोऽस्युदीर्य ॥ १०८
स तस्य मूर्ध्नि प्रवरोऽपि वज्रो
जगाम तूर्णं हि सहस्रधा मुने।
बलोऽद्रवद् देवपतिश्च भीतः
पराङ्मुखोऽभूत् समरान्महर्षे ॥ १०९
तं चापि जम्भो विमुखं निरीक्ष्य
भूत्वाऽग्रतः प्राह न युक्तमेतत्।
तिष्ठस्व राजाऽसि चराचरस्य
न राजधर्मे गदितं पलायनम् ॥ ११०
सहस्राक्षो जम्भवाक्यं निशम्य
भीतस्तूर्णं विष्णुमागान्महर्षे।
उपेत्याह श्रूयतां वाक्यमीश
त्वं मे नाथो भूतभव्येश विष्णो ॥ १११
जम्भस्तर्जयतेऽत्यर्थं मां निरायुधमीक्ष्य हि।
आयुधं देहि भगवन् त्वामहं शरणं गतः ॥ ११२
तमुवाच हरिः शक्र त्यक्त्वा दर्पं व्रजाधुना।
प्रार्थयस्वायुधं वह्निं स ते दास्यत्यसंशयम् ॥ ११३
जनार्दनवचः श्रुत्वा शक्रस्त्वरितविक्रमः।
शरणं पावकमगादिदं चोवाच नारद ॥ ११४
शक्र उवाच।
निघ्नतो मे बलं वज्रं कृशानो शतधा गतम्।
एष चाहूयते जम्भस्तस्माद्देह्यायुधं मम ॥ ११५
पुलस्त्य उवाच।
तमाह भगवान् वह्निः प्रीतोऽस्मि तव वासव।
यत्त्वं दर्पं परित्यज्य मामेव शरणं गतः ॥ ११६
इत्युच्चार्य स्वशक्त्यास्तु शक्तिं निष्क्राम्य भावतः।
प्रादादिन्द्राय भगवान् रोचमानो दिवं गत. ॥ ११७
तामादाय तदा शक्तिं शतघण्टां सुदारुणाम्।
प्रत्युद्ययौ तदा जम्भं हन्तुकामोऽरिमर्दन. ॥ ११८
तेनातियशसा दैत्य. सहसैवाभिसंद्रुतः।
क्रोधं चक्रे तदा जम्भो निजघान गजाधिपम् ॥ ११९
जम्भमुष्टिनिपातेन भग्नकुम्भकटो गज.।
निपपात यथा शैलः शक्रवज्रहतः पुरा ॥ १२०

तुम मारे गये' कह कर फेंका। (१०८)

हे मुनि! वह श्रेष्ठ वज्र भी उसके शिर पर शीघ्र हजारों खण्डों में विभक्त हो गया। बल (इन्द्र की ओर) दौड़ा। हे महर्षि! भयभीत होकर देवराज युद्ध से पराङ्मुख हो गये। (१०९)

उन्हें विमुख होते देख जम्भ ने आगे आकर कहा—यह उचित नहीं है। रुकिए, आप चराचर के राजा हैं। राजधर्म में पलायन करने का विधान नहीं है। (११०)

हे महर्षि! जम्भ का वचन सुनकर भयभीत इन्द्र शीघ्र विष्णु के समीप गये। वहाँ जाकर उन्होंने कहा—हे ईश! मेरी बात आप सुनें। हे भूत तथा भव्य के स्वामी विष्णु! आप मेरे नाथ हैं। (१११)

निरायुध देखकर जम्भ मुझे अतिशय तर्जित कर रहा है। हे भगवन्! आप मुझे आयुध प्रदान करें। मैं आपकी शरण में आया हूँ। (११२)

विष्णु ने इन्द्र से कहा—इस समय दर्प छोड़कर तुम अग्नि के समीप जाकर उनसे आयुध की प्रार्थना करो। वे निस्सन्देह तुम्हें प्रदान करेंगे। (११३)

हे नारद! जनार्दन की बात सुनकर शीघ्र गति वाले इन्द्र अग्नि की शरण में गये और यह कहा। (११४)

इन्द्र ने कहा—हे अग्नि! बल को मारने में मेरा वज्र सैकड़ों खण्ड हो गया। यह जम्भ मुझे ललकार रहा है। अत आप मुझे आयुध प्रदान करें। (११५)

पुलस्त्य ने कहा—भगवान् वह्नि ने उनसे कहा—हे वासव! मैं आपके ऊपर प्रसन्न हूँ। क्योंकि आप दर्प को छोड कर मेरी शरण मे आये हैं। (११६)

ऐसा कहने के उपरान्त प्रकाशमान् भगवान् अग्नि ने भावपूर्वक अपनी शक्ति से एक अन्य शक्ति निकाल कर इन्द्र को दिया एवं स्वर्ग चले गये। (११७)

शत्रुमर्दन इन्द्र उस शतघण्टाओं से युक्त भीषण शक्ति को लेकर जम्भ को मारने के लिए गये। (११८)

उन अति यशस्वी के सहसा पीछा करने पर जम्भ ने क्रोधपूर्वक गजाधिप (ऐरावत) पर प्रहार किया। (११९)

जम्भ की मुट्ठी के प्रहार से हाथी का कुम्भस्थल भग्न हो गया। तदनन्तर वह इस प्रकार गिर पड़ा जैसे पूर्वकाल मे इन्द्र के वज्र से आहत पर्वत गिरता था। (१२०)

पतमानाद् द्विपेन्द्रात्तु शक्रश्चाप्लुत्य वेगवान् ।
त्यक्त्वैव मन्दरगिरिं पपात वसुधातले ॥ १२१
पतमानं हरिं सिद्धाश्चारणाश्च तदाब्रुवन् ।
मा मा शक्र पतस्वाद्य भूतले तिष्ठ वासव ॥ १२२
स तेषां वचनं श्रुत्वा योगी तस्थौ क्षणं तदा ।
प्राह चैतान् कथं योत्स्ये अपत्रः शत्रुभिः सहः ॥ १२३
तमूचुर्देवगन्धर्वा मा विषादं व्रजेश्वर ।
युध्यस्व त्वं समारुह्यप्रेषयिष्याम यद् रथम् ॥ १२४
इत्येवमुक्त्वा विपुलं रथं स्वस्तिकलक्षणम् ।
वानरध्वजसंयुक्तं हरिभिर्हरिभिर्युतम् ॥ १२५
शुद्धजाम्बूनदमयं किङ्किणीजालमण्डितम् ।
शक्राय प्रेषयामासुर्विश्वावसुपुरोगमाः ॥ १२६
तमागतमुदीक्ष्याथ हीनं सारथिना हरिः ।
प्राह योत्स्ये कथं युद्धे संयमिष्ये कथं हयान् ॥ १२७
यदि कश्चिद्धि सारथ्यं करिष्यति ममाधुना ।
ततोऽहं घातये शत्रून् नान्यथेति कथंचन ॥ १२८
ततोऽब्रुवंस्ते गन्धर्वा नास्माकं सारथिर्विभो ।
विद्यते स्वयमेवाश्वांस्त्वं संयन्तुमिहार्हसि ॥ १२९
इत्येवमुक्ते भगवांस्त्यक्त्वा स्यन्दनमुत्तमम् ।
क्ष्मातलं निपपातैव परिभ्रष्टस्रगम्बरः ॥ १३०
चलन्मौलिर्मुक्तकचः परिभ्रष्टायुधाङ्गदः ।
पतमानं सहस्राक्षं दृष्ट्वा भूः समकम्पत ॥ १३१
पृथिव्यां कम्पमानायां शमीकस्तपस्विनी ।
भार्याऽब्रवीत् प्रभो बालं बहिः कुरु यथासुखम् ॥ १३२
स तु शीलावचः श्रुत्वा किमर्थमिति चाब्रवीत् ।
सा चाह श्रूयतां नाथ दैवज्ञपरिभाषितम् ॥ १३३
यदेयं कम्पते भूमिस्तदा प्रक्षिप्यते बहिः ।
यद्द्रव्यं ततो मुनिश्रेष्ठ तद् भवेद् द्विगुणं मुने ॥ १३४
एतद्वाक्यं तदा श्रुत्वा बालमादाय पुत्रकम् ।
निराशङ्को बहिः शीघ्रं प्राक्षिपद् क्ष्मातले द्विजः ॥१३५
भूयो गोयुगलार्थाय प्रविष्टो भार्यया द्विजः ।
निवारितो गता वेला अर्द्धहानिर्भविष्यति ॥ १३६

गिर रहे गजेन्द्र से इन्द्र वेग पूर्वक उछले एवं मन्दर पर्वत को भी छोड़कर पृथ्वी पर गिरे। (१२१)

तदनन्तर गिर रहे इन्द्र से सिद्धों एवं चारणों ने कहा—हे इन्द्र! पृथ्वी पर न गिरें। आप रुकें। (१२२)

उनकी बात सुनकर योगी इन्द्र उस समय क्षणभर के लिए ठहर गए और बोले—मैं वाहन रहित होकर इन शत्रुओं से कैसे लड़ूँगा? (१२३)

देवताओं और गन्धर्वों ने उत्तर दिया—हे ईश्वर! आप विषण्ण न हों। हम लोग जो रथ भेज रहे हैं, उस पर आरूढ होकर आप युद्ध करें। (१२४)

ऐसा कहकर विश्वावसु आदि ने स्वस्तिकाकार, कपिध्वज संयुक्त, हरितवर्ण के अश्वों से युक्त, शुद्ध स्वर्ण से निर्मित तथा किङ्किणीजालमण्डित विपुल रथ इन्द्र के लिये भेजा। (१२५-१२६)

इन्द्र उस सारथिरहित रथ को देखकर बोले—कैसे मैं युद्ध में लड़ूँगा और कैसे घोड़ों को संयत करूँगा? (१२७)

इस समय यदि कोई मेरे सारथि का काम करे तो मैं शत्रुओं का नाश कर सकता हूँ, अन्य किसी प्रकार नहीं। (१२८)

तदनन्तर गन्धर्वों ने कहा—हे विभो! हमारे पास कोई सारथि नहीं है। आप स्वयं अश्वों को संयत कर सकते हैं। (१२९)

ऐसा कहने पर भगवान् इन्द्र अस्तव्यस्त माला और वस्त्रों के साथ पृथ्वी पर गिरे। (१३०)

(पृथ्वी पर गिरते समय इन्द्र का) शिर हिल रहा था, उनके केश बिखर गये थे एवं उनके आयुध तथा अङ्गद नीचे गिर पड़े थे। इन्द्र को गिरते देख पृथ्वी कम्पित होने लगी। (१३१)

पृथ्वी के काँपने पर शमीक ऋषि की तपस्विनी पत्नी ने कहा—प्रभो! बालक को सुखपूर्वक बाहर ले जाइये। (१३२)

उन्होंने शीला की बात सुनकर कहा—क्यों? उसने कहा—हे नाथ! सुनिये, ज्योतिषियों का कथन है कि इस भूमि के कम्पित होने पर वस्तुएँ बाहर निकाल दी जाती हैं। क्योंकि हे मुनिश्रेष्ठ! उस समय बाहर स्थित वस्तु द्विगुणित हो जाती है। (१३३-१३४)

इस वाक्य को सुनकर उस समय ब्राह्मण ने अपने बालक पुत्र को लेकर तत्काल शंकारहित होकर बाहर भूतल पर फेंक दिया। (१३५)

पुन दो गायों के लिये भीतर प्रविष्ट होने पर पत्नी ने ब्राह्मण को मना करते हुए कहा—वेला समाप्त हो गई अब

इत्येवमुक्ते देवर्षे बहिर्निर्गम्य वेगवान् ।
ददर्श बालद्वितयं समरूपमवस्थितम् ॥ १३७
तं दृष्ट्वा देवताः पूज्य भार्यां चाद्भुतदर्शनाम् ।
प्राह तत्त्वं न विन्दामि यत् पृच्छामि वदस्व तत् ॥१३८
बालस्यास्य द्वितीयस्य के भविष्यद्गुणा वद ।
भाग्यानि चास्य यचोक्तं कर्म तत् कथयाधुना ॥ १३९
साऽब्रवीन्नाद्य ते वक्ष्ये वदिष्यामि पुनः प्रभो ।
सोऽब्रवीद् वद मेऽद्यैव नोचेन्नाश्नामि भोजनम् ॥ १४०
सा प्राह श्रूयतां ब्रह्मन् वदिष्ये वचनं हितम् ।
कातरेणाथ यत्पृष्टं भाव्यः कारुरयं किल ॥ १४१
इत्युक्तवति वाक्ये तु बाल एव त्वचेतनः ।
जगाम साह्यं शक्रस्य कर्तुं सौत्यविशारदः ॥ १४२
तं व्रजन्तं हि गन्धर्वा विश्वावसुपुरोगमाः ।
ज्ञात्वेन्द्रस्यैव साहाय्ये तेजसा समवर्धयन् ॥ १४३
गन्धर्वतेजसा युक्तः शिशुः शक्रं समेत्य हि ।
प्रोवाचैहेहि देवेश प्रियो यन्ता भवामि ते ॥ १४४
तच्छ्रुत्वास्य हरिः प्राह कस्य पुत्रोऽसि बालक ।
संयन्ताऽसि कथं चाश्वान् संशयः प्रतिभाति मे ॥१४५
सोऽब्रवीदृषितेजोत्थं क्ष्माभवं विद्धि वासव ।
गन्धर्वतेजसा युक्तं वाजियानविशारदम् ॥ १४६
तच्छ्रुत्वा भगवाञ्छक्रः खं भेजे योगिनां वरः ।
स चापि विप्रतनयो मातलिर्नामविश्रुतः ॥ १४७
ततोऽधिरूढस्तु रथं शक्रस्त्रिदशपुंगवः ।
रश्मीन् शमीकतनयो मातलिः प्रगृहीतवान् ॥ १४८
ततो मन्दरमागम्य विवेश रिपुवाहिनीम् ।
प्रविशन् ददृशे श्रीमान् पतितं कार्मुकं महत् ॥ १४९
सशरं पञ्चवर्णाभं सितरक्तासितारुणम् ।
पाण्डुच्छायं सुरश्रेष्ठस्तं जग्राह समार्गणम् ॥ १५०
ततस्तु मनसा देवान् रजःसत्त्वतमोमयान् ।
नमस्कृत्य शरं चापे साधिज्ये विनियोजयत् ॥ १५१

इस समय अध्याय की हानि हो जायेगी। (१३६)

हे देवर्षि! ऐसा कहने पर (ब्राह्मण ने) वेगपूर्वक बाहर निकल कर देखा कि समानरूप के दो बालक पड़े हुए हैं। (१३७)

उन्हें देखकर उसने देवताओं की पूजा करने के उपरान्त अपनी अद्भुत ज्ञानी भार्या से कहा—मैं इसका तत्त्व नहीं जानता। अत. मैं जो पूछता हूँ उसे बतलाओ। (१३८)

यह बतलाओ कि इस दूसरे बालक में कौन से गुण होंगे? इसके भाग्यों एवं कर्मों को भी तुम अभी बतलाओ। (१३९)

पत्नी ने कहा—हे प्रभो! मैं तुम्हें आज नहीं बतलाऊँगी। दूसरे समय कहूँगी। उन्होंने कहा—आज ही मुझे बताओ, अन्यथा मैं भोजन नहीं करूँगा। (१४०)

उसने कहा—हे ब्रह्मन्! सुनिये, मैं सही बात कहती हूँ। आपने कातरता पूर्वक जो पूछा है उससे यह (बालक) निश्चय ही कारु (शिल्पी) होगा। (१४१)

ऐसा कहे जाने पर अबोध (अवस्था में) होते हुए भी वह सूतकर्म कुशल बालक इन्द्र की सहायता हेतु गया। (१४२)

विश्वावसु आदि गन्धर्वों ने इन्द्र की सहायतार्थ जा रहे उस बालक को जानकर उसके तेज को बढ़ाया। (१४३)

गन्धर्वों के तेज से सम्पन्न शिशु ने इन्द्र के समीप जाकर कहा—हे देवेश! आइये, मैं आपका प्रिय सारथी बनूँगा। (१४४)

उसे सुनकर इन्द्र ने कहा—हे बालक! तुम किसके पुत्र हो? कैसे तुम अश्वों का संयमन करोगे? इस विषय में मुझे संशय हो रहा है। (१४५)

उसने कहा—हे वासव! मुझे ऋषि के तेज से उत्पन्न, भूमि से उद्भूत एवं गन्धर्वों के तेज से युक्त अश्वयान-विशारद समझो। (१४६)

इसे सुनकर योगिश्रेष्ठ भगवान् इन्द्र आकाश में गये एवं मातलि नाम से प्रसिद्ध वे ब्राह्मणपुत्र भी आकाश में गए। (१४७)

तदनन्तर देव श्रेष्ठ इन्द्र रथ पर आरूढ़ हुए एवं शमीकपुत्र मातलि ने प्रग्रह (लगाम) ग्रहण किया। (१४८)

तदुपरान्त मन्दर पर पहुँचकर वे रिपुसेना में प्रविष्ट हुए। प्रवेश करते समय सुरश्रेष्ठ श्रीमान् (इन्द्र) ने एक बाणयुक्त, श्वेत, रक्त, कृष्ण, अरुण एवं पाण्डु इन पाँच वर्णों वाले महान् धनुष को पड़ा देखकर बाणसहित उसे उठा लिया। (१४९-१५०)

तदनन्तर रज सत्त्वतमोमय (ब्रह्मा, विष्णु और महेश) देवों को मन से नमस्कार कर उन्होंने प्रत्यञ्चा चढ़ा कर बाण विनियोजित किया। (१५१)

ततो निश्चेरुरत्युग्राः शरा बर्हिणवाससः।
ब्रह्मेशविष्णुनामाङ्काः सूदयन्तोऽसुरान् रणे ॥ १५२

आकाशं विदिशः पृथ्वीं दिशश्च स शरोत्करैः।
सहस्राक्षोऽतिपटुभिश्छादयामास नारद ॥ १५३

गजो विद्धो हयो भिन्नः पृथिव्यां पतितो रथः।
महामात्रो धरां प्राप्तः सद्यः सीदञ्छरातुरः ॥ १५४

पदातिः पतितो भूम्यां शक्रमार्गणताडितः।
हतप्रधानभूयिष्ठं बलं तदभवद् रिपोः ॥ १५५

तं शक्रबाणाभिहतं दुरासदं
सैन्यं समालक्ष्य तदा कुजम्भः।
जम्भासुरश्चापि सुरेशमव्ययं
प्रजग्मतुर्गृह्य गदे सुघोरे ॥ १५६

तावापतन्तौ भगवान् निरीक्ष्य
सुदर्शनेनारिविनाशनेन।
विष्णुः कुजम्भं निजघान वेगात्
स स्यन्दनाद् गामगमद् गतासुः ॥ १५७

तस्मिन् हते भ्रातरि माधवेन
जम्भस्ततः क्रोधवशं जगाम।
क्रोधान्वितः शक्रमुपाद्रवद् रणे
सिंहं यथैणोऽतिविपन्नबुद्धिः ॥ १५८

तमापतन्तं प्रसमीक्ष्य शक्र-
स्त्यक्त्वैव चापं सशरं महात्मा।
जग्राह शक्तिं यमदण्डकल्पां
तामग्निदत्तां रिपवे ससर्ज ॥ १५९

शक्तिं सघण्टां कृतनिःस्वनां वै
दृष्ट्वा पतन्तीं गदया जघान।
गदां च कृत्वा सहसैव भस्मसाद्
बिभेद जम्भं हृदये च तूर्णम् ॥ १६०

शक्त्या स भिन्नो हृदये सुरारिः
पपात भूम्यां विगतासुरेव।
तं वीक्ष्य भूमौ पतितं विसंज्ञं
दैत्यास्तु भीता विमुखा बभूवुः ॥ १६१

उससे ब्रह्मा, विष्णु महेश्वर के नामों से अङ्कित मयूर-पुच्छयुक्त अति उग्र बाण निकले और असुरों का विनाश करने लगे। (१५२)

हे नारद! उन सहस्राक्ष ने अतिपटुतापूर्वक बाणों की वर्षा से आकाश, पृथ्वी, दिशाओं एवं विदिशाओं को आच्छादित कर दिया। (१५३)

हाथी विद्ध हो गए, घोड़े विदीर्ण हो गये, रथ पृथ्वी पर गिर पड़े एवं बाणों से व्याकुल हाथी चालक क्लेशपूर्वक पृथ्वी पर पतित हो गया। (१५४)

इन्द्र के बाणों से आहत पदाति योद्धा भूमि पर गिर पड़े। शत्रु की सेना के अधिकांश प्रधान मारे गए। (१५५)

उस दुर्धर्ष सेना को इन्द्र के बाणों से निहत हुई देख कर असुर कुजम्भ और जम्भ भयंकर गदा लेकर अविनाशी सुरेन्द्र की ओर दौड़े। (१५६)

उन दोनों को आते देखकर भगवान् विष्णु ने शत्रु-विनाशक सुदर्शनचक्र से वेगपूर्वक कुजम्भ को मारा। वह निष्प्राण होकर रथ से पृथ्वी पर गिर पड़ा। (१५७)

माधव द्वारा उस भाई के मारे जाने पर जम्भ क्रोध के वशीभूत हो गया। क्रोधान्वित होकर वह युद्ध में इन्द्र की ओर इस प्रकार दौड़ा जैसे हतबुद्धि मृग सिंह की ओर दौड़ता है। (१५८)

उसे आते देखकर महात्मा इन्द्र ने धनुष बाण को छोड़ कर अग्नि द्वारा प्रदत्त यमदण्डतुल्य शक्ति को ग्रहण कर उसे शत्रु की ओर फेंका। (१५९)

शब्द करती हुई घण्टायुक्त शक्ति को देखकर (जम्भ ने) उस पर गदा से प्रहार किया। (उस शक्ति ने) गदा को सहसा भस्मसात् कर जम्भ का हृदय शीघ्र ही विदीर्ण कर दिया। (१६०)

शक्ति से हृदय के विदीर्ण हो जाने पर वह देवशत्रु निष्प्राण होकर पृथ्वी पर गिर पड़ा। उसे निष्प्राण होकर पृथ्वी पर गिरा देखकर दैत्यगण भयभीत होकर पराङ्मुख हो गए। (१६१)

जम्भे हते दैत्यबले च भग्ने
गणास्तु हृष्टा हरिमर्चयन्तः ।
वीर्यं प्रशंसन्ति शतक्रतोश्च
स गोत्रभिच्छर्वमुपेत्य तस्थौ ॥ १६२

इति श्रीवामनपुराणे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

पुलस्त्य उवाच ।
वर्तिमस्तदा दैत्यबले च भग्ने
शुक्रोऽब्रवीदन्धकमासुरेन्द्रम् ।
एह्येहि वीराद्य गृहं महासुर
योत्स्याम भूयो हरमेत्य शैलम् ॥ १
तमुवाचान्धको ब्रह्मन् न सम्यग्भवतोदितम् ।
रणान्नैवापयास्यामि कुलं व्यपदिशन् स्वयम् ॥ २
पश्य त्वं द्विजशार्दूल मम वीर्यं सुदुर्धरम् ।
देवदानवगन्धर्वान् जेष्ये सेन्द्रमहेश्वरम् ॥ ३

इत्येवमुक्त्वा वचनं हिरण्याक्षसुतोऽन्धकः ।
समाश्वास्याब्रवीच्छंभुं सारथिं मधुराक्षरम् ॥ ४
सारथे वाहय रथं हराभ्याशं महाबल ।
यावन्निहन्मि बाणौघैः प्रमथामरवाहिनीम् ॥ ५
इत्यन्धकवचः श्रुत्वा सारथिस्तुरगांस्तदा ।
कृष्णवर्णान् महावेगान् कशयाऽभ्याहनन्मुने ॥ ६
ते यत्नतोऽपि तुरगाः प्रेर्यमाणा हरं प्रति ।
जघनेष्ववसीदन्तः कृच्छ्रेणोहुश्च तं रथम् ॥ ७
वहन्तस्तुरगा दैत्यं प्राप्ताः प्रमथवाहिनीम् ।

जम्भ के मारे जाने एवं दैत्य सेना के भग्न हो जाने पर सभी गण हरि का अर्चन एवं इन्द्र की पराक्रम की प्रशंसा करने लगे। वे इन्द्र शङ्कर के समीप जाकर खड़े हो गये। (१६२)

श्रीवामनपुराण में तैंतालिसवाँ अध्याय समाप्त ॥४३॥

४४

पुलस्त्य ने कहा—उस समय दैत्य सेना के भग्न हो जाने पर शुक्र ने असुरेन्द्र अन्धक से कहा—हे वीर महासुर! इस समय घर चलो। पुनः पर्वत पर आकर शङ्कर से युद्ध करेंगे। (१)

अन्धक ने उनसे कहा—हे ब्रह्मन्! आपने उचित बात नहीं कही। अपने कुल को कलङ्कित करते हुए मैं युद्ध से पलायन नहीं करूँगा। (२)

हे द्विजश्रेष्ठ! मेरा दुर्धर्ष वीर्य देखिए। मैं इन्द्र और महेश्वर सहित सभी देवों, दानवों और गन्धर्वों को जीतूँगा। (३)

इस प्रकार के वचन को कहकर हिरण्याक्ष-पुत्र अन्धक ने शम्भु (नामक) सारथि से मधुरवाणी में समाश्वासन देते हुये कहा— (४)

हे महाबलशाली सारथि! तुम रथ को महादेव के सामने ले चलो। मैं बाणों की वर्षा से प्रमथों एवं देवों की सेना को मारूँगा। (५)

हे मुने! अन्धक का वचन सुनकर सारथि ने महावेगवान् कृष्णवर्ण के घोड़ों को कोड़े से मारा। (६)

शङ्कर के प्रति प्रयत्नपूर्वक प्रेरित किये जा रहे वे अश्व जांघों में पीड़ा का अनुभव करते हुए कष्टपूर्वक उस रथ को खींच रहे थे। (७)

दैत्य को ढोने वाले वे अश्व वायुवेग-तुल्य होने पर भी

संवत्सरेण साग्रेण वायुवेगसमा अपि ॥ ८
ततः कार्मुकमानम्य बाणजालैर्गणेश्वरान् ।
सुरान् संछादयामास सेन्द्रोपेन्द्रमहेश्वरान् ॥ ९
बाणैश्छादितमीक्ष्यैव बलं त्रैलोक्यरक्षिता ।
सुरान् प्रोवाच भगवांश्चक्रपाणिर्जनार्दनः ॥ १०

विष्णुरुवाच ।

किं तिष्ठध्वं सुरश्रेष्ठा हतेनानेन वै जयः ।
तस्मान्मद्वचनं शीघ्रं नियतां वै जयेप्सवः ॥ ११
शात्यन्तामस्य तुरगाः समं रथकुटुम्बिना ।
भज्यतां स्यन्दनश्चापि निरथः नियतां रिपुः ॥ १२
निरथं तु कृतं पश्चादेनं धक्ष्यति शंकरः ।
नोपेक्ष्यः शत्रुरदिष्टो देवाचार्येण देवताः ॥ १३
इत्येवमुक्ताः प्रमथा वासुदेवेन सामराः ।
चक्रुर्वेगं सहेन्द्रेण सम चक्रधरेण च ॥ १४
तुरगाणां सहस्रं तु मेघाभानां जनार्दनः ।
निमिषान्तरमात्रेण गदया विनिपोथयत् ॥ १५

हताश्वात् स्यन्दनात् स्कन्दः प्रगृह्य रथसारथिम् ।
शक्त्या विभिन्नहृदयं गतासुं व्यसृजद् भुवि ॥ १६
विनायकाद्याः प्रमथाः समं शक्रेण दैवतैः ।
साध्वजाक्षं रथं तूर्णमभञ्जन्त तपोधनाः ॥ १७
सहसा स महातेजा विरथस्त्यज्य कार्मुकम् ।
गदामादाय बलवानभिदुद्राव दैवतान् ॥ १८
पदान्यष्टौ ततो गत्वा मेघगम्भीरया गिरा ।
स्थित्वा प्रोवाच दैत्येन्द्रो महादेवं स हेतुमत् ॥ १९
भिक्षो भवान् सहानीकस्त्वसहायोऽस्मि साम्प्रतम् ।
तथाऽपि त्वां विजेष्यामि पश्य मेऽद्य पराक्रमम् ॥२०
तद्वाक्यं शंकरः श्रुत्वा सेन्द्रान्सुरगणांस्तदा ।
ब्रह्मणा सहितान् सर्वान् स्वशरीरे न्यवेशयत् ॥ २१
शरीरस्थांस्तान् प्रमथान् कृत्वा देवांश्च शंकरः ।
प्राह एह्येहि दुष्टात्मन् अहमेकोऽपि संस्थितः ॥ २२
तं दृष्ट्वा महदाश्चर्यं सर्वामरगणक्षयम् ।
दैत्यः शंकरमभ्यागाद् गदामादाय वेगवान् ॥ २३

एक वर्ष से अधिक समय में प्रमथों की सेना में पहुँचे। (८)

तदनन्तर (अन्धक ने) धनुष को झुकाकर बाणसमूहों द्वारा गणेश्वरों एवं इन्द्र, उपेन्द्र (विष्णु) तथा महेश्वर सहित सभी देवों को आच्छादित कर दिया। (९)

सेना को बाणों से आच्छादित देखकर त्रैलोक्यरक्षक चक्रपाणि भगवान् जनार्दन ने देवों से कहा। (१०)

विष्णु ने कहा—हे सुरश्रेष्ठो! आप लोग बैठे क्यों हैं? इसके मारे जाने से ही विजय होगी। अतः विजयाकांक्षी आप लोग शीघ्र मेरे वचनानुसार कार्य करें। (११)

रथ के सारथि सहित इसके अश्वों को मार डालो एवं रथ को तोड़कर शत्रु को रथहीन बना दो। (१२)

रथहीन करने के उपरान्त शङ्कर इसे भस्म करेंगे। हे देवों! देवाचार्य बृहस्पति ने कहा है कि शत्रु की उपेक्षा नहीं करनी चाहिए। (१३)

वासुदेव के ऐसा कहने पर इन्द्र एवं विष्णु सहित प्रमथों तथा देवों ने वेगपूर्वक आक्रमण किया। (१४)

जनार्दन ने क्षणमात्र में गदा के आघात से मेघ के समान वर्ण वाले सहस्र घोड़ों को मार डाला। (१५)

स्कन्द ने मारे गये घोड़ों वाले रथ से सारथि को खींचकर शक्ति द्वारा उसके हृदय को भिन्न कर दिया एवं निष्प्राण हो जाने पर उसे भूमि पर फेंक दिया। (१६)

इन्द्र आदि देवों के साथ तपोधन विनायकादि प्रमथों ने शीघ्र ध्वजा एवं अक्ष सहित रथ को तोड़ डाला। (१७)

महातेजस्वी बलवान् (अन्धक) ने रथहीन होने पर धनुष को छोड़ दिया एवं गदा लेकर वह देवों की ओर दौड़ा। (१८)

तदनन्तर आठ पग चलने के उपरान्त खड़े होकर दैत्येन्द्र ने मेघतुल्य गम्भीर वाणी में महादेव से हेतुयुक्त वचन कहा। (१९)

हे भिक्षुक! सम्प्रति तुम सेनायुक्त हो एवं मैं असहाय हूँ तथापि मैं तुमको जीतूँगा। आज मेरा पराक्रम देखो। (२०)

उसका वचन सुनकर शंकर ने इन्द्र और ब्रह्मा के साथ सभी देवताओं को अपने शरीर में संनिविष्ट कर लिया। (२१)

उन प्रमथों एवं देवों को अपने शरीर में सन्निविष्ट करने के उपरान्त शङ्कर ने कहा—हे दुष्टात्मा! आओ, आओ। मैं अकेला ही खड़ा हूँ। (२२)

समस्त देवों के विलयन का यह महान् आश्चर्य देखने के उपरान्त वह दैत्य गदा लेकर वेगपूर्वक शङ्कर

तमापतन्तं भगवान् दृष्ट्वा त्यक्त्वा वृषोत्तमम् ।
शूलपाणिर्गिरिप्रस्थे पदातिः प्रत्यतिष्ठत ॥ २४
वेगेनैवापतन्तं च निर्बिभेदोरसि भैरवः ।
दारुणं सुमहद् रूपं कृत्वा त्रैलोक्यभीषणम् ॥ २५
दंष्ट्राकरालं रविकोटिसंनिभं
मृगारिचर्माभिवृतं जटाधरम् ।
भुजंगहारामलकण्ठकन्दरं
विंशार्धबाहुं सपडर्धलोचनम् ॥ २६
एतादृशेन रूपेण भगवान् भूतभावनः ।
निर्बिभेद तदा शत्रुं शूलेन शुभदः शाश्वतः शिवः ॥२७
सशूलं भैरवं गृह्य भिन्नेऽप्युरसि दानवः ।
निराहारातिवेगेन क्रोशमात्रं महामुने ॥ २८
ततः कथंचिद् भगवान् संस्तभ्यात्मानमात्मना ।
तूर्णमुत्पाटयामास शूलेन सगदं रिपुम् ॥ २९
दैत्याधिपस्त्वपि गदां हरमूर्ध्नि न्यपातयत् ।
कराभ्यां गृह्य शूलं च समुत्पतत दानवः ॥ ३०
संस्थितः स महायोगी सर्वाधारः प्रजापतिः ।
गदापातक्षताद् भूरि चतुर्धाऽसृगथापतत् ॥ ३१
पूर्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः ।
विद्याराजेति विख्यातः पद्ममालाविभूषितः ॥ ३२
तथा दक्षिणधारोत्थो भैरवः प्रेतमण्डितः ।
कालराजेति विख्यातः कृष्णाञ्जनसमप्रभः ॥ ३३
अथ प्रतीचीधारोत्थो भैरवः पत्रभूषितः ।
अतसीकुसुमप्रख्यः कामराजेति विश्रुतः ॥ ३४
उदग्धाराभवश्चान्यो भैरवः शूलभूषितः ।
सोमराजेति विख्यातश्चक्रमालाविभूषितः ॥ ३५
क्षतस्य रुधिरात् जातो भैरवः शूलभूषितः ।
स्वच्छन्दराजो विख्यातः इन्द्रायुधसमप्रभः ॥ ३६
भूमिस्थाद् रुधिराज्जातो भैरवः शूलभूषितः ।
ख्यातो ललितराजेति सौभाञ्जनसमप्रभः ॥ ३७

के समीप गया। (२३)

भगवान् शूलपाणि उसे आते देख श्रेष्ठ वृषभ को छोड़कर पर्वत पर पैदल खड़े हो गए। (२४)

भैरव ने अतिभयङ्कर त्रैलोक्यभीषण रूप धारण कर वेगपूर्वक आ रहे (अन्धक का) उरस्थल विदीर्ण कर दिया। (२५)

(शङ्कर का तत्कालीन रूप) भयङ्कर दाढ़ों से युक्त, कोटिसूर्य के सदृश प्रकाशमान, व्याघ्रचर्मावृत, जटामण्डित सर्प के हार से अलङ्कृत ग्रीवावाला, दस भुजाओं से युक्त तथा त्रिनेत्रसम्पन्न था। (२६)

इस प्रकार के रूप से संयुक्त शुभद, शाश्वत, भूतभावन भगवान् शिव ने शूल द्वारा शत्रु का भेदन किया। (२७)

हे महामुने! उरस्थल के विभेदित होने पर भी दानव शूलसहित भैरव को पकड़कर एक कोस तक उन्हें खींच ले गया। (२८)

तदनन्तर भगवान् ने किसी प्रकार मन द्वारा स्वयं को रोका एवं शीघ्रतापूर्वक शूल से गदायुक्त शत्रु को मारा। (२९)

दैत्याधिप ने भी शङ्कर के मस्तक पर गदा का प्रहार किया एवं शूल को हाथों से पकड़कर वह ऊपर उछला। (३०)

सबके आधार वे महायोगी प्रजापति खड़े रहे किन्तु, गदाघात से हुए क्षत द्वारा चार धाराओं में अत्यन्त रुधिर प्रवाहित होने लगा। (३१)

पूर्व दिशा की धारा से अग्नि के समान प्रभा वाले पद्ममाला से विभूषित 'विद्याराज' नाम से विख्यात भैरव उत्पन्न हुये। (३२)

तथा दक्षिण की धारा से प्रेतमण्डित कृष्णाञ्जन तुल्य प्रभावान् 'कालराज' नाम से प्रसिद्ध भैरव उत्पन्न हुए। (३३)

तदनन्तर पश्चिम की धारा से अतसीपुष्प के सदृश पत्रभूषित 'कामराज' नाम से प्रसिद्ध भैरव उत्पन्न हुये। (३४)

उत्तर की धारा से चक्रमालाविभूषित शूलमण्डित 'सोमराज' नाम से प्रसिद्ध अन्य भैरव उत्पन्न हुए। (३५)

क्षत के रुधिर से इन्द्र धनुष के समान कान्ति वाले शूलभूषित 'स्वच्छन्दराज' नाम से विख्यात भैरव उत्पन्न हुये। (३६)

भूमि पर गिरे हुए रुधिर से सौभाञ्जन के सदृश शूलभूषित शोभायुक्त 'ललितराज' नाम से विख्यात भैरव उत्पन्न हुए। (३७)

एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ।
विघ्नराजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ॥ ३८
एवं महात्मना दैत्यः शूलप्रोतो महासुरः ।
छत्रवद् धारितो ब्रह्मन् भैरवेण त्रिशूलिना ॥ ३९
तस्यासृग्धारणं ब्रह्मञ्छूलभेदादवापतत् ।
येनाकण्ठ महादेवो निमग्नः सप्तमूर्तिमान् ॥ ४०
ततः स्वेदोऽभवद् भूरि श्रमजः शंकरस्य तु ।
ललाटफलके तस्माज्जाता कन्याऽसृगाप्लुता ॥ ४१
यद्भूम्यां न्यपतद् विप्र स्वेदबिन्दुः शिवाननात् ।
तस्मादङ्गारपुञ्जाभो बालकः समजायत ॥ ४२
स बालस्तृषितोऽत्यर्थं पपौ रुधिरमान्धकम् ।
कन्या चोत्कृत्य संजातमसृग्विलिलिहेऽद्भुता ॥ ४३
ततस्तामाह बालार्कप्रभा भैरवमूर्तिमान् ।
शंकरो वरदो लोके श्रेयोऽर्थाय वचो महत् ॥ ४४
त्वां पूजयिष्यन्ति सुरा ऋषयः पितरोरगाः ।
यक्षविद्याधराश्चैव मानवाश्च शुभंकरि ॥ ४५
त्वां स्तोष्यन्ति सदा देवि बलिपुष्पोत्करैः करैः ।
चर्चिकेति शुभं नाम यस्माद् रुधिरचर्चिता ॥ ४६

इत्येवमुक्ता वरदेन चर्चिका
भूतानुजाता हरिचर्मवासिनी ।
महीं समन्ताद् विचचार सुन्दरी
स्थानं गता हैङ्गुलताद्रिमुत्तमम् ॥ ४७

तस्यां गतायां वरदः कुजस्य
प्रादाद् वरं सर्ववरोत्तमं यत् ।
ग्रहाधिपत्यं जगतां शुभाशुभ
भविष्यति त्वद्वशगं महात्मन् ॥ ४८

हरोऽन्धकं वर्षसहस्रमात्रं
दिव्यं स्वनेत्रार्कहुताशनेन ।
चकार संशुष्कतनुं त्वशोणितं
त्वगस्थिशेषं भगवान् स भैरवः ॥ ४९

तताग्निना नेत्रमयेन शुद्धः
स मुक्तपापोऽसुरराड् बभूव ।
ततः प्रजानां बहुरूपमीशं
नाथं हि सर्वस्य चराचरस्य ॥ ५०

हे मुनि ! इस प्रकार इन भैरव का सात रूप कहा जाता है। 'विघ्नराज' नाम के अष्टम भैरव कहे जाते हैं। इस प्रकार आठ भैरव कहे जाते हैं। (३८)

हे ब्रह्मन् ! इस प्रकार महात्मा त्रिशूली भैरव ने शूलविद्ध महासुर दैत्य को छत्र की तरह धारण किया। (३९)

हे ब्रह्मन् ! शूलभेद से उसका अत्यधिक रुधिर गिरा। उससे सप्तमूर्तिमान् महादेव आकण्ठ निमग्न हो गए। (४०)

परिश्रम के कारण शङ्कर के ललाटफलक पर अतिशय स्वेद उत्पन्न हुआ। उससे रुधिराप्लुत एक कन्या उत्पन्न हुई। (४१)

हे विप्र ! शिव के मुख से पृथ्वी पर गिरे स्वेदबिन्दुओं से अङ्गारपुञ्ज की शोभा वाला एक बालक उत्पन्न हुआ। (४२)

अत्यन्त प्यासा वह बालक अन्धक का रुधिर पान करने लगा एवं अद्भुत कन्या भी उठकर उत्पन्न हुए रुधिर को चाटने लगी। (४३)

तदनन्तर भैरवरूपधारी वरद शङ्कर ने बाल सूर्य के सदृश प्रभा वाली उस कन्या से लोककल्याणकारी महान् वचन कहा— (४४)

हे शुभकारिणी ! देवता, ऋषि, पितर, उरग, यक्ष, विद्याधर एवं मानव तुम्हारी पूजा करेंगे। (४५)

हे देवि ! (वे लोग) बलि एवं पुष्पाञ्जलि से तुम्हारी स्तुति करेंगे। चूंकि तुम रुधिर से लिप्त हो अतः तुम्हारा शुभ नाम 'चर्चिका' यह होगा। (४६)

वरद शङ्कर के ऐसा कहने पर व्याघ्रचर्म का वस्त्र धारण करने वाली भूतानुजाता सुन्दरी चर्चिका पृथ्वी पर चतुर्दिक् भ्रमण करती हुई उत्तम हैङ्गुलताद्रि पर चली गई। (४७)

उसके चले जाने पर वरदाता शंकर ने कुज (मंगल) को सर्वश्रेष्ठ वर दिया। (उन्होंने कहा)—हे महात्मन् ! तुम ग्रहों के अधिपति बनोगे तथा जगत् का शुभाशुभ तुम्हारे वश में होगा। (४८)

इन भगवान् भैरव हर ने अपने अग्निसूर्यात्मक नेत्रों से सहस्र दिव्य वर्षों तक अन्धक के शरीर को सुखा कर शोणितशून्य एवं अस्थिचर्मावशिष्ट बना दिया। शङ्कर के नेत्र से उत्पन्न अग्नि द्वारा शुद्ध होने से वह असुरराज पापमुक्त हो गया। तदनन्तर प्रजाओं के बहुरूपवान् नियामक, समस्त चराचर के स्वामी, सर्वेश्वर, अव्यय, ईश त्रैलोक्यनाथ, वरद, वरेण्य, समस्त सुरादिकों द्वारा सुवन्दित

ज्ञात्वा स सर्वेश्वरमीशमव्ययं
त्रैलोक्यनाथं वरदं वरेण्यम् ।
सर्वैः सुराद्यैर्नतमीड्यमाद्यं
ततोऽन्धकः स्तोत्रमिदं चकार ॥ ५१

अन्धक उवाच ।

नमोऽस्तु ते भैरव भीममूर्ते
त्रिलोकगोप्त्रे शितशूलधारिणे ।
विंशार्द्धबाहो भुजगेशहार
त्रिनेत्र मां पाहि विपन्नबुद्धिम् ॥ ५२

जयस्व सर्वेश्वर विश्वमूर्ते
सुरासुरैर्वन्दितपादपीठ ।
त्रैलोक्यमातुर्गुरवे वृषाङ्क
भीतः शरण्यं शरणागतोऽस्मि ॥ ५३

त्वां नाथ देवाः शिवमीरयन्ति
सिद्धा हरं स्थाणुं महर्षयश्च ।
भीमं च यक्षा मनुजा महेश्वरं
भूताश्च भूताधिपमामनन्ति ॥ ५४

निशाचरा उग्रमुपार्चयन्ति
भवेति पुण्याः पितरो नमन्ति ।
दासोऽस्मि तुभ्यं हर पाहि मह्यं
पापक्षयं मे कुरु लोकनाथ ॥ ५५

भवांस्त्रिदेवस्त्रियुगस्त्रिधर्मा
त्रिपुष्करश्चासि विभो त्रिनेत्र ।
त्रय्यारुणिस्त्रिश्रुतिरव्ययात्मन्
पुनीहि मां त्वां शरणं गतोऽस्मि ॥ ५६

त्रिणाचिकेतस्त्रिपदप्रतिष्ठः
षडङ्गवित् त्वं विषयेष्वलुब्धः ।
त्रैलोक्यनाथोऽसि पुनीहि शंभो
दासोऽस्मि भीतः शरणागतस्ते ॥ ५७

कृतं महत् शंकर तेऽपराधं
मया महाभूतपते गिरीश ।
कामारिणा निर्जितमानसेन
प्रसादये त्वां शिरसा नतोऽस्मि ॥ ५८

पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः ।

स्तुत्य एवं आद्य शङ्कर को जानकर अन्धक ने यह स्तुति की। (४९-५१)

हे भीममूर्ति भैरव ! हे त्रिलोक रक्षक ! तेजशूलधारी ! आपको नमस्कार है। हे दश भुजाओं वाले तथा भुजगेश का हार धारण करने वाले त्रिनेत्र! मुझ विपन्नबुद्धि की रक्षा करो। (५२)

हे देवों तथा असुरों से वन्दित पादपीठ वाले विश्वमूर्ति सर्वेश्वर! आप की जय हो। हे त्रैलोक्यजननी के स्वामी वृषाङ्क! मैं भयभीत होकर आप शरण देने वाले की शरण में आया हूँ। (५३)

हे नाथ! देवता आपको शिव (मंगलमय) कहते हैं। आपको सिद्ध लोग हर (पाप हारी), महर्षि लोग स्थाणु (अचल), यक्ष लोग भीम, मनुष्य महेश्वर और भूत भूताधिपति मानते हैं। (५४)

निशाचर उग्र नाम से आपका अर्चन करते हैं एवं पुण्यवान् पितृगण भव नाम से आपको नमस्कार करते हैं। हे हर! मैं आपका दास हूँ, मेरी रक्षा करें। हे लोकनाथ! मेरे पापों का नाश कीजिए। (५५)

हे विभु त्रिनेत्र! आप त्रिदेव, त्रियुग, त्रिधर्मा, तथा त्रिपुष्कर हैं। हे अव्ययात्मन्! आप त्रय्यारुणि, तथा त्रिश्रुति हैं। आप मुझे पवित्र करें। मैं आपकी शरण में आया हूँ। (५६)

आप त्रिणाचिकेत, त्रिपदप्रतिष्ठ, (स्वर्ग, मर्त्य, पाताल रूप तीन पदों पर प्रतिष्ठित), षडङ्गवित्, (वेद के शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द, और ज्योतिष इन छः अंगों के ज्ञाता), विषयों के प्रति अलुब्ध तथा त्रैलोक्यनाथ हैं। हे शम्भो! आप मुझे पवित्र करें। मैं आपका दास हूँ। भयभीत होकर मैं आपकी शरण में आया हूँ। (५७)

हे शङ्कर! हे महाभूतपति! हे गिरीश! कामरूपी शत्रु ने मेरे मन को जीत लिया था इसलिए मैंने आपका महान् अपराध किया है। मैं आपको सिर से प्रणाम करता हूँ। (५८)

मैं पापी, पापकर्मा, पापात्मा तथा पापसम्भूत हूँ। हे

त्राहि मां देव ईशान सर्वपापहरो भव ॥ ५९
मा मे क्रुध्यस्व देवेश त्वया चैवादृशोऽस्म्यहम् ।
सृष्टः पापसमाचारो मे प्रसन्नो भवेश्वर ॥ ६०
त्वं कर्ता चैव धाता च त्वं जयस्त्वं महाजयः ।
त्वं मङ्गल्यस्त्वमोंकारस्त्वमीशानो ध्रुवोऽव्ययः ॥ ६१
त्वं ब्रह्मा सृष्टिकृन्नाथस्त्वं विष्णुस्त्वं महेश्वरः ।
त्वमिन्द्रस्त्वं वषट्कारो धर्मस्त्वं च सुरोत्तमः ॥ ६२
सूक्ष्मस्त्वं व्यक्तरूपस्त्वं त्वमव्यक्तस्त्वमीश्वरः ।
त्वया सर्वमिदं व्याप्तं जगत् स्थावरजङ्गमम् ॥ ६३
त्वमादिरन्तो मध्यश्च त्वमनादिः सहस्रपात् ।
विजयस्त्वं सहस्राक्षो विरूपाक्षो महाभुजः ॥ ६४
अनन्तः सर्वगो व्यापी हंसः प्राणाधिपोऽच्युतः ।
गीर्वाणपतिरव्यग्रो रुद्रः पशुपतिः शिवः ॥ ६५
त्रैविद्यस्त्वं जितक्रोधो जितारिर्विजितेन्द्रियः ।
जयश्च शूलपाणिस्त्वं त्राहि मां शरणागतम् ॥ ६६

पुलस्त्य उवाच ।
इत्थं महेश्वरो ब्रह्मन् स्तुतो दैत्याधिपेन तु ।
प्रीतियुक्तः पिङ्गलाक्षो हैरण्याक्षिमुवाच ह ॥ ६७
सिद्धोऽसि दानवपते परितुष्टोऽस्मि तेऽन्धक ।
वरं वरय भद्रं ते यमिच्छसि विनाऽम्बिकाम् ॥ ६८

अन्धक उवाच ।
अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता ।
वन्दामि चरणौ मातुर्वन्दनीया ममाम्बिका ॥ ६९
वरदोऽसि यदीशान तद्यातु विलयं मम ।
शारीरं मानसं वाग्जं दुष्कृतं दुर्विचिन्तितम् ॥ ७०
तथा मे दानवो भावो व्यपयातु महेश्वर ।
स्थिराऽस्तु त्वयि भक्तिस्तु वरमेतत् प्रयच्छ मे ॥ ७१

महादेव उवाच ।
एवं भवतु दैत्येन्द्र पापं ते यातु संक्षयम् ।
मुक्तोऽसि दैत्यभावाच्च भृङ्गी गणपतिर्भव ॥ ७२

देव ईशान! हे सर्वपापहारी महादेव! मेरी रक्षा कीजिये। (५९)

हे देवेश! आप मेरे ऊपर क्रुद्ध न हों। आपने ही मुझे इस प्रकार का पापाचारी बनाया है। हे ईश्वर! मेरे ऊपर प्रसन्न होइये। (६०)

आप कर्ता, एवं धाता हैं। आप ही जय हैं और आप महाजय हैं। आप मङ्गलमय हैं। आप ओंकार हैं। आप ही ईशान, अव्यय तथा ध्रुव हैं। (६१)

आप सृष्टिकर्ता ब्रह्मा तथा प्रभु हैं। आप विष्णु एवं महेश्वर हैं। आप इन्द्र हैं, आप वषट्कार हैं, आप धर्म तथा सुरश्रेष्ठ हैं। (६२)

आप सूक्ष्म हैं, आप व्यक्तरूप हैं, आप अव्यक्त हैं, आप ईश्वर हैं, आप ही से यह चराचर जगत् व्याप्त है। (६३)

आप आदि, मध्य एवं अन्त हैं, आप अनादि एवं सहस्रपाद् हैं। आप विजय हैं। आप सहस्राक्ष, विरूपाक्ष एवं महाभुज हैं। (६४)

आप अनन्त, सर्वगत, व्यापी, हंस, प्राणाधिप, अच्युत, गीर्वाणपति, अव्यग्र, रुद्र, पशुपति एवं शिव हैं। (६५)

आप त्रैविद्य क्रोधजयी, शत्रुजयी, इन्द्रियजयी, जय एवं शूलपाणि हैं। आप मुझ शरणागत की रक्षा करें। (६६)

पुलस्त्य ने कहा—हे ब्रह्मन्! दैत्याधिपति के इस प्रकार स्तुति करने पर पिङ्गलाक्ष महेश्वर ने प्रीतिपूर्वक हिरण्याक्ष के पुत्र अन्धक से कहा— (६७)

हे दानवपति अन्धक! तुम सिद्ध हो गए हो मैं तुम्हारे ऊपर प्रसन्न हूँ। अम्बिका के अतिरिक्त तुम जो चाहो वह वर माँगो। तुम्हारा कल्याण हो। (६८)

अन्धक ने कहा—अम्बिका मेरी जननी और आप त्र्यम्बक मेरे पिता हैं। माता के चरणों की मैं वन्दना करता हूँ। अम्बिका मेरी वन्दनीया हैं। (६९)

हे ईशान! यदि आप वर देना चाहते हैं तो मेरे शारीरिक, मानसिक एवं वाचिक पाप तथा कुत्सित विचार नष्ट हो जाँय। (७०)

हे महेश्वर! मेरा दानवभाव भी दूर हो जाय एवं आप में मेरी स्थिर भक्ति हो। यही वर मुझे दीजिए। (७१)

महादेव ने कहा—हे दैत्येन्द्र! ऐसा ही हो। तुम्हारे पाप नष्ट हो जाँय! तुम दैत्यभाव से मुक्त हो गये। अब तुम गणपति भृङ्गी बनो। (७२)

इत्येवमुक्त्वा वरदः शूलाग्रादवतार्य तम् ।
निर्मार्ज्य निजहस्तेन चक्रे निर्व्रणमन्धकम् ॥ ७३
ततः स्वदेहतो देवान् ब्रह्मादीनाजुहाव सः ।
ते निश्चेरुर्महात्मानो नमस्यन्तस्त्रिलोचनम् ॥ ७४
गणान् सनन्दीनाहूय सन्निवेश्य तदाग्रतः ।
भृङ्गिनं दर्शयामास ध्रुवं नैषोऽन्धकेति हि ॥ ७५
तं दृष्ट्वा दानवपतिं संशुष्कपिशितं रिपुम् ।
गणाधिपत्यमापन्नं प्रशशंसुर्वृषध्वजम् ॥ ७६
ततस्तान् प्राह भगवान् संपरिष्वज्य देवताः ।
गच्छध्वं स्वानि धिष्ण्यानि भुङ्क्ष्वं त्रिदिवं सुखम् ॥७७
सहस्राक्षोऽपि सयातु पर्वतं मलयं शुभम् ।
तत्र स्वकार्यं कृत्वैव पश्चाद् यातु त्रिविष्टपम् ॥ ७८
इत्येवमुक्त्वा त्रिदशान् समाभाष्य व्यसर्जयत् ।
पितामहं नमस्कृत्य परिष्वज्य जनार्दनम् ।
ते विसृष्टा महेशेन सुरा जग्मुस्त्रिविष्टपम् ॥ ७९

ऐसा कहकर वरदाता महादेव ने उस अन्धक को शूल की नोक से उतारा एवं अपने हाथ से सहला कर क्षत रहित कर दिया। (७३)

तदनन्तर उन्होंने अपने शरीर में स्थित ब्रह्मादि देवों का आह्वान किया। त्रिलोचन को नमस्कार करते हुए वे सभी महात्मा बाहर निकले। (७४)

नन्दी सहित गणों को बुलाकर एवं सम्मुख बैठाकर भृङ्गी को दिखलाते हुए कहा—निश्चय ही यह अन्धक नहीं है। (७५)

उस शुष्क मांस वाले दानवपति शत्रु को गणाधिप हुआ देखकर वे सभी वृषध्वज की प्रशंसा करने लगे। (७६)

तदनन्तर उन देवों का आलिङ्गन कर भगवान् ने कहा—हे देवताओ! आप लोग अपने स्थान को जाइये एवं सुखपूर्वक स्वर्ग में रहिये। (७७)

सहस्राक्ष इन्द्र भी शुभ मलय पर्वत पर जाँय तथा वहाँ अपना काम समाप्त कर स्वर्ग चले जाँय। (७८)

ऐसा कहकर देवों से सम्भाषण, पितामह को नमस्कार तथा जनार्दन का आलिङ्गन कर उन्होंने सभी को विदा किया। महेश से विदा किये गए वे देवगण स्वर्ग चले गए। (७९)

महेन्द्रो मलयं गत्वा कृत्वा कार्यं दिवं गतः ।
गतेषु शक्रप्राग्र्येषु देवेषु भगवाञ्छिवः ॥ ८०
विसर्जयामास गणाननुमान्य यथार्हतः ।
गणाश्च शंकरं दृष्ट्वा स्वं स्वं वाहनमास्थिताः ॥ ८१
जग्मुस्ते शुभलोकानि महाभोगानि नारद ।
यत्र कामदुघा गावः सर्वकामफलद्रुमाः ॥ ८२
नद्यस्त्वमृतवाहिन्यो ह्रदाः पायसकर्दमाः ।
स्वां स्वां गतिं प्रयातेषु प्रमथेषु महेश्वरः ॥ ८३
समादायान्धकं हस्ते सनन्दिः शैलमभ्यगात् ।
द्वाभ्यां वर्षसहस्राभ्यां पुनरागाद्धरो गृहम् । ॥ ८४
ददृशे च गिरेः पुत्रीं श्वेतार्ककुसुमस्थिताम् ।
समायातं निरीक्ष्यैव सर्वलक्षणसंयुतम् ॥ ८५
त्यक्त्वाऽर्कपुष्पं निर्गत्य सखीस्ताः समुपाह्वयत् ।
समाहूताश्च देव्या ता जयाद्यास्तूर्णमागमन् ॥ ८६
ताभिः परिवृता तस्थौ हरदर्शनलालसा ।

महेन्द्र भी मलयाचल पर जाकर कार्य सम्पादन कर स्वर्ग चले गये। शक्रादि देवों के चले जाने पर भगवान् शिव ने यथायोग्य सम्मान कर गणों को विदा किया। हे नारद! गण भी शङ्कर का दर्शन कर अपने वाहनों पर आरूढ होकर महाभोगयुक्त उन शुभलोकों को चले गए जहाँ की गौएँ इच्छित वस्तु देने वाली तथा वृक्ष सर्वकामरूपी फलों के दाता, नदियाँ अमृतवाहिनी तथा ह्रद पायसरूपी कर्दम से पूर्ण थे। प्रमथों के अपने-अपने स्थानों पर चले जाने पर अन्धक का हाथ पकड़ कर नन्दी सहित महेश्वर पर्वत पर चले गए। दो सहस्र वर्षों के उपरान्त शङ्कर पुनः अपने घर लौटे। (८०-८४)

उन्होंने श्वेत अर्कपुष्प में स्थित गिरिजा को देखा। सर्वलक्षणसंयुक्त शङ्कर को आया हुआ देखते ही पार्वती अर्कपुष्प को छोड़कर बाहर निकलीं एवं उन्होंने उन सखियों को पुकारा। वे सभी जयादि देवियाँ पुकारी जाने पर शीघ्र चली आयीं। (८५-८६)

उनसे घिरी हुई पार्वती हर के दर्शन की लालसा से खड़ी हो गईं। गिरिजा को देखने के बाद दानव एवं नन्दी के ऊपर दृष्टिपात कर त्रिलोचन ने हर्षपूर्वक गिरिसुता का आलिङ्गन किया। तदनन्तर उन्होंने

ततस्त्रिनेत्रो गिरिजां दृष्ट्वा प्रेक्ष्य च दानवम् ॥ ८७

नन्दिनं च तथा हर्षादालिलिङ्गे गिरेः सुताम् ।
अथोवाचेप दासस्ते कृतो देवि मयाऽन्धकः ॥ ८८

पश्यस्व प्रणतिं यातं स्वसुतं चारुहासिनि ।
इत्युच्चार्यान्धकं चैव पुत्र एह्येहि सत्वरम् ॥ ८९

प्रनस्य शरणं मातुरेषा श्रेयस्करी तव ।
इत्युक्तो विभुना नन्दी अन्धकश्च गणेश्वरः ॥ ९०

समागम्याम्बिकापादौ ववन्दतुरुभावपि ।
अन्धकोऽपि तदा गौरीं भक्तिनम्रो महामुने ।
स्तुतिं चक्रे महापुण्यां पापघ्नीं श्रुतिसंमिताम् ॥ ९१

अन्धक उवाच ।

ॐ नमस्ये भवानीं भूतभव्यप्रियां लोकधात्रीं जनित्रीं स्कन्दमातरं महादेवप्रियां धारिणीं स्यन्दिनीं चेतनां त्रैलोक्यमातरं धरित्रीं देवमातरमथेज्यां श्रुतिं स्मृतिं दयां लज्जां कान्तिमप्रया-मसूयां मतिं सदापावनीं दैत्यसैन्यक्षयकरीं [5]

महामायां वैजयन्तीं सुशुभां कालरात्रिं गोविन्दभगिनीं शैलराजपुत्रीं सर्वदेवार्चितां सर्वभूतार्चितां विद्यां सरस्वतीं त्रिनयनमहिषीं नमस्यामि मृडानीं शरण्यां शरणमुपागतोऽहं नमो नमस्ते ॥ [10]

इत्थं स्तुता साऽन्धकेन परितुष्टा विभावरी ।
प्राह पुत्र प्रसन्नाऽस्मि वृणुष्व वरमुत्तमम् ॥ ९२

भृङ्गिरुवाच ।

पापं प्रशममायातु त्रिविधं मम पार्वति ।
तथेश्वरे च सततं भक्तिरस्तु ममाम्बिके ॥ ९३

पुलस्त्य उवाच ।

बाढमित्यब्रवीद् गौरी हिरण्याक्षसुतं तत ।
स चास्ते पूजयञ्छर्वं गणानामधिपोऽभवत् ॥ ९४

एवं पुरा दानवसत्तमं तं
महेश्वरेणाथ विरूपदृष्ट्या ।
कृतेन रूपं भयदं च भैरवं

कहा—हे देवि ! मैंने अन्धक को तुम्हारा दास बना लिया है । (८७-८८)

हे चारुहासिनि ! प्रणाम कर रहे अपने पुत्र को देखो । ऐसा कहने के उपरान्त उन्होंने कहा—हे पुत्र ! शीघ्र आओ । अपनी इस माता की शरण में जाओ । ये तुम्हारा कल्याण करेंगी । विभु के ऐसा कहने पर गणेश्वर नन्दी एवं अन्धक दोनों ने जाकर अम्बिका के चरणों में प्रणाम किया । हे महामुनि ! तदनन्तर भक्तिनम्र अन्धक ने गौरी की अति पवित्र पापघ्नी एवं श्रुतिसम्मत स्तुति की । (८९-९१)

अन्धक ने कहा—ओं भवानी को प्रणाम है । भैभूत भव्यप्रिया लोकधात्री, जनित्री, कार्तिकेय जननी, महादेवप्रिया, धारिणी, स्यन्दिनी, चेतना, त्रैलोक्य जननी, धरित्री, देवमाता, इज्या, श्रुति, स्मृति, दया, लज्जा, श्रेष्ठ कान्ति, असूया, मति, सदापावनी, दैत्यसैन्यक्षयकारिणी, महामाया, वैजयन्ती, अत्यन्तशोभा वाली, कालरात्रि, गोविन्द भगिनी, शैलराजपुत्री, सर्वदेवार्चिता, सर्वभूतपूजिता, विद्या, सरस्वती, त्रिनयनमहिषी को प्रणाम करता हूँ । मैं शरण्या मृडानी की शरण में आया हूँ । आपको बार बार प्रणाम है ।

अन्धक के इस प्रकार स्तुति करने पर भवानी ने प्रसन्न होकर कहा—हे पुत्र ! मैं प्रसन्न हूँ । तुम उत्तम वर माँगो । (९२)

भृङ्गि ने कहा—हे पार्वती ! हे अम्बिके ! मेरे त्रिविध पाप दूर हो जाँय एवं ईश्वर में सदा मेरी भक्ति बनी रहे । (९३)

पुलस्त्य ने कहा—तदनन्तर गौरी ने हिरण्याक्षसुत से कहा—ऐसा ही हो । वह वहाँ रहकर शिव की पूजा करते हुए गणाधिप हो गया । (९४)

इस प्रकार पूर्वकाल में उस दानवश्रेष्ठ को महेश्वर ने अपनी विरूपदृष्टि से भयदायक भैरव रूप प्रदान कर

भृङ्गित्वमीशेन कृतं स्वभक्त्या ॥ ९५
एतद् तवोक्तं हरकीर्तिवर्धनं
पुण्यं पवित्रं शुभदं महर्षे ।
संकीर्तनीयं द्विजसत्तमेषु
धर्मायुरारोग्यधनैषिणा सदा ॥ ९६

इति श्रीवामनपुराणे चतुश्चत्वारिंशोऽध्यायः ॥४४॥

४५

नारद उवाच ।
मलयेऽपि महेन्द्रेण यत्कृतं ब्राह्मणर्षभ ।
निष्पादितं स्वकं कार्यं तन्मे व्याख्यातुमर्हसि ॥ १
पुलस्त्य उवाच ।
श्रूयतां यन्महेन्द्रेण मलये पर्वतोत्तमे ।
कृतं लोकहितं ब्रह्मन्नात्मनश्च तथा हितम् ॥ २
अन्धासुरस्यानुचरा मयतारपुरोगमाः ।
ते निर्जिताः सुरगणैः पातालगमनोत्सुकाः ॥ ३
ददृशुर्मलयं शैलं सिद्धाध्युषितकन्दरम् ।
लतावितानसंछन्नं मत्तसत्त्वसमाकुलम् ॥ ४
चन्दनैरुरगाक्रान्तैः सुशीतैरभिसेवितम् ।
माधवीकुसुमामोदं ऋष्यर्चितहरं गिरिम् ॥ ५
तं दृष्ट्वा शीतलच्छायं श्रान्ता व्यायामकर्षिताः ।
मयतारपुरोगास्ते निवासं समरोचयन् ॥ ६
तेषु तत्रोपविष्टेषु प्राणतृप्तिप्रदोऽनिलः ।
ववावति शीतः शनकैर्दक्षिणो गन्धसंयुतः ॥ ७

अपनी भक्ति से भृङ्गी बना दिया। (९५)
हे महर्षि ! मैंने आपसे हर की कीर्ति को बढ़ाने वाला यह पुण्य पवित्र एवं शुभद आख्यान कहा। धर्म, आयु, आरोग्य एवं धन को चाहने वालों को श्रेष्ठ द्विजों में सदा इसका कीर्तन करना चाहिए। (९६)

श्रीवामनपुराण में चँवालीसवाँ अध्याय समाप्त ॥४४॥

४५

नारद ने कहा—हे द्विजश्रेष्ठ ! महेन्द्र ने मलयपर्वत पर भी अपना जो कार्य सम्पन्न किया उसे आप मुझसे कहिये। (१)

पुलस्त्य ने कहा—हे ब्रह्मन् ! महेन्द्र ने श्रेष्ठ मलयपर्वत पर संसार के हित तथा अपने कल्याण के लिए जो कार्य किया था, उसे सुनिये। (२)

मय, तार आदि अन्धकासुर के अनुचर असुर देवताओं से पराजित होकर पाताल जाने की इच्छा करने लगे। (३)

उन लोगों ने सिद्धों द्वारा सेवित कन्दराओं वाले, लता-वितान से आच्छन्न मत्त प्राणियों से परिपूर्ण, सुशीतल सर्पों से आक्रान्त चन्दन से युक्त तथा माधवीकुसुम के आमोद से पूर्ण ऋषियों से अर्चित हर के मलय गिरि को देखा। (४-५)
व्यायाम से क्षीण एवं शिथिल मय, तार आदि दानवों ने शीतल छायावाले उस पर्वत को देख कर वहाँ निवास करने की इच्छा की। (६)
उन लोगों के वहाँ बैठने पर प्राणों को तृप्ति प्रदान करने वाला सुगन्धपूर्ण तथा शीतल दक्षिण वायु मन्दगति से प्रवाहित होने लगा। (७)

तत्रैव च रतिं चक्रुः सर्व एव महासुराः।
कुर्वन्तो लोकसंपूज्ये विद्वेषं देवतागणे ॥ ८
तान्ज्ञात्वा शंकरः शक्रं प्रेषयन्मलयेऽसुरान्।
स चापि ददृशे गच्छन् पथि गोमातरं हरिः ॥ ९
तस्याः प्रदक्षिणां कृत्वा दृष्ट्वा शैलं च सुप्रभम्।
ददृशे दानवान् सर्वान् संहृष्टान् भोगसंयुतान् ॥ १०
अथाजुहाव बलहा सर्वानेव महासुरान्।
ते चाप्याययुरव्यग्रा निकिरन्तः शरोत्करान् ॥ ११
तानागतान् बाणजालैः रथस्थोऽद्भुतदर्शनः।
छादयामास विप्रर्षे गिरीन् वृष्ट्या यथा घनः ॥ १२
ततो बाणैरवच्छाद्य मयादीन् दानवान् हरिः।
पाकं जघान तीक्ष्णाग्रैर्मार्गणैः कङ्कवाससैः ॥ १३
तत्र नाम विभुर्लेभे शासनत्वात् शरैर्दृढैः।
पाकशासनतां शक्रः सर्वामरपतिर्विभुः ॥ १४
तथाऽन्य पुरनामानं बाणासुरसुतं शरैः।
सुपुङ्खैर्दारयामास ततोऽभूत् स पुरंदरः ॥ १५
हत्वेत्थं समरेऽजैषीद् गोत्रभिद् दानवं बलम्।
तच्चापि विजितं ब्रह्मन् रसातलमुपागमत् ॥ १६
एतदर्थं सहस्राक्षः प्रेषितो मलयाचलम्।
त्र्यम्बकेन मुनिश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥ १७

नारद उवाच।

किमर्थं दैवतपतिर्गोत्रभित् कथ्यते हरिः।
एष मे संशयो ब्रह्मन् हृदि संपरिवर्तते ॥ १८

पुलस्त्य उवाच।

श्रूयतां गोत्रभिच्छक्रः कीर्तितो हि यथा मया।
हते हिरण्यकशिपौ यच्चकारारिमर्दनः ॥ १९
दितिर्विनष्टपुत्रा तु कश्यपं प्राह नारद।
विभो नाथोऽसि मे देहि शक्रहन्तारमात्मजम् ॥ २०
कश्यपस्तामुवाचाथ यदि त्वमसितेक्षणे।
शौचाचारसमायुक्ता रक्षयसे दशतीर्दश ॥ २१

लोक-पूज्य देवताओं से विद्वेष करते हुए सभी श्रेष्ठ असुर सुखपूर्वक वहीं रहने लगे। (८)

उन असुरों को मलय पर्वत पर जानकर शङ्कर ने इन्द्र को वहाँ भेजा। इन्द्र ने जाते हुए मार्ग में गोमाता को देखा। (९)

उसकी प्रदक्षिणा करने के उपरान्त उन्होंने प्रभा सम्पन्न पर्वत पर भोगसंयुत तथा प्रसन्न समस्त दानवों को देखा। (१०)

तदनन्तर इन्द्र ने सभी महासुरों को ललकारा। वे भी बिना व्यग्रता के बाणों की वर्षा करते हुए आए। (११)

हे विप्रर्षि! रथासीन अद्भुत दिखायी पड़ने वाले इन्द्र ने आये हुए उन दानवों को बाणजाल से इस प्रकार आच्छादित कर दिया जैसे मेघ वृष्टि से पर्वतों को आच्छादित करता है। (१२)

निकटस्थ यमुना के प्रसिद्ध तीर्थ में स्नानोपरान्त वटेश्वर रुद्र एवं योगशायी माधव का दर्शन एवं भक्तिपूर्वक उन दोनों पूज्यों का पूजन कर उन महासुर ने माघमास में वहाँ निवास किया। तदनन्तर वे वाराणसी गए। (२८-२९)

तदनन्तर असी और वरणा के सर्वपापहारीविभिन्न तीर्थों में स्नानोपरान्त पितरों एवं देवों का पूजन कर उन्होंने पुरी की प्रदक्षिणा की। तदनन्तर अविमुक्तेश्वर एवं केशव की पूजा तथा लोलार्क का दर्शन कर वे मधुवन चले गए। (३०-३१)

महातेजस्वी असुरश्रेष्ठ प्रह्लाद वहाँ स्वयम्भू देव का दर्शन एवं पूजन कर पुष्करारण्य में गए। (३२)

उन तीनों तीर्थों में स्नान करने के उपरान्त पितरों एवं देवों का अर्चन कर उन्होंने अयोगन्धि पुष्कराक्ष तथा ब्रह्मा का पूजन किया। (३३)

तदनन्तर सरस्वती के तीर पर स्थित त्रैलोक्यविश्रुत कोटितीर्थ में उन्होंने रुद्रकोटि वृषभध्वज का दर्शन किया। (३४)

नैमिषेया द्विजवरा मागधेयाः ससैन्धवाः ।
धर्मारण्याः पौष्करेया दण्डकारण्यकास्तथा ॥ ३५
चाम्पेया भारुकच्छेया देविकातीरगाश्च ये ।
ते तत्र शंकरं द्रष्टुं समायाता द्विजातयः ॥ ३६
कोटिसंख्यास्तपःसिद्धा हरदर्शनलालसाः ।
अहं पूर्वमहं पूर्वमित्येवं वादिनो मुने ॥३७
तान् संक्षुब्धान् हरो दृष्ट्वा महर्षीन् दग्धकिल्बिषान् ।
तेषामेवानुकम्पार्थं कोटिमूर्तिरभूद् भवः ॥ ३८
ततस्ते मुनयः प्रीताः सर्व एव महेश्वरम् ।
संपूजयन्तस्तस्थुर्वै तीर्थं कृत्वा पृथक् पृथक् ।
इत्येवं रुद्रकोटीति नाम्ना शंभुरजायत ॥ ३९
तं ददर्श महातेजाः प्रह्लादो भक्तिमान् वशी ।
कोटितीर्थे ततः स्नात्वा तर्पयित्वा वसून् पितॄन् ।
रुद्रकोटिं समभ्यर्च्य जगाम कुरुजाङ्गलम् ॥ ४०
तत्र देववरं स्थाणुं शंकरं पार्वतीप्रियम् ।
सरस्वतीजले मग्नं ददर्श सुरपूजितम् ॥४१

सारस्वतेऽम्भसि स्नात्वा स्थाणुं संपूज्य भक्तितः ।
स्नात्वा दशाश्वमेधे च संपूज्य च सुरान् पितॄन् ॥ ४२
सहस्रलिङ्गं संपूज्य स्नात्वा कन्याह्रदे शुचिः ।
अभिवाद्य गुरुं शुक्रं सोमतीर्थं जगाम ह ॥ ४३
तत्र स्नात्वाऽर्च्य च पितॄन् सोमं संपूज्य भक्तितः ।
क्षीरिकावासमभ्येत्य स्नानं चक्रे महायशाः ॥ ४४
प्रदक्षिणीकृत्य तरुं वरुणं चार्च्य बुद्धिमान् ।
भूयः कुरुध्वजं दृष्ट्वा पद्माख्यां नगरीं गतः ॥ ४५
तत्रार्च्य मित्रावरुणौ भास्करौ लोकपूजितौ ।
कुमारधारामभ्येत्य ददर्श स्वामिनं वशी ॥ ४६
स्नात्वा कपिलधारायां संतर्प्यार्च्य पितॄन् सुरान् ।
दृष्ट्वा स्कन्दं समभ्यर्च्य नर्मदायां जगाम ह ॥ ४७
तस्यां स्नात्वा समभ्यर्च्य वासुदेवं श्रियः पतिम् ।
जगाम भूधरं द्रष्टुं वाराहं चक्रधारिणम् ॥ ४८

(प्राचीन समय में) नैमिषारण्य, मगध, सिन्धु प्रदेश, धर्मारण्य, पुष्कर, दण्डकारण्य, चम्पा, भरुकच्छ एवं देविकातीर निवासी श्रेष्ठ ब्राह्मण वहाँ शङ्कर का दर्शन करने आये। (३५-३६)

हे मुनि! शिव के दर्शन इच्छा वाले करोड़ों सिद्ध तपस्वी 'मैं पहले दर्शन करूँगा' 'मैं पहले दर्शन करूँगा' इस विवाद करने लगे। (३७)

उन पापरहित महर्षियों को संक्षुब्ध हुआ देखकर शङ्कर ने उन पर अनुकम्पा कर कोटि मूर्त्तियाँ धारण कीं। (३८)

तदनन्तर वे सभी मुनि प्रसन्नतापूर्वक पृथक्-पृथक् तीर्थ बनाकर महेश्वर की पूजा करते हुए रहने लगे। इस प्रकार शम्भु का नाम रुद्रकोटि हुआ। (३९)

महातेजस्वी भक्तिमान् जितेन्द्रिय प्रह्लाद ने उनका दर्शन किया एवं कोटितीर्थ में स्नान कर वसुओं एवं पितरों का अर्चन तथा रुद्रकोटि का पूजन कर वे कुरुजाङ्गल में चले गए। (४०)

उन्होंने वहाँ सरस्वती के जल में मग्न सुरपूजित पार्वतीप्रिय स्थाणु शङ्कर का दर्शन किया। (४१)

सरस्वती के जल में स्नान कर उन्होंने भक्तिपूर्वक स्थाणु की पूजा की तथा दशाश्वमेध में स्नान कर देवों एवं पितरों का पूजन किया। (४२)

कन्याह्रद में स्नान करने के पश्चात् पवित्र होकर उन्होंने सहस्रलिङ्ग का पूजन किया एवं (शुक्रतीर्थ में) गुरु शुक्राचार्य को प्रणाम कर वे सोमतीर्थ चले गये। (४३)

वहाँ स्नान कर भक्तिपूर्वक पितरों एवं सोम का पूजन कर वे महायशस्वी क्षीरिकावास में जाकर वहाँ स्नान किये। (४४)

वहाँ के वृक्ष की प्रदक्षिणा कर तथा वरुण की पूजा करने के बाद बुद्धिमान् प्रह्लाद पुनः कुरुध्वज का दर्शन कर पद्मा नामक नगरी में गये। (४५)

वहाँ लोकपूजित तेजस्वी मित्रावरुण का अर्चन करने के उपरान्त कुमारधारा में जाकर जितेन्द्रिय प्रह्लाद ने स्वामी का दर्शन किया। (४६)

कपिलधारा में स्नान कर पितृतर्पण, देवपूजन एवं स्कन्द का दर्शन एवं अर्चन कर वे नर्मदा के समीप गए। (४७)

उसमें स्नान तथा लक्ष्मीपति वासुदेव की पूजा कर वे चक्रधारी भूधर वाराह देव का दर्शन करने गये। (४८)

स्नात्वा कोकामुखे तीर्थे संपूज्य धरणीधरम् ।
त्रिसौवर्णं महादेवमर्बुदेशं जगाम ह ॥ ४९
तत्र नारीहृदे स्नात्वा पूजयित्वा च शंकरम् ।
कालिञ्जरं समभ्येत्य नीलकण्ठं ददर्श सः ॥ ५०
नीलतीर्थजले स्नात्वा पूजयित्वा ततः शिवम् ।
जगाम सागरानूपे प्रभासे द्रष्टुमीश्वरम् ॥ ५१
स्नात्वा च संगमे नद्याः सरस्वत्यार्णवस्य च ।
सोमेश्वरं लोकपतिं ददर्श स कपर्दिनम् ॥ ५२
यो दक्षशापनिर्दग्धः क्षयी ताराधिपः शशी ।
आप्यायितः शङ्करेण विष्णुना सकपर्दिना ॥ ५३
तावर्च्य देवप्रवरौ प्रजगाम महालयम् ।
तत्र रुद्रं समभ्यर्च्य प्रजगामोत्तरान् कुरून् ॥ ५४
पद्मनाभं स तत्रार्च्य सप्तगोदावरं ययौ ।
तत्र स्नात्वाऽर्च्य विश्वेशं भीमं त्रैलोक्यवन्दितम् ॥ ५५
गत्वा दारुवने श्रीमान् लिङ्गं स ददर्श ह ।
तमर्च्य ब्राह्मणीं गत्वा स्नात्वाऽर्च्य त्रिदशेश्वरम् ॥५६
प्लक्षावतरणं गत्वा श्रीनिवासमपूजयत् ।
ततश्च कुण्डिनं गत्वा संपूज्य प्राणतृप्तिदम् ॥ ५७
शूर्पारके चतुर्बाहुं पूजयित्वा विधानतः ।
मागधारण्यमासाद्य ददर्श वसुधाधिपम् ॥ ५८
तमर्चयित्वा विश्वेशं स जगाम प्रजामुखम् ।
महातीर्थे ततः स्नात्वा वासुदेवं प्रणम्य च ॥ ५९
शोणं संप्राप्य संपूज्य रुक्मवर्माणमीश्वरम् ।
महाकोश्यां महादेवं हंसाख्यं भक्तिमानथ ॥ ६०
पूजयित्वा जगामाथ सैन्धवारण्यमुत्तमम् ।
तत्रेश्वरं सुनेत्राख्यं शङ्खशूलधरं गुरुम् ॥
पूजयित्वा महाबाहुः प्रजगाम त्रिविष्टपम् ॥ ६१
तत्र देवं महेशानं जटाधरमिति श्रुतम् ।
तं दृष्ट्वाऽर्च्य हरिं चासौ तीर्थं कनखलं ययौ ॥ ६२
तत्रार्च्य भद्रकालीशं वीरभद्रं च दानवः ।

कोकामुख तीर्थ में स्नान और धरणीधर की पूजा कर वे अर्बुदेश त्रिसौवर्ण महादेव के पास गये। (४९)

वहाँ नारीह्रद में स्नान तथा शङ्कर की पूजा करने के उपरान्त कालिञ्जर में आकर उन्होंने नीलकण्ठ का दर्शन किया। (५०)

नीलतीर्थ के जल में स्नान करने के उपरान्त शिव का पूजन कर वे समुद्र के किनारे प्रभासतीर्थ में भगवान् का दर्शन करने गए। (५१)

वहाँ सरस्वती नदी और सागर के संगम में स्नान कर उन्होंने लोकपति कपर्दी सोमेश्वर का दर्शन किया। (५२)

कपर्दी शङ्कर एवं विष्णु ने दक्ष के शाप से दग्ध एवं क्षय रोगग्रस्त ताराधिप चन्द्रमा को पूर्ण किया था। (५३)

उन दोनों श्रेष्ठ देवों का अर्चन कर वे महालय गए। वहाँ रुद्र का पूजन कर वे उत्तरकुरु गए। (५४)

वहाँ पद्मनाभ का पूजन कर वे सप्तगोदावर तीर्थ में गए। वहाँ स्नानोपरान्त उन्होंने त्रैलोक्यवन्दित भीम विश्वेश्वर का अर्चन किया। (५५)

दारुवन में जाकर श्रीमान् प्रह्लाद ने लिङ्ग का दर्शन किया। उनकी पूजा करने के उपरान्त ब्राह्मणी (नदी) में जाकर उन्होंने स्नान और त्रिदशेश्वर महादेव की पूजा की। (५६)

तदनन्तर प्लक्षावतरण में जाकर उन्होंने श्रीनिवास की पूजा की। तत्पश्चात् कुण्डिन में जाकर प्राणों को तृप्ति देने वाले देव का अर्चन किया। (५७)

शूर्पारक में चतुर्भुज देव की विधिवत् पूजा कर मागधारण्य में जाकर उन्होंने वसुधाधिप का दर्शन किया। (५८)

उन विश्वेश का पूजन कर वे प्रजामुख में गए। तदनन्तर महातीर्थ में स्नान कर उन्होंने वासुदेव को प्रणाम किया। (५९)

शोणतट पर जाकर उन्होंने स्वर्णकवच धारण करने वाले ईश्वर का अर्चन किया। तदनन्तर भक्तिमान् (प्रह्लाद) ने महाकोशी में हंस नामक महादेव का पूजन किया एवं श्रेष्ठ सैन्धवारण्य में जाकर शङ्ख तथा शूलधारी सुनेत्र नामक पूज्य ईश्वर का अर्चन किया। तदनन्तर वे महाबाहु त्रिविष्टप चले गए। (६०-६१)

वहाँ जटाधर नाम से प्रसिद्ध महेशान देव का दर्शन और विष्णु की पूजा कर वे कनखल तीर्थ गये। (६२)

दानव प्रह्लाद वहाँ भद्रकालीश एवं वीरभद्र तथा धनाधिप

धनाधिपं च मेधाङ्कं ययावथ गिरिव्रजम् ॥ ६३
तत्र देवं पशुपतिं लोकनाथं महेश्वरम् ।
संपूजयित्वा विधिवत्कामरूपं जगाम ह ॥ ६४
शशिप्रभं देववरं त्रिनेत्रं
संपूजयित्वा सह वै मृडान्या ।
जगाम तीर्थप्रवरं महाख्यं
तस्मिन् महादेवमपूजयत् सः ॥ ६५
ततस्त्रिकूटं गिरिमत्रिपुत्रं
जगाम द्रष्टुं स हि चक्रपाणिनम् ।
तमीड्य भक्त्या तु गजेन्द्रमोक्षणं
जजाप जप्यं परमं पवित्रम् ॥ ६६
तत्रोष्य दैत्येश्वरसूनुरादरा-
न्मासत्रयं मूलफलाम्बुभक्षी ।
निवेद्य विप्रप्रवरेषु काञ्चनं
जगाम घोरं स हि दण्डकं वनम् ॥ ६७
तत्र दिव्यं महाशाखं वनस्पतिवपुर्धरम् ।
ददर्श पुण्डरीकाक्षं महाश्वापदवारणम् ॥ ६८
तस्याधस्थात् त्रिरात्रं स महाभागवतोऽसुरः ।
स्थितः स्थण्डिलशायी तु पठन् सारस्वतं स्तवम् ॥ ६९
तस्मात् तीर्थवरं विद्वान् सर्वपापप्रमोचनम् ।
जगाम दानवो द्रष्टुं सर्वपापहरं हरिम् ॥ ७०
तस्याग्रतो जजापासौ स्तवौ पापप्रणाशनौ ।
यौ पुरा भगवान् प्राह क्रोडरूपी जनार्दनः ॥ ७१
तस्मादथागाद् दैत्येन्द्रः शालग्रामं महाफलम् ।
यत्र संनिहितो विष्णुश्चरेषु स्थावरेषु च ॥ ७२
तत्र सर्वगतं विष्णुं मत्वा चक्रे रतिं बली ।
पूजयन् भगवत्पादौ महाभागवतो मुने ॥ ७३
इयं तवोक्ता मुनिसंघजुष्टा
प्रह्लादतीर्थानुगतिः सुपुण्या ।
यत्कीर्तनाच्छ्रवणात् स्पर्शनाच्च
विमुक्तपापा मनुजा भवन्ति ॥ ७४

इति श्रीवामनपुराणे सप्तपञ्चाशोऽध्यायः ॥५७॥

मेधाङ्क की अर्चना कर गिरिव्रज गए। (६३)

वहाँ विधिवत् लोकनाथ महेश्वर पशुपति देव का पूजन कर वे कामरूप गए। (६४)

वहाँ चन्द्र की काँति से युक्त देवश्रेष्ठ त्रिनेत्र शङ्कर की मृडानी (पार्वती) के साथ विधिवत् पूजा कर प्रह्लाद श्रेष्ठ महाख्य तीर्थ में गये और वहाँ पर उन्होंने महादेव की पूजा की। (६५)

तदनन्तर अत्रिपुत्र चक्रपाणि विष्णु के दर्शनार्थ वे त्रिकूट पर्वत पर गये और भक्ति पूर्वक उनकी अर्चना कर उन्होंने परम पवित्र जपने योग्य गजेन्द्रमोक्षण स्तव का पाठ किया। (६६)

मूल, फल एवं जल का भक्षण करते हुए दैत्येश्वर पुत्र प्रह्लाद ने वहाँ तीन मास तक आदर पूर्वक निवास किया। तदनन्तर श्रेष्ठ ब्राह्मणों को सुवर्ण दान कर वे घोर दण्डक वन चले गए। (६७)

उन्होंने वहाँ महान् हिंस्र पशुओं के निवारक, महान् शाखाओं से युक्त वनस्पतिशरीरधारी पुण्डरीकाक्ष का दर्शन किया। (६८)

सारस्वत स्तोत्र का पाठ करते हुए महान् विष्णुभक्त असुर प्रह्लाद ने तीन रात्रि पर्यन्त उसके नीचे आस्तरणहीन चबूतरे पर शयन किया। (६९)

विद्वान् दानव (प्रह्लाद) वहाँ से सर्वपापहारी हरि का दर्शन करने सर्वपापनाशक श्रेष्ठ तीर्थ में गए। (७०)

उन्होंने उनके सम्मुख प्राचीनकाल में क्रोडरूपी जनार्दन से कहे गए पापनाशक दो स्तोत्रों का पाठ किया। (७१)

तदनन्तर वहाँ से दैत्येन्द्र (प्रह्लाद) महाफलदायक शालग्राम तीर्थ में गये। विष्णु वहाँ समस्त चर और स्थावर पदार्थों में विराजमान हैं। (७२)

हे मुने ! वहाँ महान् विष्णुभक्त बलवान् प्रह्लाद विष्णु को सर्वगत जानकर भगवान् के चरणों की पूजा करते हुए उनमें अनुरक्त हुए। (७३)

मैंने तुमसे मुनियों के समूहों से सेवित अत्यन्त पवित्र प्रह्लाद की तीर्थयात्रा का वर्णन किया। इनके कीर्तन, श्रवण एवं स्पर्श से मनुष्य पापरहित हो जाते हैं। (७४)

श्रीवामनपुराण में सत्तावनवाँ अध्याय समाप्त ॥ ५७ ॥

५८

नारद उवाच ।
यान् जप्यान् भगवद्भक्त्या प्रह्लादो दानवोऽजपत् ।
गजेन्द्रमोक्षणादींस्तु चतुरस्तान् वदस्व मे ॥ १

पुलस्त्य उवाच ।
शृणुष्व कथयिष्यामि जप्यानेतांस्तपोधन ।
दुःस्वप्ननाशो भवति यैरुक्तैः संश्रुतैः स्मृतैः ॥ २
गजेन्द्रमोक्षणं त्वादौ शृणुष्व तदनन्तरम् ।
सारस्वतं ततः पुण्यौ पापप्रशमनौ स्तवौ ॥ ३
सर्वरत्नमयः श्रीमांस्त्रिकूटो नाम पर्वतः ।
सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः ॥ ४
क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः ।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः ॥ ५
अप्सरोभिः परिवृतः श्रीमान् प्रस्रवणाकुलः ।
गन्धर्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः ॥ ६
विद्याधरैः सपत्नीकैः संयतैश्च तपस्विभिः ।
वृकद्वीपिगजेन्द्रैश्च वृतगात्रो विराजते ॥ ७
पुन्नागैः कर्णिकारैश्च बिल्वामलकपाटलैः ।
चूतनीपकदम्बैश्च चन्दनागुरुचम्पकैः ॥ ८
शालैस्तालैस्तमालैश्च सरलार्जुनपर्पटैः ।
तथान्यैर्विविधैर्वृक्षैः सर्वतः समलंकृतः ॥ ९
नानाधात्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः ।
शोभितो रुचिरप्रख्यैस्त्रिभिर्विस्तीर्णसानुभिः ॥ १०
मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः ।
जीवंजीवकसंघुष्टैश्चकोरशिखिनादितैः ॥ ११
तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः ।
नानापुष्पसमाकीर्णं नानागन्धाधिवासितम् ॥ १२
द्वितीयं राजतं शृङ्गं सेवते यं निशाकरः ।

५८

नारद ने कहा—दानव प्रह्लाद ने भगवद्भक्तिपूर्वक जिन गजेन्द्रमोक्षणादि जपनीय स्तोत्रों का जप किया था उन चार जपों को आप मुझे बतलायें। (१)

पुलस्त्य ने कहा—हे तपोधन! मैं उन स्तोत्रों का वर्णन करता हूँ, आप सुनें। इनके कहने, सुनने और स्मरण करने से दुःस्वप्नों का नाश होता है। (२)

प्रथम गजेन्द्रमोक्षण स्तोत्र सुनिए। तदनन्तर सारस्वत स्तोत्र एवं तत्पश्चात् दो पवित्र पापप्रशमन स्तवों का वर्णन करूँगा। (३)

सर्वरत्नमय सुन्दर त्रिकूट नामक पर्वत, सूर्य के समान प्रभावाले पर्वतराज सुमेरु का पुत्र है। (४)

क्षीरसागर के जलतरङ्गों से प्रक्षालित निर्मल शिलातलवाला यह पर्वत समुद्र का भेदन कर ऊपर निकला है एवं देवता और ऋषिगण वहाँ सर्वदा निवास करते हैं। (५)

अप्सराओं से परिवृत, झरनों से परिपूर्ण, गन्धर्वों, किन्नरों, यक्षों, सिद्धों, चारणों, पन्नगों, पत्नीयुक्त विद्याधरों, संयमी तपस्वियों और वृक, व्याघ्र एवं गजेन्द्रों से आवृतशरीर वाला वह श्रीमान् पर्वत अत्यन्त सुशोभित होता है। (६-७)

पुन्नाग, कर्णिकार, बिल्व, आमलक, पाटल, आम्र, नीप, कदम्ब, चन्दन, अगुरु, चम्पक, शाल, ताल, तमाल, सरल, अर्जुन, पर्पट एवं अन्य अनेक प्रकार के वृक्षों से यह पर्वत पूर्णतया अलङ्कृत है। (८-९)

वह पर्वत अनेक प्रकार के धातुओं से अङ्कित चोटियों, चारों ओर से बहने वाले झरनों और अत्यन्त रुचिर तथा विस्तृत तीन शिखरों से शोभित है। (१०)

यह पर्वत निरन्तर मृग, वानर, सिंह, मदमत्त हाथी, चातक, चकोर एवं मयूर आदि के शब्दों से निनादित होता रहता है। (११)

अनेक प्रकार के पुष्पों से व्याप्त एवं विविध सुगन्धों से सुवासित उसके एक सुवर्णमय शृङ्ग का सूर्य सेवन करते हैं। (१२)

शुक्लवर्ण मेघ की तरह एवं तुषार-समूह-सदृश उसके

पाण्डुराम्बुदसंकाशं तुषारचयसंनिभम् ॥ १३
वज्रेन्द्रनीलवैदूर्यतेजोभिर्भासयन् दिशः ।
तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम् ॥ १४
न तत्कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ।
नातप्ततपसो लोके ये च पापकृतो जनाः ॥ १५
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम् ।
कारण्डवसमाकीर्णं राजहंसोपशोभितम् ॥ १६
कुमुदोत्पलकह्लारैः पुण्डरीकैश्च मण्डितम् ।
कमलैः शतपत्रैश्च काञ्चनैः समलङ्कृतम् ॥ १७
पत्रैर्मरकतप्रख्यैः पुष्पैः काञ्चनसंनिभैः ।
गुल्मैः कीचकवेणूनां समन्तात् परिवेष्टितम् ॥ १८
तस्मिन् सरसि दुष्टात्मा विरूपोऽन्तर्जलेशयः ।
आसीद् ग्राहो गजेन्द्राणां रिपुराकेकरेक्षणः ॥ १९
अथ दन्तोज्ज्वलमुखः कदाचिद् गजयूथपः ।
मदस्रावी जलाकाङ्क्षी पादचारीव पर्वतः ॥ २०
वासयन्मदगन्धेन गिरिमैरावतोपमः ।
गजो ह्यञ्जनसंकाशो मदाचलितलोचनः ॥ २१
तृषितः पातुकामोऽसौ अवतीर्णश्च तज्जलम् ।
सलीलः पङ्कजवने यूथमध्यगतश्चरन् ॥ २२
गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्तिना ।
पश्यन्तीनां करेणूनां क्रोशन्तीनां च दारुणम् ॥ २३
ह्रियते पङ्कजवने ग्राहेणातिबलीयसा ।
वारुणैः संयतः पाशैर्निष्प्रयत्नगतिः कृतः ॥ २४
वेष्टयमानः सुघोरैस्तु पाशैर्नागो दृढैस्तथा ।
विस्फूर्य च यथाशक्ति विक्रोशंश्च महारवान् ॥ २५
व्यथितः स निरुत्साहो गृहीतो घोरकर्मणा ।
परमापदमापन्नो मनसाऽचिन्तयद्धरिम् ॥ २६
स तु नागवरः श्रीमान् नारायणपरायणः ।
तमेव शरणं देवं गतः सर्वात्मना तदा ॥ २७
एकात्मा निगृहीतात्मा विशुद्धेनान्तरात्मना ।
जन्मजन्मान्तराभ्यासात् भक्तिमान् गरुडध्वजे ॥ २८
नान्यं देवं महादेवात् पूजयामास केशवात् ।

दूसरे रजतमय शृङ्ग का सेवन चन्द्रमा करते हैं। (१३)

हीरा, इन्द्रनील, वैदूर्य आदि रत्नों की ज्योति से दिशाओं को प्रकाशित करने वाला उसका अत्यन्त उत्तम तृतीय शृङ्ग ब्रह्मा का निवास स्थान है। (१४)

कृतघ्न, क्रूर, नास्तिक, तपस्या से हीन एवं लोक में पापकर्म करने वाले मनुष्य उसे नहीं देख सकते। (१५)

उस पर्वत के पृष्ठभाग में सुवर्णकमलों से युक्त, कारण्डवों से आकीर्ण, राजहंसों से सुशोभित, कुमुद, उत्पल, कह्लार, पुण्डरीक आदि नानाजातीय कमलों से मण्डित, शतपत्रों वाले सुवर्ण कमलों से अलंकृत तथा मरकत के सदृश पत्रों वाले काञ्चन के समान पुष्पों एवं कीचक नामक बाँस के गुल्मों से चारों ओर से परिवेष्टित एक सरोवर है। (१६-१८)

उस सरोवर में जल में गजेन्द्रों का शत्रु एक कुरूप दुरात्मा अर्धनिमीलित नेत्रोंवाला ग्राह रहता था। (१९)

एक समय दाँतों से उज्ज्वल मुखवाला, मदस्रावयुक्त, जलाभिलाषी, पादचारी पर्वत तुल्य, ऐरावत के सदृश, अञ्जन-तुल्य, मद के कारण चञ्चल नेत्रों वाला, तृषायुक्त एक गजयूथपति अपने मद की सुगन्ध से पर्वत को सुवासित करते हुए जल पीने की इच्छा से उस सरोवर के जल में उतरा एवं कमलों के समूह में अपने झुण्ड के साथ क्रीडा करने लगा। (२०-२२)

प्रच्छन्न शरीर वाले ग्राह ने उसे पकड़ लिया। करुण रूप से आर्तनाद कर रही हथिनियों के देखते ही देखते अतिबलवान् ग्राह उसे पङ्कजवन में खींच ले गया एवं वरुण के पाशों से बाँधकर उसे निष्प्रयत्न तथा गतिहीन कर दिया। (२३-२४)

वह गजराज दृढ और भयङ्कर पाशों से आबद्ध हो जाने के कारण यथाशक्ति फड़फड़ाकर ऊँचे स्वर से चीत्कार करने लगा। (२५)

क्रूर कर्म वाले (उस ग्राह) के द्वारा पकड़े जाने पर वह व्यथित तथा निरुत्साह हो गया। अत्यन्त विपत्ति में पड़कर वह मन से भगवान् हरि का ध्यान करने लगा। (२६)

वह सुन्दर गजराज नारायण का भक्त था। अतः उस समय वह सर्वात्मना उन्हीं देव की शरण में गया। (२७)

वह हाथी जन्म-जन्मान्तर के अभ्यास से एकाग्र और संयत चित्त होकर विशुद्ध अन्तःकरण से गरुडध्वज विष्णु का भक्त हुआ। (२८)

उसने महान् देव केशव के अतिरिक्त अन्य देवता

क्षीरोदकार्णवनिकेतयशोधराय ।
नानाविचित्रमुकुटाङ्गदभूषणाय
सर्वेश्वराय वरदाय नमो वराय ॥ ४१
भक्तिप्रियाय वरदीप्तसुदर्शनाय
फुल्लारविन्दविपुलायतलोचनाय ।
देवेन्द्रविघ्नशमनोद्यतपौरुषाय
योगेश्वराय विरजाय नमो वराय ॥ ४२
ब्रह्मायनाय त्रिदशायनाय
लोकाधिनाथाय भवापनाय ।
नारायणायात्महितायनाय
महावराहाय नमस्करोमि ॥ ४३
कूटस्थमव्यक्तमचिन्त्यरूपं
नारायणं कारणमादिदेवम् ।
युगान्तशेषं पुरुषं पुराणं
तं देवदेवं शरणं प्रपद्ये ॥ ४४
योगेश्वरं चारुविचित्रमौलि-
मज्ञेयमग्र्यं प्रकृतेः परस्थम् ।
क्षेत्रज्ञमात्मप्रभवं वरेण्यं
तं वासुदेवं शरणं प्रपद्ये ॥ ४५
अदृश्यमव्यक्तमचिन्त्यमव्ययं
महर्षयो ब्रह्ममयं सनातनम् ।
वदन्ति यं वै पुरुषं सनातनं
तं देवगुह्यं शरणं प्रपद्ये ॥ ४६
यदक्षरं ब्रह्म वदन्ति सर्वगं
निशम्य यं मृत्युमुखात् प्रमुच्यते ।
तमीश्वरं तृप्तमनुत्तमैर्गुणैः
परायणं विष्णुमुपैमि शाश्वतम् ॥ ४७
कार्यं क्रिया कारणमप्रमेयं
हिरण्यबाहुं वरपद्मनाभम् ।
महाबलं वेदनिधिं सुरेशं
व्रजामि विष्णुं शरणं जनार्दनम् ॥ ४८
किरीटकेयूरमहार्हनिष्कै-
र्मण्युत्तमालङ्कृतसर्वगात्रम् ।
पीताम्बरं काञ्चनभक्तिचित्रं
मालाधरं केशवमभ्युपैमि ॥ ४९
भवोद्भवं वेदविदां वरिष्ठं
योगात्मनां सांख्यविदां वरिष्ठम् ।
आदित्यरुद्राश्विवसुप्रभावं

वरदाता एवं वरस्वरूप सर्वेश्वर को नमस्कार है। (४१)

भक्तिप्रिय, श्रेष्ठ दीप्ति से सम्पन्न, सुन्दर दिखलाई देने वाले, विकसित कमल के समान विशाल नेत्रों वाले, देवेन्द्र के विघ्नों का नाश करने के लिये पुरुषार्थ करने को उद्यत, वरस्वरूप, विरज योगेश्वर को नमस्कार है। (४२)

ब्रह्मा एवं अन्य देवों के आश्रय स्वरूप, लोकाधिनाथ, भवहर्त्ता, नारायण, आत्महित के आश्रयस्थान महावराह को नमस्कार करता हूँ। (४३)

मैं कूटस्थ, अव्यक्त, अचिन्त्य रूप वाले, कारणस्वरूप, आदिदेव नारायण, युगान्त में शेष रहने वाले पुराण पुरुष, देवाधिदेव की शरण ग्रहण करता हूँ। (४४)

मैं योगेश्वर, सुन्दर विचित्र वर्णयुक्त मुकुटधारी, अज्ञेय, सर्वश्रेष्ठ, प्रकृति के परे अवस्थित क्षेत्रज्ञ, आत्मप्रभव, वरेण्य उन वासुदेव की शरण ग्रहण करता हूँ। (४५)

ब्रह्मर्षि लोग जिसे अदृश्य, अव्यक्त, अचिन्तनीय, अव्यय, ब्रह्ममय और सनातन पुरुष कहते हैं, उन देव गुह्य की शरण ग्रहण करता हूँ। (४६)

(*ब्रह्मवेत्ता*) जिसे अक्षर एवं सर्वव्यापी ब्रह्म कहते हैं तथा जिसके श्रवण से मृत्यु के मुख से मुक्ति प्राप्त होती है मैं उसी श्रेष्ठ गुणों से युक्त, आत्मतृप्त, शाश्वत आश्रय *स्वरूप ईश्वर की शरण ग्रहण करता हूँ।* (४७)

मैं कार्य, क्रिया और कारणस्वरूप, प्रमाण से अगम्य, हिरण्यबाहु, नाभि में श्रेष्ठ कमल धारण करने वाले, महाबलशाली, वेदनिधि, सुरेश्वर जनार्दन विष्णु की शरण में जाता हूँ। (४८)

मैं किरीट, केयूर एवं अतिमूल्यवान श्रेष्ठ मणियों से *अलङ्कृत समस्त शरीर वाले, पीताम्बरधारी, स्वर्णिम पत्र रचना* से सुशोभित, माला धारण करने वाले केशव की शरण में जाता हूँ। (४९)

मैं संसार के उत्पादक, वेद के जानने वालों में श्रेष्ठ,

प्रभुं प्रपद्येऽच्युतमात्मवन्तम् ॥ ५०
श्रीवत्साङ्कं महादेवं देवगुह्यमनौपमम् ।
प्रपद्ये सूक्ष्ममचलं वरेण्यमभयप्रदम् ॥ ५१
प्रभवं सर्वभूतानां निर्गुणं परमेश्वरम् ।
प्रपद्ये मुक्तसंगानां यतीनां परमां गतिम् ॥ ५२
भगवन्तं गुणाध्यक्षमक्षरं पुष्करेक्षणम् ।
शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम् ॥ ५३
त्रिविक्रमं त्रिलोकेशं सर्वेषां प्रपितामहम् ।
योगात्मानं महात्मानं प्रपद्येऽहं जनार्दनम् ॥ ५४
आदिदेवमजं शंभुं व्यक्ताव्यक्तं सनातनम् ।
नारायणमणीयांसं प्रपद्ये ब्राह्मणप्रियम् ॥ ५५
नमो वराय देवाय नमः सर्वसहाय च ।
प्रपद्ये देवदेवेशमणीयांसमणोः सदा ॥ ५६
एकाय लोकतत्त्वाय परतः परमात्मने ।
नमः सहस्रशिरसे अनन्ताय महात्मने ॥ ५७
त्वामेव परमं देवमृषयो वेदपारगाः ।
कीर्तयन्ति च यं सर्वे ब्रह्मादीनां परायणम् ॥ ५८
नमस्ते पुण्डरीकाक्ष भक्तानामभयप्रद ।
सुब्रह्मण्य नमस्तेऽस्तु त्राहि मां शरणागतम् ॥ ५९

पुलस्त्य उवाच ।

भक्तिं तस्यानुसंचिन्त्य नागस्यामोघसंभवः ।
प्रीतिमानभवद् विष्णुः शङ्खचक्रगदाधरः ॥ ६०
सान्निध्यं कल्पयामास तस्मिन् सरसि केशवः ।
गरुडस्थो जगत्स्वामी लोकाधारस्तपोधनः ॥ ६१
ग्राहग्रस्तं गजेन्द्रं तं तं च ग्राहं जलाशयात् ।
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः ॥ ६२
स्थलस्थं दारयामास ग्राहं चक्रेण माधवः ।
मोक्षयामास नागेन्द्रं पाशेभ्यः शरणागतम् ॥ ६३
स हि देवलशापेन हूहूर्गन्धर्वसत्तमः ।
ग्राहत्वमगमत् कृष्णाद् वधं प्राप्य दिवं गतः ॥ ६४

योगात्माओं तथा सांख्यज्ञों में श्रेष्ठ, आदित्य, रुद्र, अश्विनीकुमार एवं वसुओं के प्रभाव से युक्त, अच्युत, आत्मस्वरूप प्रभु की शरण ग्रहण करता हूँ। (५०)

मैं श्रीवत्स चिह्न धारण करने वाले, महान् देव, देवताओं में गुह्य, उपमा रहित, सूक्ष्म, अचल तथा अभय देनेवाले वरेण्य देव की शरण ग्रहण करता हूँ। (५१)

मैं समस्त प्राणियों के उत्पादक, निर्गुण, निःसङ्ग यतियों की परम गति स्वरूप परमेश्वर की शरण ग्रहण करता हूँ। (५२)

मैं गुणाध्यक्ष, अक्षर, पद्मलोचन, आश्रयणीय, शरण देने वाले भक्तवत्सल भगवान् की भक्तिपूर्वक शरण ग्रहण करता हूँ। (५३)

मैं त्रिविक्रम, त्रिलोकेश्वर, सभी के प्रपितामह, योगात्मा, महात्मा जनार्दन की शरण ग्रहण करता हूँ। (५४)

मैं आदिदेव, अजन्मा, शम्भु, व्यक्ताव्यक्तस्वरूप, सनातन, परम सूक्ष्म, ब्राह्मणप्रिय नारायण की शरण ग्रहण करता हूँ। (५५)

श्रेष्ठ देव को नमस्कार है। सर्वशक्तिमान् को नमस्कार है। मैं सदा सूक्ष्म से सूक्ष्म देवदेवेश का शरणागत हूँ। (५६)

लोकतत्त्वस्वरूप, एकमात्र, परात्पर परमात्मा, सहस्रशीर्ष महात्मा अनन्त को नमस्कार है। (५७)

वेदपारगामी ऋषिगण आपको ही परम देव एवं ब्रह्मादि देवों का आश्रयस्थान कहते हैं। (५८)

हे पुण्डरीकाक्ष! हे भक्तों के अभयदाता! आपको नमस्कार है। हे सुब्रह्मण्य! आपको नमस्कार है। आप मुझ शरणागत की रक्षा करें। (५९)

पुलस्त्य ने कहा—शङ्ख-चक्र एवं गदा धारण करने वाले अमोघसम्भव विष्णु उस गजेन्द्र की भक्ति का विचार कर प्रसन्न हो गए। (६०)

तदनन्तर लोकाधार जगत्स्वामी तपोधन केशव गरुड़ पर सवार होकर उस सरोवर के समीप गये। (६१)

अप्रमेयात्मा मधुसूदन ने ग्राह से ग्रस्त उस गजेन्द्र तथा उस ग्राह को वेगपूर्वक जलाशय से बाहर निकाला। (६२)

माधव ने पृथ्वी पर स्थित ग्राह को चक्र द्वारा विदीर्ण कर शरणागत गजेन्द्र को पाशों से मुक्त किया। (६३)

देवल के शाप से ग्राह बना हुआ गन्धर्वश्रेष्ठ हूहू कृष्ण से मृत्यु पाकर स्वर्ग चला गया। (६४)

गजोऽपि विष्णुना स्पृष्टो जातो दिव्यवपुः पुमान् ।
आपद्विमुक्तौ युगपद् गजगन्धर्वसत्तमौ ॥ ६५
प्रीतिमान् पुण्डरीकाक्षः शरणागतवत्सलः ।
अभवत् स च देवेशस्ताभ्यां चैव प्रपूजितः ॥ ६६
इदं च भगवान् योगी गजेन्द्रं शरणागतम् ।
प्रोवाच मुनिशार्दूल मधुरं मधुसूदनः ॥ ६७

श्रीभगवानुवाच ।

यो मां त्वाञ्च सरश्चैव ग्राहस्य च विदारणम् ।
गुल्मकीचकरेणूनां रूपं मेरोः सुतस्य च ॥ ६८
अश्वत्थं भास्करं गङ्गां नैमिषारण्यमेव च ।
संस्मरिष्यन्ति मनुजाः प्रयताः स्थिरबुद्धयः ॥ ६९
कीर्तयिष्यन्ति भक्त्या च श्रोष्यन्ति च शुचिव्रताः ।
दुःस्वप्नो नश्यते तेषां सुस्वप्नश्च भविष्यति ॥ ७०
मात्स्यं कौर्मञ्च वाराहं वामनं तार्क्ष्यमेव च ।
नारसिंहं च नागेन्द्रं सृष्टिप्रलयकारकम् ॥ ७१
एतानि प्रातरुत्थाय संस्मरिष्यन्ति ये नराः ।
सर्वपापैः प्रमुच्यन्ते पुण्यं लोकमवाप्नुयुः ॥ ७२

पुलस्त्य उवाच ।

एवमुक्त्वा हृषीकेशो गजेन्द्रं गरुडध्वजः ।
स्पर्शयामास हस्तेन गजं गन्धर्वमेव च ॥ ७३
ततो दिव्यवपुर्भूत्वा गजेन्द्रो मधुसूदनम् ।
जगाम शरणं विप्र नारायणपरायणः ॥ ७४
ततो नारायणः श्रीमान् मोक्षयित्वा गजोत्तमम् ।
पापबन्धाच्च शापाच्च ग्राहं चाद्भुतकर्मकृत् ॥ ७५
ऋषिभिः स्तूयमानश्च देवगुह्यपरायणैः ।
गतः स भगवान् विष्णुर्दुर्विज्ञेयगतिः प्रभुः ॥ ७६
गजेन्द्रमोक्षणं दृष्ट्वा देवाः शक्रपुरोगमाः ।
ववन्दिरे महात्मानं प्रभुं नारायणं हरिम् ॥ ७७
महर्षयश्चारणाश्च दृष्ट्वा गजविमोक्षणम् ।
विस्मयोत्फुल्लनयनाः संस्तुवन्ति जनार्दनम् ॥ ७८
प्रजापतिपतिर्ब्रह्मा चक्रपाणिविचेष्टितम् ।
गजेन्द्रमोक्षणं दृष्ट्वा इदं वचनमब्रवीत् ॥ ७९
य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः ।
प्राप्नुयात् परमां सिद्धिं दुःस्वप्नस्तस्य नश्यति ॥ ८०

विष्णु का स्पर्श होने से वह हाथी भी दिव्यशरीरधारी पुरुष हो गया। इस प्रकार हाथी एवं गन्धर्वश्रेष्ठ दोनों एक ही साथ आपत्ति से मुक्त हो गए। (६५)

तदनन्तर उन दोनों से पूजित होकर शरणागतवत्सल पुण्डरीकाक्ष देवेश प्रसन्न हुए। (६६)

हे मुनिशार्दूल! योगी भगवान् मधुसूदन ने शरणागत गजेन्द्र से यह मधुर वचन कहा- (६७)

श्रीभगवान् ने कहा—जो स्थिरबुद्धि से शुचिव्रत मनुष्य प्रयत्नपूर्वक मेरा तुम्हारा तथा सरोवर, ग्राह के विदारण, गुल्म, कीचक, रेणु एवं मेरु पुत्र के रूप, अश्वत्थ, भास्कर, गङ्गा तथा नैमिषारण्य का स्मरण एवं भक्तिपूर्वक कीर्तन तथा श्रवण करेंगे उनके दुःस्वप्न का विनाश एवं सुस्वप्न की सृष्टि होगी। (६८-७०)

जो मनुष्य प्रातःकाल उठकर मत्स्यावतार, कूर्मावतार, वराहावतार, वामनावतार, गरुड, नरसिंहावतार, गजेन्द्र और सृष्टिप्रलयकारक (भगवान्) का स्मरण करेंगे वे समस्त पापों से मुक्त होकर पुण्य लोक को प्राप्त करेंगे। (७१-७२)

पुलस्त्य ने कहा—गजेन्द्र से ऐसा कहकर गरुड़ध्वज हृषीकेश ने हाथ से गजेन्द्र और गन्धर्व दोनों का स्पर्श किया। (७३)

हे विप्र! तदनन्तर नारायणपरायण गजेन्द्र दिव्य शरीर धारण कर मधुसूदन की शरण में गया। (७४)

तदुपरान्त श्रीमान् अद्भुतकर्मा नारायण ने गजोत्तम एवं ग्राह को पापबन्ध एवं शाप से मुक्त किया। (७५)

भगवद्भक्त ऋषियों द्वारा स्तुत होते हुए वे अविज्ञेय गति वाले प्रभु भगवान् विष्णु चले गये। (७६)

गजेन्द्र के मोक्ष को देखकर इन्द्रादि देवों ने महात्मा प्रभु नारायण हरि की वन्दना की। (७७)

गज-विमोक्षण को देखकर विस्मय से उत्फुल्ल नेत्रों वाले महर्षियों एवं चारणों ने जनार्दन की स्तुति की। (७८)

गजेन्द्रमोक्षण रूपी चक्रपाणि के कर्म को देखकर प्रजापति ब्रह्मा ने यह वचन कहा— (७९)

जो मनुष्य प्रातःकाल उठकर प्रतिदिन इसे सुनेगा, वह परमसिद्धि प्राप्त करेगा और उसका दुःस्वप्न विनष्ट हो जायेगा। (८०)

गजेन्द्रमोक्षणं पुण्यं सर्वपापप्रणाशनम् ।
कथितेन स्मृतेनाथ श्रुतेन च तपोधन ॥
गजेन्द्रमोक्षणेनेह सद्यः पापात् प्रमुच्यते ॥ ८१
एतत्पवित्रं परमं सुपुण्यं
संकीर्तनीयं चरितं मुरारेः ।
यस्मिन् किलोक्ते बहुपापबन्धनात्
लभ्येत मोक्षो द्विरदेन यद्वत् ॥ ८२
अजं वरेण्यं वरपद्मनाभं
नारायणं ब्रह्मनिधिं सुरेशम् ।
तं देवगुह्यं पुरुषं पुराणं
वन्दाम्यहं लोकपतिं वरेण्यम् ॥ ८३
पुलस्त्य उवाच ।
एतत्तवोक्तं प्रवरं स्तवानां
स्तवं मुरारेर्वरनागकीर्तनम् ।
यं कीर्त्य संश्रुत्य तथा विचिन्त्य
पापापनोदं पुरुषो लभेत ॥ ८४

इति श्रीवामनपुराणे अष्टपञ्चाशोऽध्यायः ॥५८॥

५९

पुलस्त्य उवाच ।
कश्चिदासीद् द्विजद्रोग्धा पिशुनः क्षत्रियाधमः ।
परपीडारुचिः क्षुद्रः स्वभावादपि निर्घृणः ॥ १
पर्यामिताः सदा तेन पितृदेवद्विजातयः ।
स त्वायुषि परिक्षीणे जज्ञे घोरो निशाचरः ॥ २
तेनैव कर्मदोषेण स्वेन पापकृतां वरः ।
क्रूरैश्चक्रे ततो वृत्तिं राक्षसत्वाद् विशेषतः ॥ ३
तस्य पापरतस्यैवं जग्मुर्वर्षशतानि तु ।
तेनैव कर्मदोषेण नान्यां वृत्तिमरोचयत् ॥ ४
यं यं पश्यति सत्त्वं स तं तमादाय राक्षसः ।

हे तपोधन! गजेन्द्र-मोक्ष पवित्र और सभी प्रकार के पापों का विनाशक है। इस गजेन्द्रमोक्ष के कहने, स्मरण करने और सुनने से मनुष्य तत्काल पाप से मुक्त हो जाता है। (८१)

मुरारि विष्णु का यह पवित्र चरित्र परम पुण्यदायक तथा कीर्तन करने योग्य है। इसे कहने से मनुष्य गजेन्द्र के सदृश अनेक पापों के बन्धन से मुक्त हो जाता है। (८२)

मैं अज, वरेण्य, श्रेष्ठ, पद्मनाभ, नारायण, ब्रह्मनिधि, सुरेश, देवगुह्य पुराणपुरुष उन लोकपति की वन्दना करता हूँ। (८३)

पुलस्त्य ने कहा—स्तुतियों में श्रेष्ठ गजेन्द्र द्वारा कीर्तित मुरारि के इस श्रेष्ठ स्तोत्र को मैंने तुमसे कहा। इसके कीर्तन, श्रवण तथा चिन्तन करने से मनुष्य पापों से मुक्ति पाता है। (८४)

श्री वामनपुराण में अट्ठावनवाँ अध्याय समाप्त ॥ ५८ ॥

५९

पुलस्त्य ने कहा—ब्राह्मण विद्वेषी, चुगलखोर, दूसरों को पीड़ा देने वाला, नीच, स्वभाव से भी निष्ठुर एक क्षत्रियाधम था। (१)

उसने सदा पितरों, देवों एवं द्विजातियों का निरादर किया। आयु समाप्त होने पर वह घोर निशाचर हुआ। (२)

अपने उसी कर्म के दोष एवं विशेषकर राक्षस होने से वह जघन्य पापी क्रूर कर्मों द्वारा जीवन निर्वाह करने लगा। (३)

पापकर्म करते हुये उसके सौ वर्ष व्यतीत हो गये। उसी कर्म में दोष से अन्य वृत्ति में इसकी रुचि नहीं होती थी। (४)

चखाद रौद्रकर्मासौ बाहुगोचरमागतम् ॥ ५
एव तस्यातिदुष्टस्य कुर्वतः प्राणिनां वधम् ।
जगाम च महान् कालः परिणामं तथा वयः ॥ ६
स कदाचित् तपस्यन्तं ददर्श सरित्तटे ।
महाभागमूर्ध्वभुजं यथावत्संयतेन्द्रियम् ॥ ७
अनया रक्षया ब्रह्मन् कृतरक्षं तपोनिधिम् ।
योगाचार्यं शुचिं दक्षं वासुदेवपरायणम् ॥ ८
विष्णुः प्राच्यां स्थितश्चक्री विष्णुर्दक्षिणतो गदी ।
प्रतीच्यां शार्ङ्गधृग्विष्णुर्विष्णुः खड्गी ममोत्तरे ॥ ९
हृषीकेशो विकोणेषु तच्छिद्रेषु जनार्दनः ।
क्रोडरूपी हरिर्भूमौ नारसिंहोऽम्बरे मम ॥ १०
क्षुरान्तममल चक्रं भ्रमत्येतत् सुदर्शनम् ।
अस्यांशुमाला दुष्प्रेक्ष्या हन्तुं प्रेतनिशाचरान् ॥ ११
गदा चेयं सहस्रार्चिरुद्वमन् पावको यथा ।
रक्षोभूतपिशाचानां डाकिनीनां च शातनी ॥ १२
शार्ङ्गं विस्फूर्जितं चैव वासुदेवस्य मद्रिपून् ।
तिर्यङ्मनुष्यकूष्माण्डप्रेतादीन् हन्त्वशेषतः ॥ १३
खड्गधाराज्वलज्ज्योत्स्नानिर्धूता ये ममाहिताः ।
ते यान्तु सौम्यतां सद्यो गरुडेनेव पन्नगाः ॥ १४
ये कूष्माण्डास्तथा यक्षा दैत्या ये च निशाचराः ।
प्रेता विनायकाः क्रूरा मनुष्या जृम्भकाः खगाः ॥१५
सिंहादयो ये पशवो दन्दशूकाश्च पन्नगाः ।
सर्वे भवन्तु मे सौम्या विष्णुचक्ररवाहताः ॥ १६
चित्तवृत्तिहरा ये च ये जनाः स्मृतिहारकाः ।
बलौजसां च हर्तारश्छायाविध्वंसकाश्च ये ॥ १७
ये चोपभोगहर्तारो ये च लक्षणनाशकाः ।
कूष्माण्डास्ते प्रणश्यन्तु विष्णुचक्ररवाहताः ॥ १८
बुद्धिस्वास्थ्यं मनःस्वास्थ्यं स्वास्थ्यमैन्द्रियकं तथा ।

यह रौद्रकर्मा राक्षस जिस प्राणी को देखता उसे अपनी भुजाओं से पकड़ कर खा जाता था। (५)

इस प्रकार प्राणियों का वध करते हुए उस अतिदुष्ट का अधिक समय व्यतीत हो गया एवं उसकी अवस्था ढलने लगी। (६)

किसी समय उसने नदी तट पर एक ऊर्ध्वभुज, विधिवत् इन्द्रियों पर सयम किये हुए महाभाग्यवान् ऋषि को तपस्या करते देखा। (७)

हे ब्रह्मन्! नीचे लिखे रक्षामन्त्रों द्वारा उस तपोनिधि, पवित्र, निपुण, वासुदेव परायण योगाचार्य ने अपनी रक्षा कर ली थी— (८)

पूर्वदिशा मे चक्रधारी विष्णु, दक्षिण दिशा में गदाधर विष्णु, पश्चिम दिशा मे शार्ङ्ग धनुर्धारी विष्णु एव उत्तर दिशा मे खड्गधारी विष्णु मेरी रक्षा करें। (९)

दिक्कोणों मे हृषीकेश, उन (दिशाओं एवं विदिशाओं) के छिद्रों में जनार्दन, भूमि में वराह रूपधारी हरि एवं आकाश मे नृसिंह मेरी रक्षा करें। (१०)

प्रेतों एव निशाचरों के वध के लिए यह अति तीक्ष्ण निर्मल सुदर्शन चक्र घूम रहा है। इसकी किरणमाला दुष्प्रेक्ष्य है। (११)

ज्वाला उगलने वाले अग्नि की भाँति सहस्रों किरणों से युक्त यह गदा राक्षसों, भूतों, पिशाचों और डाकिनियों का विनाश करे। (१२)

वासुदेव का चमकने वाला शार्ङ्ग धनुष मेरे शत्रुभूत हिंस्र पशु पक्षियों, मनुष्यों, दानवों तथा प्रेतों का पूर्णतया विनाश करे। (१३)

जैसे गरुड को देखकर सर्प शान्त हो जाते हैं उसी प्रकार (विष्णु) के खड्ग की धार के तीव्र तेज से मेरे अहितकारी हतप्रभ होकर तत्काल सौम्य बन जाँय। (१४)

समस्त कूष्माण्ड, यक्ष, दैत्य, निशाचर, प्रेत, विनायक, क्रूर मनुष्य, जृम्भक, पक्षी, सिंहादि पशु एव तीव्र दंश वाले सर्प ये सभी विष्णु के चक्र के वेग से आहत होकर मेरे प्रति सौम्य हो जाँय। (१५-१६)

सभी चित्त की वृत्तियों का हरण करने वाले, स्मृतिहारी, बल एवं ओज के अपहारक, कान्ति व विध्वसक, सुखों के विनाशक एव लक्षणों के विनाशक सभी कूष्माण्डादि (भूत प्रेत) विष्णु के चक्र के वेग से आहत होकर नष्ट हो जाँय। (१७-१८)

देवदेव वासुदेव के कीर्तन से मुझे बुद्धि, मन तथा

ममास्तु देवदेवस्य वासुदेवस्य कीर्तनात् ॥ १९

पृष्ठे पुरस्तादथ दक्षिणोत्तरे
विकोणकश्चास्तु जनार्दनो हरिः ।
तमीड्यमीशानमनन्तमच्युतं
जनार्दनं प्रणिपतितो न सीदति ॥ २०

यथा परं ब्रह्म हरिस्तथा परः
जगत्स्वरूपश्च स एव केशवः ।
ऋतेन तेनाच्युतनामकीर्तना-
त्प्रणाशमेतु त्रिविधं ममाशुभम् ॥ २१

इत्यात्मानस्य रक्षार्थं कृत्वा वै विष्णुपञ्जरम् ।
संस्थितोऽसावपि बली राक्षसः समुपाद्रवत् ॥ २२
ततो द्विजनियुक्तायां रक्षायां रजनीचरः ।
निर्धूतवेगः सहसा तस्थौ मासचतुष्टयम् ॥ २३
यावद् द्विजस्य देवर्षे समाप्तिं समाधितः ।
जाते जप्यावसानेऽसौ तं ददर्श निशाचरम् ॥ २४
दीनं हतबलोत्साहं कान्दिशीकं हतौजसम् ।
तं दृष्ट्वा कृपयाविष्टः समाश्वास्य निशाचरम् ॥ २५
पप्रच्छागमने हेतुं स चाचष्ट यथातथम् ।
स्वभावमात्मनो दृष्ट्वा रक्षया तेजसः स्थितिम् ॥ २६
कथयित्वा च तद्रक्षः कारणं विविधं ततः ।
प्रसीदेत्यब्रवीद् विप्रं निर्विण्णः स्वेन कर्मणा ॥ २७
बहूनि पापानि मया कृतानि बहवो हताः ।
कृताः स्त्रियो मया बह्व्यो विधवाः पुत्रवर्जिताः ।
अनागसां च सत्त्वानामनन्तानां क्षयः कृतः ॥ २८
तस्मात् पापादहं मोक्षमिच्छामि त्वत्प्रसादतः ।
पापप्रशमनायालं कुरु मे धर्मदेशनम् ॥ २९
पापस्यास्य क्षयकरमुपदेशं प्रयच्छ मे ।
तस्य तद् वचनं श्रुत्वा राक्षसस्य द्विजोत्तमः ॥ ३०
वचनं प्राह धर्मात्मा हेतुमच्च सुभाषितम् ।
कथं क्रूरस्वभावस्य सतस्तव निशाचर ।
सहसैव समायाता जिज्ञासा धर्मवर्त्मनि ॥ ३१

राक्षस उवाच ।

त्वां वै समागतोऽस्म्यद्य क्षिप्तोऽहं रक्षया बलात् ।
तव संसर्गतो ब्रह्मन् जातो निर्वेद उत्तमः ॥ ३२

इन्द्रियों की स्वस्थता प्राप्त हो । (१९)

जनार्दन हरि मेरे पीछे, आगे, दायें, बायें एवं दिकोणों में स्थित रहें । स्तुति करने योग्य ईशान अनन्त अच्युत उन जनार्दन को प्रणिपात करने वाला मनुष्य दुःखी नहीं होता । (२०)

जैसे ब्रह्म श्रेष्ठ हैं उसी प्रकार हरि भी श्रेष्ठ हैं । वे केशव ही जगत्स्वरूप हैं । अच्युत के नाम के कीर्तन के इस सत्य द्वारा मेरे त्रिविध अशुभ नष्ट हो जाँय । (२१)

इस प्रकार अपनी रक्षा हेतु विष्णुपञ्जर का विन्यास कर वे अवस्थित थे । वह बलवान राक्षस उनकी ओर दौड़ा । (२२)

हे देवर्षि ! तदनन्तर द्विज द्वारा विनियोजित रक्षा (की सीमा) में पहुँचने पर वह राक्षस गतिहीन होकर चार मास तक जब तक ब्राह्मण की समाधि समाप्त नहीं हुई पड़ा रहा । जप समाप्त होने पर उन्होंने, उस निशाचर को देखा । (२३-२४)

उन्होंने दीन, बलहीन, हतोत्साह, भयाकुल, तथा तेजोहीन उस निशाचर को देखकर कृपापूर्वक उसे आश्वासन प्रदान किया और उसके आने का कारण पूछा । उसने अपने यथार्थ स्वभाव देखने के (रक्षा के) निकट आने पर तेज का नाश होना बताया । तदनन्तर अन्य अनेक कारणों का उल्लेख कर अपने कर्म से दुःखी उस राक्षस ने ब्राह्मण से कहा आप प्रसन्न हो जायें । (२५-२७)

मैंने बहुत पाप किया है । मैंने अनेक मनुष्यों को मारा । मैंने बहुत सी स्त्रियों को विधवा एवं पुत्रहीन कर दिया तथा निरपराध अन्य प्राणियों का नाश किया है । (२८)

आपकी कृपा से मैं इन पापों से मुक्त होना चाहता हूँ । अतः आप मुझे पापों का नाश करने में समर्थ धर्म का उपदेश दें । (२९)

आप मुझे इस पाप को नष्ट करने वाला उपदेश प्रदान करें । उस राक्षस के उस वचन को सुनकर धर्मात्मा द्विजोत्तम ने हेतुयुक्त मधुर वचन कहा— (३०)

हे निशाचर ! क्रूर स्वभाव के होते हुए भी सहसा धर्ममार्ग में तुम्हारी जिज्ञासा कैसे उत्पन्न हुई ? (३१)

राक्षस ने कहा—मैं आज जैसे ही आपके समीप आया रक्षा द्वारा बलपूर्वक फेंक दिया गया । हे ब्रह्मन् ! आपके संसर्ग से मुझे उत्तम वैराग्य हो गया । (३२)

का सा रक्षा न तां वेद्मि वेद्मि नास्याः परायणम् ।
यस्याः संसर्गमासाद्य निर्वेदं प्रापितं परम् ॥ ३३
त्वं कृपां कुरु धर्मज्ञ मय्यनुक्रोशमावह ।
यथा पापापनोदो मे भवत्यार्य तथा कुरु ॥ ३४
पुलस्त्य उवाच ।
इत्येवमुक्तः स मुनिस्तदा वै तेन रक्षसा ।
प्रत्युवाच महाभागो विमृश्य सुचिरं मुनिः ॥ ३५
ऋषिरुवाच ।
यन्ममाहोपदेशार्थं निर्विण्णः स्वेन कर्मणा ।
युक्तमेतद्धि पापानां निवृत्तिरुपकारिका ॥ ३६
करिष्ये यातुधानानां नत्वहं धर्मदेशनम् ।
तान् संपृच्छ द्विजान् सौम्य ये वै प्रवचने रताः ॥ ३७
एवमुक्त्वा ययौ विप्रश्चिन्तामाप स राक्षसः ।
कथं पापापनोदः स्यादिति चिन्ताकुलेन्द्रियः ॥ ३८
न चखाद स सत्त्वानि क्षुधा संबाधितोऽपि सन् ।
षष्ठे षष्ठे तदा काले जन्तुमेकमभक्षयत् ॥ ३९

मैं यह नहीं जानता कि जिसका संसर्ग पाकर मुझे श्रेष्ठ वैराग्य हुआ है वह रक्षा कैसी है एवं उसका आश्रय कौन है ? (३३)

हे धर्मज्ञ ! हे आर्य ! आप कृपा करें। मेरे ऊपर दया लावें। आप वह कार्य करें जिससे मेरे पापों का विनाश हो जाय। (३४)

पुलस्त्य ने कहा—उस राक्षस के ऐसा कहने पर उन महाभाग मुनि ने बहुत देर विचार कर उत्तर दिया। (३५)

ऋषि ने कहा—अपने कर्म से दुःखी होकर तुमने मुझसे जो उपदेश के लिये कहा है वह उचित ही है। पापों की निवृत्ति से उपकार होता है। (३६)

परन्तु मैं राक्षसों को धर्मोपदेश नहीं दूँगा। अतः हे सौम्य ! तुम उन ब्राह्मणों से पूछो जो प्रवचन करते हैं। (३७)

ऐसा कहकर वह ब्राह्मण चला गया। वह राक्षस चिन्तामग्न हो गया। 'मेरे पाप कैसे दूर होंगे' इस विषय की चिन्ता से उसकी इन्द्रियाँ आकुल हो गईं। (३८)

भूख से क्लेश पाने पर भी उसने प्राणियों को नहीं खाया। प्रत्येक छठवें समय एक जन्तु का आहार करने लगा। (३९)

स कदाचित्क्षुधाविष्टः पर्यटन् विपुले वने ।
ददर्शाथ फलाहारमागतं ब्रह्मचारिणम् ॥ ४०
गृहीतो रक्षसा तेन स तदा मुनिदारकः ।
निराशो जीविते प्राह सामपूर्वं निशाचरम् ॥ ४१
ब्राह्मण उवाच ।
भो भद्र ब्रूहि यत् कार्यं गृहीतो येन हेतुना ।
तदनुब्रूहि भद्रं ते अयमस्म्यनुशाधि माम् ॥ ४२
राक्षस उवाच ।
षष्ठे काले त्वमाहारः क्षुधितस्य समागतः ।
निःश्रीकस्यातिपापस्य निर्घृणस्य द्विजद्रुहः ॥ ४३
ब्राह्मण उवाच ।
यद्यवश्यं त्वया चाहं भक्षितव्यो निशाचर ।
आयास्यामि तवाद्यैव निवेद्य गुरवे फलम् ॥ ४४
गुर्वर्थमेतदागत्य यत्फलग्रहणं कृतम् ।
ममात्र निष्ठा प्राप्तस्य फलानि विनिवेदितुम् ॥ ४५
स त्वं मुहूर्तमात्रं मामत्रैव प्रतिपालय ।

किसी समय भूख से पीड़ित होकर विशाल वन में घूमते हुए उसने फल लेने के लिए आए हुए एक ब्रह्मचारी को देखा। (४०)

राक्षस ने मुनिपुत्र को पकड़ लिया। तदनन्तर जीवन से निराश होकर उस ब्रह्मचारी ने सामयुक्त वचन कहा। (४१)

ब्राह्मण ने कहा—हे भद्र ! यह बतलाओ कि तुम्हारा क्या कार्य है और तुमने मुझे क्यों पकड़ा है ? तुम्हारा कल्याण हो। मैं उपस्थित हूँ। मुझे आज्ञा दो। (४२)

राक्षस ने कहा—श्रीहीन, अतिपापी, क्रूर एवं ब्राह्मणद्रोही मुझ भूखे के समीप छठवें समय तुम आहार के रूप में आये हो। (४३)

ब्राह्मण ने कहा—हे निशाचर ! यदि अवश्य ही तुम मुझे खाना चाहते हो तो मैं यह फल गुरु को निवेदित करके अभी आता हूँ। (४४)

गुरु के लिए यहाँ आकर जो मैंने फल संग्रह किया है, उसे उन्हें समर्पित करने के लिए मुझे श्रद्धा है। (४५)

अतः तुम यहाँ मुहूर्त मात्र मेरी प्रतीक्षा करो जब तक मैं

निवेद्य गुरवे यावदिहागच्छाम्यहं फलम् ॥ ४६
राक्षस उवाच ।
षष्ठे काले न मे ब्रह्मन् कश्चिद् ग्रहणमागतः ।
प्रविमुच्येत देवोऽपि इति मे पापजीविका ॥ ४७
एक एवात्र मोक्षस्य तव हेतुः शृणुष्व तत् ।
मुञ्चाम्यहमसंदिग्धं यदि तत्कुरुते भवान् ॥ ४८
ब्राह्मण उवाच ।
गुरोर्यन्न विरोधाय यन्न धर्मोपरोधकम् ।
तत्करिष्याम्यहं रक्षो यन्न व्रतहरं मम ॥ ४९
राक्षस उवाच ।
मया निसर्गतो ब्रह्मन् जातिदोषाद् विशेषतः ।
निर्विवेकेन चित्तेन पापकर्म सदा कृतम् ॥ ५०
आबाल्यान्मम पापेषु न धर्मेषु रतं मनः ।
तत्पापसंक्षयान्मोक्षं प्राप्नुयां येन तद् वद ॥ ५१
यानि पापानि कर्माणि बालत्वाच्चरितानि च ।
दुष्टां योनिमिमां प्राप्य तन्मुक्तिं कथय द्विज ॥ ५२
यद्येतद् द्विजपुत्र त्वं समाख्यास्यस्यशेषतः ।
ततः क्षुधार्तान्मत्तस्त्वं नियतं मोक्षमाप्स्यसि ॥ ५३
न चेत् तत्पापशीलोऽहमत्यर्थं क्षुत्पिपासितः ।
षष्ठे काले नृशंसात्मा भक्षयिष्यामि निर्घृणः ॥ ५४
पुलस्त्य उवाच ।
एवमुक्तो मुनिसुतस्तेन घोरेण रक्षसा ।
चिन्तामवाप महतीमशक्तस्तदुदीरणे ॥ ५५
स विमृश्य चिरं विप्रः शरणं जातवेदसम् ।
जगाम ज्ञानदानाय संशयं परमं गतः ॥ ५६
यदि शुश्रूषितो वह्निर्गुरुशुश्रूषणाद्व्रतु ।
व्रतानि वा सुचीर्णानि सप्तार्चिः पातु मां ततः ॥ ५७
न मातरं न पितरं गौरवेण यथा गुरुम् ।
सर्वदैवावगच्छामि तथा मा पातु पावकः ॥ ५८
यथा गुरुं न मनसा कर्मणा वचसाऽपि वा ।
अवजानाम्यहं तेन पातु सत्येन पावकः ॥ ५९
इत्येवं मनसा सत्यान् कुर्वतः शपथान् पुनः ।

इस फल को गुरु को देकर लौट आऊँ। (४६)

राक्षस ने कहा—हे ब्रह्मन्! छठवें समय मेरी पकड़ में आया हुआ कोई देवता भी मुक्त नहीं हो सकता। यही मेरी पापजीविका है। (४७)

तुम्हारी मुक्ति का एक ही उपाय है, उसे सुनो। यदि आप उसे करें तो निस्सन्देह मैं आपको छोड़ दूँगा। (४८)

ब्राह्मण ने कहा—हे राक्षस! यदि वह कार्य गुरु का विरोधी, धर्म का अवरोधक एवं मेरे व्रत को खण्डित करने वाला न होगा तो मैं उसे करूँगा। (४९)

राक्षस ने कहा—हे ब्रह्मन्! मैंने स्वभावत एवं विशेषत जातिदोषवश तथा विवेकरहित चित्त के कारण सदा पापकर्म किया। (५०)

बचपन से ही मेरा मन धर्म में नहीं अपितु पाप मे लगा रहा। अत वह उपाय बतलाओ जिससे पाप का क्षय होकर मेरा मोक्ष हो जाय। (५१)

हे द्विज! इस दुष्ट योनि को पाकर अज्ञतावश मैंने जिन पापकर्मों का आचरण किया है, उनसे मुक्ति का उपाय बतलाओ। (५२)

हे ब्राह्मणपुत्र! यदि तुम यह पूर्णरूप से मुझे बतलाओ तो मुझ क्षुधार्त्त से अवश्य छुटकारा पा जाओगे। (५३)

यदि ऐसा नहीं हुआ तो अत्यधिक भूखा प्यासा निष्ठुर मैं छठवें समय (प्राप्त हुए) आपको खा जाऊँगा। (५४)

पुलस्त्य ने कहा—इस भयकर राक्षस के ऐसा कहने पर मुनिपुत्र (राक्षस की पापमुक्ति का उपाय) कहने मे असमर्थ होने से बहुत चिन्तित हुआ। (५५)

चिरकाल तक विचार करने के उपरान्त अत्यन्त संशयापन्न ब्राह्मण ज्ञानदान के निमित्त अग्नि की शरण में गया। (५६)

(उसने कहा—) हे अग्नि! गुरु की सेवा के पश्चात् यदि मैंने आपकी सेवा की हो तथा व्रतों का भली भाँति पालन किया हो तो आप सप्तार्चि मेरी रक्षा करें। (५७)

हे अग्नि! यदि मैंने माता और पिता से गौरव में गुरु को सदा ही अधिक महत्त्व दिया हो तो आप मेरी रक्षा करें। (५८)

यदि मन, कर्म एवं वाणी से भी मैंने गुरु का अपमान न किया हो तो उस सत्य के कारण अग्नि मेरी रक्षा करें। (५९)

इस प्रकार मन से सत्य शपथों को लेने वाले उसके

सप्तर्चिषा समादिष्टा प्रादुरासीत् सरस्वती ॥ ६०
सा प्रोवाच द्विजसुतं राक्षसग्रहणाकुलम् ।
मा भैर्द्विजसुताहं त्वां मोक्षयिष्यामि संकटात् ॥ ६१
यदस्य रक्षसः श्रेयो जिह्वाग्रे संस्थिता तव ।
तत् सर्वं कथयिष्यामि ततो मोक्षमवाप्स्यसि ॥ ६२
अदृश्या रक्षसा तेन प्रोक्त्वेत्थं सा सरस्वती ।
अदर्शनं गता सोऽपि द्विजः प्राह निशाचरम् ॥ ६३

ब्राह्मण उवाच ।

श्रूयतां तव यच्छ्रेयस्तथाऽन्येषां च पापिनाम् ।
समस्तपापशुद्ध्यर्थं पुण्योपचयदं च यत् ॥ ६४
प्रातरुत्थाय जप्तव्यं मध्याह्नेऽह्नःक्षयेऽपि वा ।
असंशयं सदा जप्यो जपतां पुष्टिशान्तिदः ॥ ६५
ॐ हरिं कृष्णं हृषीकेशं वासुदेवं जनार्दनम् ।
प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु ॥ ६६
चराचरगुरुं नाथं गोविन्दं शेषशायिनम् ।
प्रणतोऽस्मि परं देवं स मे पापं व्यपोहतु ॥ ६७
शङ्खिनं चक्रिणं शार्ङ्गधारिणं स्रग्धरं परम् ।
प्रणतोऽस्मि पतिं लक्ष्म्याः स मे पापं व्यपोहतु ॥ ६८
दामोदरमुदाराक्षं पुण्डरीकाक्षमच्युतम् ।
प्रणतोऽस्मि स्तुतं स्तुत्यैः स मे पापं व्यपोहतु ॥ ६९
नारायणं नरं शौरिं माधवं मधुसूदनम् ।
प्रणतोऽस्मि धराधारं स मे पापं व्यपोहतु ॥ ७०
केशवं चन्द्रसूर्याक्षं कंसकेशिनिषूदनम् ।
प्रणतोऽस्मि महाबाहुं स मे पापं व्यपोहतु ॥ ७१
श्रीवत्सवक्षसं श्रीशं श्रीधरं श्रीनिकेतनम् ।
प्रणतोऽस्मि श्रियः कान्तं स मे पापं व्यपोहतु ॥ ७२
यमीशं सर्वभूतानां ध्यायन्ति यतयोऽक्षरम् ।
वासुदेवमनिर्देश्यं तमस्मि शरणं गतः ॥ ७३
समस्तालम्बनेभ्यो यं व्यावृत्य मनसो गतिम् ।
ध्यायन्ति वासुदेवाख्यं तमस्मि शरणं गतः ॥ ७४

समक्ष अग्नि के आदेश से सरस्वती प्रकट हुईं । (६०)

उन्होंने राक्षस के द्वारा पकड़े जाने के कारण व्याकुल ब्राह्मण-पुत्र से कहा—हे ब्राह्मणपुत्र ! डरो मत । मैं तुम्हें सङ्कट से मुक्त करूँगी । (६१)

तुम्हारे जिह्वाग्र पर स्थित होकर मैं राक्षस के श्रेयस्कर समस्त विषयों का कथन करूँगी । तदनन्तर तुम मुक्त हो जाओगे । (६२)

उस राक्षस से अदृश्य रहती हुई सरस्वती ऐसा कहने के उपरान्त तिरोहित हो गईं । उस ब्राह्मण ने निशाचर से कहा । (६३)

ब्राह्मण ने कहा—सुनो ! तुम्हारे और अन्य पापियों के लिए श्रेयस्कर, समस्त पापों की शुद्धि एवं पुण्यवर्द्धन करने वाला (तत्त्व मैं कहता हूँ ।) (६४)

प्रातःकाल उठ कर, मध्याह्न में अथवा सायंकाल इस जपनीय स्तोत्र का सदा जप करना चाहिए । यह जप जपकर्त्ता को निस्सन्देह शान्ति एवं पुष्टि प्रदान करता है । (६५)

ओं हरि, कृष्ण, हृषीकेश, वासुदेव, जनार्दन, जगन्नाथ को मैं प्रणाम करता हूँ । वे मेरे पाप को दूर करें । (६६)

चराचर के गुरु, नाथ, शेषशायी, परम देव गोविन्द को मैं प्रणाम करता हूँ । वे मेरे पाप को दूर करें । (६७)

शंखधारी, चक्रधारी, शार्ङ्गधारी एवं उत्तम मालाधारी, लक्ष्मीपति को मैं प्रणाम करता हूँ । वे मेरे पाप को दूर करें । (६८)

दामोदर, उदाराक्ष, पुण्डरीकाक्ष, स्तुतिपात्रों से स्तुत अच्युत को मैं प्रणाम करता हूँ । वे मेरे पापों को दूर करें । (६९)

नारायण, नर, शौरि, माधव, मधुसूदन एवं धराधार को मैं प्रणाम करता हूँ । वे मेरे पाप को दूर करें । (७०)

चन्द्र एवं सूर्यरूपी नेत्रों वाले, कंस और केशिनिषूदन महाबाहु केशव को प्रणाम करता हूँ । वे मेरे पापों को दूर करें । (७१)

वक्षःस्थल पर श्रीवत्स धारण करने वाले, श्रीश, श्रीधर, श्रीनिकेतन एवं श्रीकान्त को मैं प्रणाम करता हूँ । वे मेरे पापों को दूर करें । (७२)

संयमी लोग जिन सर्वभूतों के स्वामी, अक्षर एवं अनिर्देश्य वासुदेव का ध्यान करते हैं मैं उनकी शरण ग्रहण करता हूँ । (७३)

(यतिगण) अन्य समस्त आलम्बनों से मन की गति को लौटा कर जिस वासुदेव नामक ईश्वर का ध्यान करते हैं मैं उनकी शरण में आता हूँ । (७४)

सर्वगं सर्वभूतं च सर्वस्याधारमीश्वरम् ।
वासुदेवं परं ब्रह्म तमस्मि शरणं गतः ॥ ७५
परमात्मानमव्यक्तं य प्रयान्ति सुमेधसः ।
कर्मक्षयेऽक्षयं देवं तमस्मि शरणं गतः ॥ ७६
पुण्यपापविनिर्मुक्ता यं प्रविश्य पुनर्भवम् ।
न योगिनः प्राप्नुवन्ति तमस्मि शरणं गतः ॥ ७७
ब्रह्मा भूत्वा जगत् सर्वं सदेवासुरमानुषम् ।
यः सृजत्यच्युतो देवस्तमस्मि शरणं गतः ॥ ७८
ब्रह्मत्वे यस्य वक्त्रेभ्यश्चतुर्वेदमयं वपुः ।
प्रभुः पुरातनो जज्ञे तमस्मि शरणं गतः ॥ ७९
ब्रह्मरूपधरं देवं जगद्योनिं जनार्दनम् ।
स्रष्टृत्वे संस्थितं सृष्टौ प्रणतोऽस्मि सनातनम् ॥ ८०
स्रष्टा भूत्वा स्थितो योगी स्थित्यावसुरसूदनः ।
तमादिपुरुषं विष्णुं प्रणतोऽस्मि जनार्दनम् ॥ ८१
धृता मही हता दैत्याः परित्रातास्तथा सुराः ।
येन तं विष्णुमाद्येशं प्रणतोऽस्मि जनार्दनम् ॥ ८२
यज्ञैर्यजन्ति य विप्रा यज्ञेश यज्ञभावनम् ।
तं यज्ञपुरुषं विष्णुं प्रणतोऽस्मि सनातनम् ॥ ८३
पातालवीथीभूतानि तथा लोकान् निहन्ति यः ।
तमन्तपुरुषं रुद्रं प्रणतोऽस्मि सनातनम् ॥ ८४
संभक्षयित्वा सकलं यथासृष्टमिदं जगत् ।
यो वै नृत्यति रुद्रात्मा प्रणतोऽस्मि जनार्दनम् ॥ ८५
सुरासुराः पितृगणाः यक्षगन्धर्वराक्षसाः ।
संभूता यस्य देवस्य सर्वगं तं नमाम्यहम् ॥ ८६
समस्तदेवाः सकला मनुष्याणां च जातयः ।
यस्यांशभूता देवस्य सर्वगं त नतोऽस्म्यहम् ॥ ८७
वृक्षगुल्मादयो यस्य तथा पशुमृगादयः ।
एकांशभूता देवस्य सर्वगं तं नमाम्यहम् ॥ ८८
यस्मान्नान्यत् परं किंचिद् यस्मिन् सर्वं महात्मनि ।
यः सर्वमध्यगोऽनन्तः सर्वगं तं नमाम्यहम् ॥ ८९

मैं सर्वगत, सर्वभूत, सर्वाधार, ईश्वर एव वासुदेव नामक पर ब्रह्म की शरण जाता हूँ। (७५)

उत्तम मेधायुक्त लोग कर्म का क्षय होने पर जिन अव्यक्त, अक्षय, परमात्मदेव को प्राप्त करते हैं, मैं उनका शरणागत हूँ। (७६)

पुण्य पाप से मुक्त योगि लोग जिन्हे पाकर पुन जन्म नहीं लेते, मैं उनकी शरण मे जाता हूँ। (७७)

ब्रह्मा का रूप धारण कर देवता, असुर एव मनुष्यों से युक्त समस्त जगत की सृष्टि करने वाले अच्युत देव की मैं शरण मे जाता हूँ। (७८)

ब्रह्मा का रूप धारण करने पर जिनके मुखों से चतुर्वेदात्मक शरीरधारी पुरातन प्रभु का प्रादुर्भाव हुआ था मैं उनकी शरण मे जाता हूँ। (७९)

मैं सृष्टि के लिये स्रष्टारूप से स्थित ब्रह्मरूपधारी सनातन जगद्योनि जनार्दन को प्रणाम करता हूँ। (८०)

सृष्टि कर्ता होकर योगी रूप में विद्यमान एवं स्थिति-काल मे राक्षसों का नाश करने वाले आदिपुरुष जनार्दन को मैं प्रणाम करता हूँ। (८१)

मैं उन आदि ईश्वर जनार्दन विष्णु को प्रणाम करता हूँ जिन्होंने पृथ्वी को धारण किया है, दैत्यों को मारा है एवं देवों का परित्राण किया है (८२)

ब्राह्मण लोग यज्ञों द्वारा जिनकी आराधना करते हैं मैं उन यज्ञपुरुष यज्ञभावन, यज्ञेश सनातन विष्णु को प्रणाम करता हूँ। (८३)

मैं पाताललोक निवासी प्राणियों तथा लोकों का विनाश करने वाले उन अन्त पुरुष सनातन रुद्र को प्रणाम करता हूँ। (८४)

यथासृष्ट इस समस्त जगत का भक्षण कर नृत्य करने वाले रुद्रात्मा जनार्दन को मैं प्रणाम करता हूँ। (८५)

मैं उन सर्वगामी देव को प्रणाम करता हूँ जिनसे समस्त सुर, असुर, पितृगण, यक्ष, गन्धर्व एवं राक्षस उत्पन्न हुए हैं। (८६)

मैं उन सर्वगामी देव को प्रणाम करता हूँ जिनके अंश से समस्त देव एव मनुष्यों की सभी जातियाँ उत्पन्न हुई हैं। (८७)

वृक्ष, गुल्म आदि तथा पशु, मृग आदि जिन परमदेव के एक अंश रूप हैं मैं उन सर्वगामी देव को प्रणाम करता हूँ। (८८)

मैं उन सर्वव्यापी देव को प्रणाम करता हूँ जिनसे

यथा सर्वेषु भूतेषु गूढोऽग्निरिव दारुषु ।
विष्णुरेवं तथा पापं ममाशेषं प्रणश्यतु ॥ ९०

यथा विष्णुमयं सर्वं ब्रह्मादि सचराचरम् ।
यच्च ज्ञानपरिच्छेद्यं पापं नश्यतु मे तथा ॥ ९१

शुभाशुभानि कर्माणि रजःसत्त्वतमांसि च ।
अनेकजन्मकर्मोत्थं पापं नश्यतु मे तथा ॥ ९२

यन्निशायां च यत्प्रातर्यन्मध्याह्नापराह्णयोः ।
संध्ययोश्च कृतं पापं कर्मणा मनसा गिरा ॥ ९३

यत् तिष्ठता यद् व्रजता यच्च शय्यागतेन मे ।
कृतं यदशुभं कर्म कायेन मनसा गिरा ॥ ९४

अज्ञानतो ज्ञानतो वा मदाचलितमानसैः ।
तत् क्षिप्रं विलयं यातु वासुदेवस्य कीर्तनात् ॥ ९५

परदारपरद्रव्यवाञ्छाद्रोहोद्भवं च यत् ।
परपीडोद्भवां निन्दां कुर्वता यन्महात्मनाम् ॥ ९६

यच्च भोज्ये तथा पेये भक्ष्ये चोष्ये विलेहने ।
तद् यातु विलयं तोये यथा लवणभाजनम् ॥ ९७

यद् बाल्ये यच्च कौमारे यत् पाप यौवने मम ।
वयःपरिणतौ यच्च यच्च जन्मान्तरे कृतम् ॥ ९८

तन्नारायण गोविन्द हरिकृष्णेश कीर्तनात् ।
प्रयातु विलयं तोये यथा लवणभाजनम् ॥ ९९

विष्णवे वासुदेवाय हरये केशवाय च ।
जनार्दनाय कृष्णाय नमो भूयो नमो नमः ॥ १००

भविष्यन्नरकघ्नाय नमः कंसविघातिने ।
अरिष्टकेशिचाणूरदेवारिक्षयिणे नमः ॥ १०१

कोऽन्यो बलेर्वञ्चयिता त्वामृते वै भविष्यति ।
कोऽन्यो नाशयति बलाद् दर्पं हैहयभूपतेः ॥ १०२

कः करिष्यत्यथाऽन्यो वै सागरे सेतुबन्धनम् ।
वधिष्यति दशग्रीवं कः सामात्यपुरःसरम् ॥ १०३

कस्त्वामृतेऽन्यो नन्दस्य गोकुले रतिमेष्यति ।
प्रलम्बपूतनादीनां त्वामृते मधुसूदन ।

भिन्न कोई वस्तु नहीं है एव जिन महात्मा मे समस्त पदार्थ स्थित हैं तथा जो सभी के अन्त प्रविष्ट और अनन्त हैं । (८९)

काष्ठ मे अग्नि सदृश सर्वभूतों मे निगूढ विष्णु मेरे समस्त पापों को नष्ट करें । (९०)

क्योंकि विष्णु से ब्रह्मादि सम्पूर्ण चराचरात्मक जगत् व्याप्त है तथा जो ज्ञानपरिच्छेद्य है अत मेरे पाप नष्ट हो जाँय । (९१)

(विष्णु की कृपा से) मेरे शुभाशुभ कर्म, सत्त्व, रज एव तमोगुण तथा अनेक जन्मों के कर्म से उत्पन्न पाप नष्ट हो जायँ । (९२)

शरीर, कर्म, मन एव वाणी द्वारा रात्रि, प्रात, मध्याह्न, अपराह्न एव सन्ध्याओं में चलने, बैठने एव सोते हुए ज्ञान या अज्ञान पूर्वक अथवा अहङ्कार विचलित मन से मैंने जो शुभ या अशुभ पाप कर्म किये हों वे वासुदेव के कीर्तन से शीघ्र विलीन हो जाँय । (९३-९५)

परस्त्री एवं परद्रव्य की आकांक्षा, द्रोह, परपीड़ा, महात्माओं की निन्दा तथा भोज्य, पेय, भक्ष्य चोष्य एवं विलेहन के कारण उद्भूत समस्त पाप इस प्रकार विलीन हो जाँय जैसे जल मे लवण पात्र विलीन हो जाता है । (९६-९७)

नारायण, गोविन्द, हरिकृष्ण, ईश का कीर्तन करने से बाल्यकाल, कौमार्य, यौवन, वार्द्धक्य एव जन्मान्तर मे किये गये मेरे समस्त पाप इस प्रकार विलीन हो जाँय जैसे जल में लवणभाजन विलीन हो जाता है । (९८-९९)

हरि, विष्णु, वासुदेव, केशव, जनार्दन, कृष्ण को पुन पुन नमस्कार है । (१००)

भावी नरक का नाश करने वाले कंसविघाती को नमस्कार है । अरिष्ट, केशि एवं चाणूर आदि राक्षसों के क्षयकर्त्ता को नमस्कार है । (१०१)

आपके अतिरिक्त कौन बलि को छल सकता था एवं आपके बिना हैहयनरेश के दर्प को कौन नष्ट कर सकता था ? (१०२)

आपके अतिरिक्त सागर मे सेतुबन्धन कौन कर सकता है तथा अमात्य आदि सहित दशग्रीव का वध कौन कर सकता था ? (१०३)

हे मधुसूदन ! आपके अतिरिक्त ऐसा कौन है जो नन्द के गोकुल में स्नेहमयी क्रीड़ा कर सके ? देवदेव ! आपके

निहन्ताऽप्यथवा शास्ता देवदेव भविष्यति ॥ १०४
जपन्नेवं नरः पुण्यं वैष्णवं धर्ममुत्तमम् ।
इष्टानिष्टप्रसंगेभ्यो ज्ञानतोऽज्ञानतोऽपि वा ॥ १०५
कृतं तेन तु यत् पापं सप्तजन्मान्तराणि वै ।
महापातकसंज्ञं वा तथा चैवोपपातकम् ॥ १०६
यज्ञादीनि च पुण्यानि जपहोमव्रतानि च ।
नाशयेद् योगिनां सर्वमामपात्रमिवाम्भसि ॥ १०७
नरः संवत्सरं पूर्णं तिलपात्राणि षोडश ।
अहन्यहनि यो दद्यात् पठत्येतच्च तत्समम् ॥ १०८
अविलुप्तब्रह्मचर्यं संप्राप्य स्मरणं हरेः ।
विष्णुलोकमवाप्नोति सत्यमेतन्मयोदितम् ॥ १०९
यथैतत् सत्यमुक्तं मे न ह्यल्पमपि मे मृषा ।
राक्षसस्त्रस्तसर्वाङ्गं तथा मामेष मुञ्चतु ॥ ११०

पुलस्त्य उवाच ।

एवमुच्चारिते तेन मुक्तो विप्रस्तु रक्षसा ।
अकामेन द्विजो भूयस्तमाह रजनीचरम् ॥ १११

ब्राह्मण उवाच ।

एतद् भद्र मया ख्यातं तव-पातकनाशनम् ।
विष्णोः सारस्वतं स्तोत्रं यज्जगाद सरस्वती ॥ ११२
हुताशनेन प्रहिता मम जिह्वाग्रसंस्थिता ।
जगादैनं स्तवं विष्णोः सर्वेषां चोपशान्तिदम् ॥ ११३
अनेनैव जगन्नाथं त्वमाराधय केशवम् ।
ततः शापापनोदं तु स्तुते लप्स्यसि केशवे ॥ ११४
अहर्निशं हृषीकेशं स्तवेनानेन राक्षस ।
स्तुहि भक्तिं दृढां कृत्वा ततः पापाद् विमोक्ष्यसे ॥ ११५
स्तुतो हि सर्वपापानि नाशयिष्यत्यसंशयम् ।
स्तुतो हि भक्त्या नृणां वै सर्वपापहरो हरिः ॥ ११६

पुलस्त्य उवाच ।

ततः प्रणम्य तं विप्रं प्रसाद्य स निशाचरः ।
तदैव तपसे श्रीमान् शालग्राममगाद् वशी ॥ ११७
अहर्निशं स एवैनं जपन् सारस्वतं स्तवम् ।
देवक्रियारतिर्भूत्वा तपस्तेपे निशाचरः ॥ ११८

अतिरिक्त प्रलम्ब एवं पूतनादि का वध एवं नियमन कौन कर सकता था ? (१०४)

